क

नं० ५६३ - घ - १

किरातार्जुनीयव्याख्या

घण्टापथः

(काव्यशास्त्रम्)

१३२

पत्राणि १८५

(भारवीकृतं काव्यम्)

सर्गाः १ तः ११ पर्यन्तं

श्लोक संख्या ६२१

१०५१

सटीककिरातस्यप्रथमसर्गः पत्रसंख्या २४ बस्ता २८

१

रवाड़िन

४८४९ पत्रे १८३

कि॰टी॰
घं॰प॰
१

ॐ श्रीगणेशाय नमः॥ अर्द्धांगीकृतदांपत्यमपि गाढानुरागि यत्॥ पितृभ्यां जगतस्तस्मै कस्मैचिन्महसे नमः॥१॥ आलंबे जगदालंबं हेरंबचरणांबुजं॥ शुष्यंति यद्-
रजःस्पर्शात्सद्यः प्रत्यूहवार्द्धयः॥ नहि क्वेम कथं धाम सारस्वतमुपास्महे॥ यत्प्रसादात्प्रलीयंते मोहांधतमसच्छटाः॥३॥ वाणीं काणभुजीमजीगणदवाशासीच्च वैयासकीमंत-
स्तंत्रमरंस्त पन्नगगवीगुंफेषु चाजागरीत्॥ वाचामाकलयद्रहस्यमखिलं यश्चाक्षपादस्फुरां लोकेऽभूद्यदुपज्ञमेव विदुषां सौजन्यजन्यं यशः॥४॥ मल्लिनाथकविः सोयं मंदा-
त्मानुजिघृक्षया॥ नक्वीरार्जुनीयस्य काव्यं व्याख्यातुमिच्छति॥५॥ नालिकेरफलसंमितं वचो भारवेः सपदि तद्विभज्यते॥ स्वादयंतु रसगर्भनिर्भरं सारमस्य रसिका यथेप्सि-
तं॥६॥ नानानिबंधविषमैकपदैर्नितांतमासंकसंक्रमरागविलग्नधियामशंकं॥ कर्त्तुं प्रवेशमिह भारविकाव्यबंधे घंटापथं कमपि नूतनमातनिष्ये॥७॥ इहान्वय-
मुखेनैव सर्वं व्याख्यायते मया॥ नामूलं लिख्यते किंचिन्नानपेक्षितमुच्यते॥८॥ अथ तत्रभवान् भारविर्नाम कविः काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षत-
ये सद्यः परनिर्वृतये कांतासंमिततयोपदेशयुजे॥ इत्याद्यालंकारिकवचनप्रामाण्यात्काव्यस्यानेकश्रेयसाधनतां काव्यालापांश्च वर्जयेदिति निषेधशास्त्र-
स्यासत्काव्यविषयतां च पश्यन् कीरातार्जुनीयाख्यं महाकाव्यं चिकीर्षुश्चिकीर्षितार्थाविघ्नपरिसमाप्तिसंप्रदायाविच्छेदलक्षणफलसाधनत्वादाशीर्नमस्क्रि-
यावस्तुनिर्देशो व्यापितन्मुखमित्याशीर्वाद्यन्यतमस्य प्रबंधमुखलक्षणत्वाच्च वनेचरस्य युधिष्ठिरप्राप्तिरूपं वस्तु निर्दिशन् कथामुपक्षिपति॥ श्रिय इति॥
आदितः श्रीशब्दप्रयोगाद्वर्णगणादिदोषासिद्धिर्न्नाचातीवोपयुज्यते॥ तदुक्तं॥ देवतावाचकाः शब्दा ये च भद्रादिवाचकाः॥ ते सर्वे नैव निंद्याः स्युः लिपितो गणतोपि चेति॥ कुरू-
णां निवासाः कुरवो जनपदाः॥ तस्य निवास इत्यण्प्रत्ययः॥ जनपदे लुप्॥ तेषामधिपस्य संबंधिनीं शेषे षष्ठी वेति॥ क्रियेराजस्तत्याः कर्त्तृकर्मणोः कृतीति कर्मणि ष-
ष्ठी॥ पाल्यतेऽनयेति पालिनीं तां प्रति हापयिकामित्यर्थः॥ प्रजारागमूलत्वात्संपद इति भावः॥ करणाधिकरणयोश्चेति करणे ल्युट्॥ टिड्ढाणञित्यादिना ङीप्॥

प्रजासु जनेषु विषये ॥ प्रजा स्यात्संततौ जने इत्यमरः ॥ वृत्तिं व्यवहारं वेदितुं यं वनेचरं अयुंक्त नियुक्तवान् ॥ वर्णः प्रशस्तिरस्यास्तीति वर्णी ॥ ब्रह्मचारी ॥ तदुक्तं ॥ स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणं संकल्पोध्यवसायश्च क्रियानिर्वृत्तिरेव च एतन्मैथुनमष्टांगं प्रवदंति मनीषिणः ॥ विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणं ॥ एतदष्टमैथुनाभावः ॥ प्रशस्तिवर्णो ब्रह्मचारिणीति निप्रत्ययः ॥ तस्य लिंगं चिह्नं अस्यास्तीति वर्णिलिंगी ॥ ब्रह्मचारिवेषवानित्यर्थः ॥ नियुक्तः ॥ वनेचरतीति वनेचरः किरातः ॥ भिल्लाः किरातशबरपुलिंदा म्लेच्छजातयः इत्यमरः ॥ चरेष्टः इति टप्रत्ययः ॥ तत्पुरुषे कृति बहुलमित्यलुक् ॥ विदितं वेदितमस्यास्तीति विदितः ॥ परहृत्तांतज्ञानवान् ॥ इत्यर्थः ॥ अर्शआदिभ्योऽजिति अच्प्रत्ययः ॥ अथवा कर्तरि कर्मधर्मेपि चारादिदित हृत्तांतं विदितः इति उच्यते ॥ उभयत्रापि पीताणा गावो भुक्ता ब्राह्मणा विभक्ताः

श्रियः कुरूणामधिपस्य पालिनीं प्रजासु वृत्तिं यमयुङ्क्त वेदितुं स वर्णिलिंगी विदितः समाययौ युधिष्ठिरं द्वैतवने वनेचरः ॥ १ ॥

भ्रातरः इत्यत्र धनस्य यद्विभक्तत्वं तद्भ्रातृष्वपचरितं ॥ पीतोदका गाव इत्यत्राप्युदकस्य पीतत्वं गोष्वारोप्यत इति तद्वद्वत्रापि हृत्तांतगतं विदितत्वं वेत्तरि वनेचरे उपचर्यते ॥ एतेन धनायपीतप्रतिवद्धवत्सां ॥ पातु सद्यः प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु येवमादयो व्याख्याताः ॥ अथवा दितो विदितवान् ॥ कर्मकादप्यविवदते कर्मणी कर्तरि क्तः ॥ यथा आशीतः कर्तरि इत्यादौ यथाहुः ॥ धातोरर्थांतरे वृत्ते धात्वर्थेनोपसंग्रहात् ॥ प्रसिद्धेरविवक्षातः कर्मणो कर्मका क्रियेति ॥ द्वैतवने द्वैताख्ये तपोवने ॥ यद्वा द्वैते गते यस्मात्तद्वीतं तच्च तद्वनं तस्मिन् शोकमोहवर्जित इत्यर्थः ॥ युधि रणे स्थिरं युधिष्ठिरं धर्मराजं हलदन्तात्सप्तम्याः संज्ञायामित्यलुक् ॥ गवियुधिभ्यां स्थिर इति षत्वं ॥ समाययौ संप्राप्तः ॥ अत्र वनेचर इति द्वयोः ॥ स्वरव्यंजनसमुदायोरेकादेवरत्यनुप्रासः

सम्प्रतितत्कालोचितम् आदेशायन् तस्य तद्गुणसम्पन्नत्वमादर्शयन्नाह

कृतप्रणामस्येति॥कृतप्रणामस्य तत्कालोचितत्वात्कृतनमस्कारस्य॥सपत्नेन रिपुणा दुर्योधनेन रिपौ वैरीसपत्नारिद्विषद्द्वेषणदुर्हृद इत्यमरः॥जितां स्वयंत्रीकृ
तां महीं महीभुजे युधिष्ठिराय॥क्रियाग्रहणात्संप्रदानत्वं॥निवेदयिष्यतो ज्ञापयिष्यतः॥लृटः सद्वेति शतृप्रत्ययः॥तस्य वनेचरस्य मनो न विव्यथे॥कथमीदृक प्रि
यं राज्ञे विज्ञापयामीति मनसि न चचालेत्यर्थः॥व्यथ भयसंचलनयोरिति धातोर्लिट्॥ अकर्मकत्वमर्थान्तरस्य भेसेन समर्थयते॥न हीति हि यस्मात्॥हितमिच्छंतीति
हितैषिणः स्वामिहितार्थिनः पुरुषाः॥मृषामिथ्याभूतं प्रियं प्रवक्तुं नेच्छन्ति॥अन्यथा कार्यविघातकत्वात्स्वामिद्रोहिणः स्युरिति भावः॥अमोन्यममाद्यममृषाभा

कृतप्रणामस्यमहींमहीभुजेजितांसपत्नेननिवेदयिष्यतः नविव्यथेतस्यमनोनहिप्रियंप्रवक्तुमिच्छंतिमृषाहितैषि
णः २ द्विषांविघातायविधातुमिच्छतोरहस्यनुज्ञामधिगम्यभूभृतः ससौष्ठवौदार्यविशेषशालिनींविनिश्चिता
र्थामितिवाचमाददे ३

द्वि २

षित्वमभ्रुहत्वं चेति वारगुणा इति नीतिवाक्यामृते॥२॥तथाहि प्रियार्हे राज्ञे कटुनिष्ठुरोक्तिर्न युक्तेत्याशंक्या
स्वाम्यनुज्ञया न दुष्यतीत्याशयेनाह॥द्विषामिति॥रहस्येकांते॥सः वनेचरः॥द्विषां शत्रूणां कर्मणि षष्ठी॥विघाताय हंतुमित्यर्थः॥तुमर्थाच्च भाववचनादिति चतु
र्थीभाववचनाश्चेति तुमर्थे यत्र प्रत्ययः॥अत्र तादर्थ्यमपि न दोषः॥तथापि॥प्रयोगवैचित्री विशेषस्याप्यलंकारत्वादेवं व्याचख्ते॥विधातुं व्यापारं कर्तुं इच्छतः स
मानकर्तृकेषु तुमुन्॥द्विषो विहंतुमुद्यतस्येत्यर्थः॥अत एव भूभृतो युधिष्ठिरस्य॥रहस्यानुज्ञामधिगम्य॥सुष्ठुभावः सौष्ठवं शब्दसामर्थ्यं सुष्ठुशब्दाद्युवा
द्युद्गात्रादित्वादण्प्रत्ययः॥उदारस्य भावः औदार्यमर्थसंपत्तिः॥तयोर्द्वयोः सौष्ठवौदार्ययोः आद्यो विशेषः साजात्यं नतेपि लक्षणहेतोः॥क्रियायाः इति अत्राल्पस्वरस्या

पिहेतुमाह स्म पूर्वनिपातमकुर्वता मल्लिनाथेनेव पूर्वनिपातस्यानित्यत्वज्ञापनान्न पूर्वनिपातः॥ उक्तं च काशिकायां॥ अयमेव लक्षणहेत्वोरिति निर्देशः॥ पूर्वनिपातव्यभिचारचिह्नमिति
अत एवाविशेषणत्वयोर्वा विशेषः नेनशालत्तेशोभते इति सौहृदौदार्यविशेषशालिनी॥ नावक्लृप्तगिनिः॥ विनिश्चितार्थां विशेषेणतः प्रमाणानां निर्णीतार्थामिति वचस्मारां रूपां॥
वाचमाददे स्वीकृतवान् उवाचेत्यर्थः॥३॥ क्रियेति॥ प्रथमं तावदपि प्रियानिवेदकमात्मानं प्रत्यक्ताभयाचते॥ हे नृप क्रियासु कृत्येषु युक्तैर्नियुक्तैरनुजीविभिः भृत्यैश्चरादि
भिरित्यर्थः॥ चरंतीति चराः पचाद्यच् त एव चराः॥ चरेः पचाद्यजंतात् प्रज्ञादित्वात् प्रत्ययः॥ चाराश्चक्षुर्येषां ते चारचक्षुषः॥ स्वपरमंडलकार्यावलोकने चारा चक्षुषीति हि ति
पतिनानीतिवाक्यामृते प्रभवोनुग्रहानुग्रहसामर्थ्याः स्वामिनो न वंचनीयाः॥ न प्रतारणीयाः॥ सत्यमेव वक्तव्या इत्यर्थः॥ चारापचारे वक्तुरपचारवद्राज्ञां पदे पदे निपात इति भा

**क्रियासुयुक्तैर्नृपचारचक्षुषोनवंचनीयाःप्रभवोनुजीविभिः॥ अतोर्हसिक्षंतुमसाधुसाधुवाहितंमनोहारिच
दुर्लभंवचः॥४॥ सकिंसखासाधुनशास्तियोधिपंहितान्नयःसंशृणुतेसकिंप्रभुः॥**

वः॥ अतो प्रतार्यत्वाद्वक्तेतारसाध्व प्रियं साधु प्रियं वा मदुक्तमिति शेषः॥ क्षंतुं सोढुमर्हसि॥ कुतः हितं पथ्यं मनोहारि प्रियं वचो दुर्लभं॥ अतः मद्वचोपि हितत्वादप्रियमपि
क्षंतव्यमित्यर्थः॥४॥ नहि तूष्णींभाव एव च इत्याशंक्याह॥ स इति॥ यः सखा अधिपं स्वामिनं साधु हितं न शास्ति नोपदिशति॥ बुवुशासीत्यादिना शासेर्दुहादिपाठाद्द्वि
कर्मकत्वं॥ स हितानुपदेष्टा कुत्सितः सखा किंसखा दुर्मित्रमित्यर्थः॥ किमः क्षेपे इति समासांत प्रतिषेधः॥ न यापः प्रभुर्निग्रह अनुग्रहसमर्थः॥ स्वामी हितादाप्तजनाद्धितोप
देष्टुः सकाशात्॥ आख्यातोपयोग इत्यपादानत्वात् पंचमी॥ न संशृणुते न शृणोति॥ हितमिति शेषः॥ समो गम्यृच्छीत्यादिना संपूर्वाच्छृणोतेरकर्मकत्वादात्मनेपदं॥ अकर्मक

त्वं वैवलिकं ॥ स हितनश्रोता प्रभुः किं प्रभुः ॥ कुत्सितस्वामी पूर्ववत्समासः ॥ सर्वथा सविवेन वक्तव्यं ॥ श्रोतव्यं स्वामिना ॥ एवं च राज्ञः मंत्रिणोरैक्यमत्यं स्यादित्यर्थः ॥ एक मस्य फलमाह ॥ सदेति ॥ हि यस्मात् नृपेषु स्वामिषु ॥ अमात्येषु च अप्रयासेषु ॥ अनुकूलेषु परस्परानुरक्तेषु सत्सु ॥ संपदः सदा रतिमनुरागं कुर्वते ॥ कुर्वन्ति न जातु जहतीत्यर्थः ॥ अनेन मया वक्तव्यं त्वया श्रोतव्यमिति भावः ॥ अत्रैवं राजमंत्रिणोर्हितानुपदेशं तच्छ्रवणं नित्यं सामर्थ्यसिद्धेरेकमन्यलक्षणकारणस्य निर्दिष्ट स्य सर्वसंपन्निष्ठिरूपकार्येण समर्थनात् ॥ कार्येण कारणसमर्थनरूपोर्थान्तरन्यासोलंकारः ॥ तदुक्तं ॥ सामान्यविशेषकार्यकारणभावाभ्यां निर्दिष्टप्रकृतसमर्थनम र्थान्तरन्यासः ॥५॥ निसर्गेति ॥ निसर्गदुर्बोधं स्वभावदुर्ग्रहं ॥ इषदुरित्यादिना खल् प्रत्ययः ॥ भूपतीनां चरितं क्व ॥ अबोधविक्लवाः अज्ञानोपहताः ॥ जन्तवो मादृशाः ॥ पामरज

सरानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसंपदः ॥५॥ निसर्गदुर्बोधमबोधविक्लवाः क्व भूपतीनां चरितं
क्व जन्तवः ॥ तवानुभावोयमवेधि यन्मया निगूढतत्त्वं नयवर्त्म विद्विषाम् ॥६॥

नाइत्यर्थः ॥ क्वेत्युभयं संघटन इत्यर्थः ॥ तथापि निगूढतत्त्वं संवृतयाथात्म्यं विद्विषां नयवर्त्म षाड्गुण्यप्रयोगो मया अवेदि ज्ञातमिति यावत् ॥ विदेः कर्मणि लुङ् ॥ अयं इदं वेदनमि त्यर्थः ॥ विधेयप्राधान्यात्पुंलिंगनिर्देशः ॥ तवानुभावः ॥ सामर्थ्यं ॥ अनुभावइति घञंतेन षष्ठादिसमासः ॥ ननु परस्मात् घञ् प्रत्ययः ॥ श्रीणीभुवोनुपसर्गे इत्यनुपसर्गात् भवतेर्धातोर्घञ्विधानात् ॥ अत एव काशिकायां ॥ कथं प्रभावो राज्ञी प्रकृष्टो भाव इति प्रादिसमास इति चोद्यपरिहारो ॥ सम्यक् ज्ञात्वैव विज्ञापयामि ॥ ननु इदं कथाकर्ण कठोरं अलमित्याशयः ॥६॥ संप्रति यद्वक्तव्यं तदाह ॥ विषांकेति ॥ सुखेन युध्यते असौ सुयोधनः ॥ भाषायां शासियुधिदृशिधृषिमृषिभ्यो युच् वक्तव्यः ॥ नृपा सनस्थः सिंहासनस्थोपि ॥ वनमधिवसतीति वनाधिवासिनो वनस्थात् राज्यभ्रष्टादपीत्यर्थः ॥ भवतस्त्वत्तः पराभवं पराजयं ॥ विशंकमानः उत्प्रेक्षमाणः सन् ॥

दुष्टमुदरमस्येति दुरोदरं द्यूतं ॥ पृषोदरादित्वात्साधुः ॥ दुरोदरो द्यूतकारे पणे द्यूते दुरोदरमित्यमरः ॥ तस्य छद्मना मिषेण जितां लब्धां दुर्नयार्जितामित्यर्थः ॥ जगतीं महीं ॥ जगतीविषये मशो वासुक्ष्मदेश विषयेरितिवैजयंती ॥ नयेन नीत्या जेतुं वशीकर्तुं समीहते वाञ्छति ॥ ननु वाल इत्यर्थः ॥ बलवत्त्वपि क्रमविधुरागमं चयनं भुंजानस्य कुतो मनः समाधिरिति भावः ॥ अत्र दुरोदरछद्मजितामिति विशेषणद्वारेण पदार्थस्य चतुर्थपदार्थे प्रतिहेतुत्वेनोपन्यासाद्द्वितीयकाव्यलिंगमलंकारः ॥ तदुक्तं ॥ हेतोर्वाक्यपदार्थत्वे काव्यलिंगमुदाहृतमिति ॥ ७ ॥ नयेन जेतुं जगतीं समीहत इत्युक्तं तत्प्रकारमाह ॥ तथेति ॥ तथापि सांप्रतं कोपि ॥ जिह्मो वक्रो वंचक इति यावत् ॥ स दुर्योधनो भवद्विगीषया गुणैर्भवंतमाक्रमितुमिच्छतेत्यर्थः ॥ हेतावितितृतीया ॥ गुणसंपदा दानदाक्षिण्यादिगुणगरिमाकरणेन शुभ्रं यशः तनोति ॥ सखलेगुणलोभनीयाः त्वत्संपद्

विशंकमानो भवतः पराभवं नृपासनस्थोपि वनाधिवासिनः ॥ दुरोदरछद्मजितां समीहते नयेन जेतुं जगतीं सुयोधनः ॥ ७ ॥ तथापि जिह्मः सभवज्जिगीषया तनोति शुभ्रं गुणसंपदा यशः ॥ समुन्नयन्भूतिमनार्यसंगमाद्वरं विरोधोपि समं महात्मभिः ॥ ८ ॥

मात्मसात्कर्तुं त्वत्तोपि गुणवत्तामात्मनः प्रकटयतीत्यर्थः ॥ नन्वेवं गुणिनः सतोपि सज्जनविरोधो महान्तस्य दोष इत्याशंक्य सोपि ततस्संसर्गलाभे नैव प्रसंगमात् वरमुत्कर्षावहत्वादित्याह ॥ समुन्नयन्निति ॥ तथाहि भूतिं समुन्नयन्नुत्कर्षमापादयन् ॥ ल्यटः प्रातिपदिकात् ॥ ल्यब्लोपे पंचमी ॥ पुनर्लव्दसामर्थ्यात्प्रथमात्संग्रामेणापि महद्भिः समं सहेत्यर्थः ॥ साकं सार्द्धं समं सहेत्यमरः ॥ अनार्यसंगमाद्दुर्जनसंगमात् पंचमी विभक्त इति पंचमी ॥ विरोधोपि वरं मनाक्प्रियं ॥ देवाहृते वरः श्रेष्ठे त्रिषु क्लीबं मनाक्प्रियमित्यमरः ॥ अत्र मैत्र्यपेतया मनाक्प्रियत्वं विरोधस्य भूतिसमुन्नयान्नित्यस्य पूर्ववाक्यान्वये समाप्तपुनरादानात् समाप्तपुनरात्तत्वदोषापत्तिः ॥ तदुक्तं काव्यप्रकाशे ॥ समाप्तपुनरादानात्समाप्तपुनरात्तमित्ततच्चवाक्यांतरं

किराता० टी० पत्र ५

घोर

कि॰टी॰
प्र॰स॰
४

५

नि

ननु कातर्य्यं केवलानीतिरित्याशंक्याः॥ नीतियुक्तं पौरुषमस्तीत्याह॥ कृतेति॥ षसंख्या वर्गः षड्वर्गः अरीणां अंतःशत्रूणां कामक्रोधादीनां षड्वर्गः शिवभागवतवत्समासः॥ तस्य जयः कृतो येन तेन तथोक्तेन विनीतेनेत्यर्थः॥ विनीताधिकारं प्रजापालनमिति भावः॥ अगम्यरूपां दुराकलनीयां॥ मनोरिमां मानवीं मन्वादिष्टसदाचारस्तुस्तामित्यर्थः॥ पदवीं प्रजापालनपद्धतिं॥ प्रपित्सुना प्रतिपत्तुमिच्छुना॥ प्रपद्यतेः सन्नंताडुःप्रत्ययः॥ सनि मीमेत्यादिना इसादेशः॥ अत्र लोपोभ्यासस्येत्यभ्यासलोपः॥ अस्तानंद्रिणा लसंयस्तेनालसेन विद्धरिणा॥ अनलसेनेत्यर्थः॥ तंद्रिः सौत्रोधातुः॥ तस्माद्बहुलमन्यत्राप्यौणादिकइकारप्रत्ययः॥ कृदिकारादक्तिनो वा ङीष् वक्तव्य इति॥ तंद्री तंद्रिरितितंद्री तंद्रीतिवंतोपि इति क्षीरस्वामी॥ निद्रा तंद्रा त्यावतोपीति क्षीरस्वामी॥ तथा रामायणे प्रयोगः॥ त्वमितंद्रिरमतश्च त्वदोषपरिदोषवदिति॥ तेन दुर्योधनेन॥ पुरु

कृतारिषड्वर्गजयेन मानवीमगम्यरूपां पदवीं प्रपित्सुना॥ विभज्य नक्तंदिवमस्ततंद्रिणा वितन्यते तेन नयेन पौरुषं॥ ९॥ सखीनिव प्रीतियुजोनुजीविनः समानमानान्सुहृदश्च बंधुभिः॥

षस्यस्य भावे कर्मणि तत्जमीतिदिष्यः॥ नक्तं च दिवा च नक्तंदिवमहोरात्रयोरित्यर्थः॥ अचतुरेत्यादिना सप्तम्यर्थेत्यर्थकाल्पयोर्द्वंद्वे निपातन इति समासांतः विभज्य॥ अस्यां वेलायामिदं कर्मेति विभागं कृत्वा नयेन नीत्या वितन्यते विस्तार्यते॥ ९॥ सं प्रति भृत्याद्यनुरागमाह॥ सखीनिवेति॥ गतस्मयो निरहंकारः॥ अत एव सदुर्योधनः॥ संततं साधु सम्यगकपटमित्यर्थः॥ अनुजीविनो भृत्यान् प्रीतियुजः॥ स्निग्धान् सखीन् मित्राणीव दर्शयते लोकस्येति शेषः॥ हेतुमति णिच्॥ णिचश्चेत्यात्मनेपदं॥ शोभनं हृदयं येषां तान् सुहृदो मित्राणि च॥ सुहृद्दुर्हृदौ मित्रामित्रयोरिति निपातः॥ बंधुभिः आत्मादिभिः समानमानान् तुल्यसत्कारान् दर्शयते॥ बंधूनां समूहो बंधुता तां॥ प्राप्तजनबंधुसहायेभ्यस्तल्॥ कृतमाधिपत्यं स्वाम्यं यस्यास्तां कृताधिपत्यामिव दर्शयते॥ बंधून धिपतीनिव दर्शयते॥

त्यर्थः॥ यथा भृत्यादिषु सख्यादिवृत्तिर्ज्ञापयते लोकस्य ख्यापयतीत्यर्थः॥ अनुजीव्यादीनां कर्तृत्वेऽस्मिन्नन्तं कर्मेति कर्मत्वं॥ शर्वेत्वस्मिन्पदपदान्वये या वाक्यार्थमित्यंव
र्णयंति॥ स राजा अनुजीव्यादीन् सख्यादीनिव दर्शयते॥ सख्यादयस्त्वं तेनुतं प्रपश्यंति॥ सख्यादिभावेन प्रपश्यन्तस्तं तथा दर्शयते॥ स्वयमेव छंदानुवर्तितनया स्ववशीनं
तेभ्यः प्रयच्छतीत्यर्थः॥ अर्थात्तस्याभिमतकर्मकर्तृत्वं॥ अणिकर्तुरनुजीव्यादेरभिवादिदृशोरात्मनेपदमुपसंख्यानमिति णिकर्मत्वं॥ एवं वा णिजन्तत्वकर्मणो रा
ज्ञोण्यंते कर्तृत्वेप्यारोहयते हस्तीव स्वयमेव त्यादिवदध्यवसायमाणकर्मान्तरत्वाभावादणावकर्मकात् णेरणादिसूत्रस्य विषयेऽस्ति मत्वा णिचश्चेत्यात्मनेपदं प्रतिपेदिरे॥ भाष्ये तु णे
रणादिसूत्रविषयत्वमप्यसोढं॥ यथाह॥ पश्यंति भृत्या राजानं दर्शयते भृत्यान् राजा॥ दर्शयते भृत्यै राजा अत्रात्मनेपदं सिद्धं भवति॥ अत्रोह कैयटः॥ ननु कर्मान्त
रसद्भावादत्रात्मनेपदेन भाव्यं उच्यते॥ अस्मादेवोदाहरणाद्भाष्यकारस्यायमेवाभिप्राय उच्यते॥ अणौ पतावस्थायां येकर्तृ कर्मणीव द्यनिरिक्तकर्मान्तर स

ससंततंदर्शयतेगतस्मयः कृताधिपत्यामिवसाधुवंधुताम॥१०॥

द्भावादात्मनेपदं भवति॥ यथा स्थलमारोहयति मनुष्यानिति॥ इह त्वणंपनावस्थायां कर्तॄणां भृत्यादीनां णौ कर्मत्वमिति भवत्येवात्मनेपदमि
ति॥१०॥ न चायं त्रिवर्गान्क्रमाद्भजतीत्याह॥ असक्तेति॥ यथायथं यथास्वं विभज्य॥ असंकीर्णरूपं विविच्येत्यर्थः॥ यथास्वे यथायथमिति निपातनदुर्भा
वोनपुंसकत्वं च॥ ह्रस्वो नपुंसके प्रातिपदिकस्येति ह्रस्वं॥ पक्षपातः पक्षपातः॥ आसक्तिविशेषः॥ समस्तुल्यपक्षपातो यस्यां तया समपक्षपातया भक्त्या॥ अनुराग
विशेषेण अनुरागो भक्तिरित्युपदेशः॥ पूज्यं त्र्यायं त्रिवर्गः॥ असक्तमनासक्तमसनिनयतियावत्॥ आराधयतः सेवमानस्यास्य दुर्योधनस्य॥ त्रयाणां

धर्मार्थकामानां गणस्त्रिगणस्त्रिवर्गः॥ त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः समोक्षकैरित्यमरः॥ गुणानुरागाद्गुणवदाश्रयलोभादित्यर्थः॥ सख्यं मैत्री॥ सख्युर्य इति य
प्रत्ययः॥ ईयिवान् इव उपगतवानिवेत्युत्प्रेक्षा॥ उपेयिवाननाश्वाननूचानश्चेति क्वसु प्रत्ययान्तो निपातः॥ नात्रोपसर्गस्तन्त्रमिति काशिकाकार आह स्म॥ पर
स्परं न बाधते॥ समवर्त्तित्वादस्य धर्मार्थकामाः परस्परानुपमर्देन वर्द्धन्त इत्यर्थः॥ उक्तं च॥ धर्मार्थकामाः सममेव सेव्या यो ह्येकसक्तः स जनो जघन्यः इति॥११॥
अथ श्लोकत्रयेणोपायकौशल्यं दर्शयन्नादौ सामदाने दर्शयति॥ निरत्ययमिति॥ तस्य दुर्योधनस्य निरत्ययं निर्बाधं यथा भाविकमित्यर्थः॥ अन्यथा जनानां
दुर्ग्रहत्वादिति भावः॥ उक्तं च॥ लुब्धमर्थेन गृह्णीयात्स्तब्धमञ्जलिकर्मणा॥ मूर्खं छन्दानुवर्त्तनेन तत्त्वार्थेन च पण्डितमिति॥ तथा भूरि प्रभूतं न तु कदाचित्स्वल्प

असक्तमाराधयतो यथायथं विभज्य भक्त्या समपक्षपातया॥ गुणानुरागादिव सख्यमीयिवान्न बाधतेऽस्य त्रिग
णः परस्परं॥११॥ निरत्ययं साम न दानवर्जितं न भूरि दानं विरहय्य सत्क्रियां॥ प्रवर्त्तते तस्य विशेषशालिनी गुणा
नुरोधेन विना न सत्क्रिया॥१२॥

मित्यर्थः॥ दानं धनत्यागः॥ सामसान्त्वोदारार्थवचनं॥ आदरानादरयोः सदसती इति निपातसंज्ञास्
रणात्सत्पूजायां सत्क्रियां विरहय्यापि विहाय॥ ल्यपि लघुपूर्वादित्ययादेशः न प्रवर्त्तते॥ अनादरे दानवैफल्यादिति भावः॥ न चैवं सर्वत्र व्ययेनाविवे
कित्वं कोशहानिश्च स्यादित्याह॥ विशेषशालिनी अतिशययोगिनी सत्क्रिया गुणानुरोधेन गुणानुरागेण विना न प्रवर्त्तते॥ पृथग्विनेत्यादिना तृतीया॥ गुणे
ष्वादरो भूरिदानं चेतीतो न क्वापि कोश इत्यर्थः॥ अत्रोत्तरोत्तरस्य पूर्वपूर्वविशेषणतया स्थापनादेकावल्यलंकारः॥ तदुक्तं काव्यप्रकाशे॥ स्थाप्यतेऽपोह्यते
वापि यथापूर्वं परं परं॥ विशेषणतया वस्तु यत्र सैकावली द्विधेति॥१२॥ रामजी रामजी रामजी राम

दंडप्रकारमाह॥ वसूनीति॥ वशी सद्दुर्योधनो वसूनि धनानि वांछन्न लोभान्नेत्यर्थः॥ निहंतीति शेषः॥ न चापि मन्युना कोपेन च॥ मन्युर्दैन्ये क्रतौ क्रुधीत्यमरः॥ धर्मशा
स्त्रानुसारेण क्रोधलोभवर्जित इति स्मरणादित्यर्थः॥ किंतु निवृत्तकारणेन निवृत्तलोभादिनिमित्तः सन् स्वधर्म इत्येव स्वस्य राज्ञः सतोऽयमायं धर्मोऽयमिदं कर्तव्यमित्य
स्मादेव हेतोरित्यर्थः॥ अदंड्यान् दंडयन् राजा दंड्यांश्चैवाप्यदंडयन्॥ अयशो महदाप्नोति नरकं चैव गच्छतीति स्मरणादिति भावः॥ गुरूपदिष्टेन प्राड्विवाकोपदिष्टेन॥ ध
र्मज्ञं पुरस्कृत्य प्राड्विवाकमते स्थितः॥ समाहितमतिः पश्येद्व्यवहाराननुक्रमात्॥ इति नारदस्मरणात्॥ दंडेन दमनं शासनेत्यर्थः॥ रिपौ सुतेऽपि वा स्थितमिति
शेषः॥ एतेनाप्यस्य समदर्शित्वमुक्तं॥ धर्मविप्लवं धर्मव्यतिक्रमं निहंति निवारयति दुष्ट एवास्य शत्रुः॥ शिष्ट एव बंधुः न तु संबंधिनः पक्षपातोऽस्तीत्यर्थः॥१३॥ संप्र

वसूनि वांछन्न वशी न मन्युना स्वधर्म इत्येव निवृत्तकारणः॥ गुरूपदिष्टेन रिपौ सुतेऽपि वा निहंति दंडेन स धर्मविप्लवम्॥१३॥
विधाय रक्षान्परितः परेतरानशंकिताकारमुपैति शंकितः॥ क्रियापवर्गेष्वनुजीविसात्कृताः कृतज्ञतामस्य वदंति संपदः॥१४॥

तिभेदकौशलं दर्शयति॥ विधायेति॥ स यं कार्यजाताशंकितः॥ अविश्वस्तः॥ स परितः सर्वत्र स्वपुरमंडले परेतरानात्मीयान् वंचकानिति यावत्॥ यद्वा परानित
रयंति भेदेनात्मसात्कुर्वंतीति परेतरास्तान्॥ तत्करोतीति ण्यंतात्कर्मण्यण्प्रत्ययः॥ रक्षतीति रक्षान् रक्षकान् गुप्तिसमर्थानित्यर्थः॥ नंदिग्रहीत्यादिना पचाद्यच्॥ विधाय कृत्वा
नियुज्य॥ अशंकिताकारमुपैति॥ स्वयमपि स्वस्यापि विश्वस्तवदेव व्यवहरन् भिनत्तीत्यर्थः॥ न च तानकृतज्ञानुपलक्षयेति विकुर्वीरन् इत्याह॥ क्रियेति॥ क्रियाप
वर्गेषु कर्मसमाप्तिषु अनुजीविसात्कृताः भृत्याधीनाः कृताः॥ अपवर्गस्यारंभा इत्यर्थः॥ दयेत्याचेति साति प्रत्ययः॥ न तु वाङ्मात्रेणेत्यर्थः॥ संपदोऽस्य राज्ञः कृतज्ञतामु
पकारित्वं वदंति प्रीतिदानैरेवास्य कृतज्ञत्वप्रकाशनेन न तु वाङ्मात्रेणेत्यर्थः॥ कृतराजन्यानुजीवितो रज्यंते स्तु रक्षाश्च नं रक्षंतीति भावः॥ १४॥ रामजी॥

कि॰टी॰
पं॰१
६
6

अथोपायप्रयोगफलवत्तां दर्शयति॥ अनारतमिति॥ तेन राज्ञा पदेषु उपादेयवस्तुषु॥ पदं व्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुष्वित्यमरः॥ सम्यक् असंकीर्णमव्यस्तं विभज्य
विनियोग एव सत्क्रिया अनुग्रहकारका इति पादन॥ लंभिताः स्थानेषु सम्यक् प्रयुक्ता इत्यर्थः॥ उपायाः सामादयः॥ संघर्षं परस्परस्पर्द्धामुपेत्येवेत्युत्प्रेक्षा॥ परिबृंहिता-
यतीः प्रवृद्धोत्तरकालाः स्थिरा इत्यर्थः॥ अर्थसंपदः॥ अनारतमजस्रं फलंति प्रसुवत इत्यर्थः॥१५॥ अर्थसंपदमेवाह॥ अनेकेति॥ अयुग्मछदः सप्तपर्णः प्रसूनस्ये-
गंधस्य गंधो यस्य सो युग्मछदगंधिः॥ सप्तम्युपमानेत्यादिना बहुव्रीहिः उत्तरपदलोपश्च उपमानाच्चेति समासांत इकारः॥ नृपाणामुपायनान्युपहारभूता ये दंति-

अनारतं तेन पदेषु लंभिता विभज्य सम्यग्विनियोगसत्क्रिया॥ फलंत्युपायाः परिबृंहितायतीरुपेत्य संघर्षमिवार्थ-
संपदः॥१५॥ अनेकराजन्यरथाश्वसंकुलं तदीयमास्थाननिकेतनाजिरं॥ नयत्ययुग्मछदगंधिरार्द्रतां भृशं नृ-
पोपायनदन्तिनां मदः॥ १६॥ राम

नस्तेषां मदः॥ उपायनमुपग्राह्यमुपहारस्तथोपदा इत्यमरः॥ राज्ञोपत्यानि पुमांसः राजन्याः क्षत्रियाः राजश्वशुराद्यत् इति यत्प्रत्ययः॥ राज्ञो पत्ये जाति-
ग्रहणात्॥ अराः रथाश्चाश्वाश्च रथाश्वं सेनांगत्वादेकवद्भावः॥ अनेकेषां राजन्यानां रथाश्वेन संकुलं तदीयमास्थाननिकेतनाजिरं सभामंडपां-
गणं॥ भृशमार्द्रतां पंकिलत्वं नयति॥ एतेन महासमृद्धिरुक्ता॥ अत्र एवोदात्तालंकारः॥ तथा चालंकारसूत्रं॥ समृद्धिवद्वर्णनमुदात्त इति॥१६॥

सत्रतिजनपदस्तेमकरत्वमाह॥ सुखेनेति॥ चिराय तस्मिन् दुर्योधने॥ क्षेमं वितन्वति क्षेमं करे सति॥ देवः पर्जन्य एव माता येषां ते देवमातृकाः॥ वृष्ट्यंबुजीविनो देशाः तेन भवं
तीत्यदेवमातृकाः नदीमातृका इत्यर्थः॥ देशो नद्यंबुवृष्ट्यंबुसंपन्नव्रीहिपालितः॥ स्यान्नदीमातृको देवमातृकश्च यथाक्रममित्यमरः॥ एतेनास्य कुल्यादिधूर्त्तप्रवर्त्त
कत्वमुक्तं॥ कुरूणां निवासाः कुरवो जनपदविशेषाः॥ कृष्टेन पच्यंत इति कृष्टपच्याः राजसूयेत्यादिना कर्मकर्त्तरि क्यप् निपातितः॥ तद्विपरीता अकृष्टपच्या
इव कृषिर्येषामस्तीति कृषीवलैः कर्षकैः॥ रजःकृष्यादीत्यादिना वलच् प्रत्ययः॥ वले इति दीर्घः॥ सुखेनाक्लेशेन लभ्याः लब्धुं शक्याः सस्यसंपदो दधतो धने
धारयंतः॥ नाभ्यस्ताच्छतुरिति नुमागमप्रतिषेधः॥ चकासति सर्वोत्कर्षेण वर्त्तन्त इत्यर्थः॥ अदभ्यस्तादिति झेरदादेशः॥ जक्षित्यादयः षडित्यभ्यस्तसंपन्नजनपदत्वात्तदसं

सुखेन लभ्या दधतः कृषीवलैरकृष्टपच्या इव सस्यसंपदः॥ वितन्वति क्षेममदेवमातृकाश्चिराय तस्मिन् कुरवश्चकाशति॥ १७॥
उदारकीर्तेरुदयं दयावतः प्रशांतबाधं दिशतोभिरक्षया॥ स्वयं प्रदुग्धेस्य गुणैरुपस्नुता वसूपमानस्य वसूनि मेदिनी॥ १८॥

तापकरत्वाच्चदुःसाध्यायमिति भावः॥ १७॥ नन्वेवं जनपदानुग्रहिणः कथमर्थलाभः इत्याह॥ उदारेति॥ उदारकीर्त्तेर्महायशसः॥ उदारो दातृमहतोरित्यमरः॥
दयावतः॥ परदुःखप्रहरणेच्छा॥ अत एव प्रशांतबाधं प्रशमितोपद्रवं क्रियाविशेषणमुदयविशेषणं वा॥ दानधर्मेत्यादिना शमिधातोर्णिजन्तान्निष्ठायां निपातनः॥ अति
रक्षया सर्वतस्त्राणेनोदयं वृद्धिं दिशतः संपादयतः॥ वसूपमानस्य कुबेरसदृशस्य वसुर्मयूखाग्निधनाधिपेष्विति विश्वः॥ अस्य दुर्योधनस्य गुणैर्दयादाक्षिण्यादिभिः उ
पस्नुता द्राविता मेदिनी वसूनि धनानि॥ वसुतोये धने मणौ वित्ति वैजयंती॥ स्वयं प्रदुग्धे॥ अक्लेशेन दुग्धेत्यर्थः॥ दुहेः कर्मकर्त्तरि लट्॥ न दुहस्नुनमां यक्चिणाविति

कि॰टी॰
ग्रं॰२
७

तियक्प्रतिषेधः॥यथाकेनचिद्विदुग्धेनैवनवप्रसूतारत्नीचगौः स्वयंप्रदुग्धे॥अक्लेशेनदुह्यत इत्यर्थः॥दुहेकर्मकर्त्तरि लट्॥स्वयंप्रदुग्धे नद्ददितिभावः॥अलंका
रस्तुविशेषणमात्रसाम्यादगमत्वेसमासोक्तिरितिसर्वस्वकारः॥अत्रप्रतीयमानयागवासहप्रकृतामामेदिन्याभेदअभेदलक्षणादिभिरुपरस्तुनाड्वितामेदिनी
वसुरापतिशयोक्तिवशाद्दोग्ध्रत्वेनोक्तिरितिसंक्षेपः॥१८॥वीरानुकूल्यमाह॥महौजसइति॥महौजसो महाबलाः॥अन्यथादुर्बलानामनुपकारित्वादितिभा
वः॥मानःकुलशीलाद्यभिमानएवधनंयेषांतेमानधनाः॥अन्यथाकदाचिद्विहलपर्य्याप्तत्वादिकुर्वीरन्नितिभावः॥धनार्चिता धनसंस्कृताः॥अन्यथादा
रिद्र्यापेन्नयुरितिभावः॥नथासंप्रतिसंग्रामेलब्धकीर्त्तयोलब्धकीर्त्तयस्तेबहुगुणाइत्यर्थः॥अन्यथाकदाचिन्मुह्येयुरितिभावः॥संहता मिथःसंगताः

महौजसोमानधनांधनार्चिताःधनुर्भृतःसंयतिलब्धकीर्त्तयः॥नसंहतास्तस्यनभिन्नवृत्तयःप्रियाणिवांछ
न्त्यसुभिःसमीहितुं॥१९॥

स्वार्थनिष्ठानभवंतीति नभिन्नवृत्तयः पूर्ववत्समासः॥अन्यथास्वामिकार्य्यहानिःस्यादित्युभयत्रापितात्पर्यं धनुर्भृतःधानुष्काः आयुधमात्रोपलक्षणमे
तत्॥प्राधान्याद्धनुग्रहणं॥तस्यदुर्योधनस्यासुभिःप्राणैः प्रियाणि समीहितुं कर्त्तुं वांछंति॥अनर्पणेप्राणान्दातुमिच्छंतीत्यन्यथादोषस्मरणादितिभावः॥
अत्रमहौजसादिपदार्थानां प्राणदान कर्त्तमतांप्रतिविशेषणत्यागहेतुत्वाभिमानात्काव्यलिंगमलंकारः॥लक्षणंतूक्तं॥नथासाभिप्रायविशेषणत्वा
त्परकत्वालंकारइतिद्वयोस्तिलतंडुलवद्विभक्ततयास्फुरणात् संसृष्टिः॥१९॥ रामजी रामजी रामजी॥

स्वराष्ट्रवत्पराराष्ट्रवृत्तांतमपि वेत्तीत्याह ॥ महीभृतामिति ॥ अशेषितक्रियः समापितकृत्यः ॥ आफलोदयकर्मेत्यर्थः ॥ सदुर्योधनः ॥ सच्चरितैः शुद्धचरित्रैरेवं चके
रित्यर्थः ॥ चरंतीति चरैः प्रणिधिभिः प्रचारैश्च ॥ महीभृतां क्रियाः प्रारंभान् निःशेषं वेद वेत्ति ॥ विदोलटोवेत्यणलादेशः ॥ स्वरहस्यं तु न कश्चिद्वेदेत्याह ॥ महोदयैरिति
धातुरिव तस्य दुर्योधनस्य हितमुदयोगाम महोदयैर्महाहृद्धिभिरित्नीयते ज्ञायते फलानुमेयास्तस्य प्रारंभा इत्यर्थः ॥२०॥ मित्रबलमाह ॥ नेति ॥ तेन राज्ञा क्वचित्कुत्रा
पि सहज्यया मौर्व्या सज्यं मौर्वी ज्या शिंजिनी गुण इत्यमरः ॥ तेन सहेति तुल्ययोग इति वहुव्रीहिः ॥ धनुर्नोद्यतं आननं वा कोपविजिह्मं कोपकुटिलं न कृतं ॥ कोप

महीभृतां सच्चरितैश्चरैः क्रियाः स वेद निःशेषमशेषितक्रियः ॥ महोदयैस्तस्य हितानुबंधिभिः प्रतीयते धातुरिवेहि
तं फलैः ॥२०॥ न तेन सज्यं क्वचिदुद्यतं धनुः कृतं न वा कोपविजिह्ममाननं ॥ गुणानुरागेण शिरोभिरुह्यते नराधि
पैर्माल्यमिवास्य शासनं ॥२१॥

एवं नोद्देति कुतस्तस्य युद्धप्रसक्तिरिति भावः ॥ कथं तर्ह्याज्ञां कारयति इत्यत्राह ॥ गुणेति ॥ गुरोर्बुद्ध्या शास्त्रिण्यादिष्वनुरागेण माल्यपक्षे स्त्रवानुबंधे
णेत्यर्थः ॥ अथवा सौरभ्यगुणलोभेन नराधिपैरस्य शासनमाज्ञा मालेव माल्यं दिवष्यञ् ॥ चातुर्वर्ण्यादित्वात्स्वार्थे तीरस्वामी शिरोभिरुह्यते धार्यते ॥
वचिस्वपियजादीनां किति तीति यकि संप्रसारणं ॥ अत्रोपमास्फुटैव ॥२१॥ रामजी रामजी रामजी ॥

कि॰टी॰
पं॰२
८

संप्रत्यस्य धार्मिकत्वमाह॥ सेति॥ इद्धशासनः अप्रतिहताज्ञ इत्यर्थः॥ सदुर्योधनो नवयौवनोद्धतं प्रगल्भं धुरंधरमित्यर्थः॥ दुःखेन शासन इति दुःशासनः तं भाषायां शासियुधी त्यादिना खल्लर्थेयुच् प्रत्ययः॥ यौवराज्ये युवराजकर्मणि॥ ब्रह्मणादित्वात्ष्यञ्॥ निधाय निसृज्येत्यर्थः॥ पुरोधसा पुरोहितेनानुमतोनुज्ञा तस्मिन् याजके सत्यर्थः॥ नदुहितृयनंदोषस्मरणादित्यर्थः॥ निष्ठेति भूतार्थे क्तः॥ ननुगतिबुद्धीत्या दिना वर्तमाने चे अन्यथा पुरोधेत्यत्र क्तस्य च वर्तमान इति षष्ठीस्यात्॥ अखिन्नोनलसः॥ मखेषु क्रतुषु॥ हवेन होमेन॥ हव्यकव्ये देवपित्र्ये इत्यमरः॥ हिरण्यरेतायस्यतं हिरण्यरेतसमग्निं धिनोति प्रीणयति॥ धिनः प्रीणनार्थात् इन्विकृष्योरच्चेत्युप्रत्ययः॥ अकारश्चान्तादेशः॥ २२॥ स चैनावताविरुद्धैर्भावमित्याशंक्याशंदर्शयति॥ प्रलीनेति॥ स सुयोधनः॥ प्रली

सयौवराज्ये नवयौवनोद्धतं निधाय दुःशासनमिद्धशासनः॥ मखेष्वखिन्नोनुमतः पुरोधसा धिनोति हव्येन हिरण्य
रेतसं॥ २२॥ प्रलीनभूपालमपि स्थिरायति प्रशासदावारिधि मंडलं भुवः॥ सचिंतयत्येव भियस्त्वदेष्यतीरहो दुरंता

नभूपालं निःसपत्नमित्यर्थः॥ स्थिरायती चिरस्थायीत्यर्थः॥ भुवो मंडलं आवारिधिभ्यः आवारिधि॥ अङ्मर्यादाभिविध्योरिति समासोव्ययीभावः॥ प्रशासदाज्ञापय
पि॥ पतित्यादयः षडिति अभ्यस्तसंज्ञा नाभ्यस्ताच्छतुरिति नुमागमप्रतिषेधः॥ त्वत्त त्वत्तः एष्यतीरागमिष्यन्ती धातूनामनेकार्थत्वात् उक्तार्थसिद्धिः॥ अथ
वा आङ्पूर्व पाठः॥ एत्येधत्यूठ्स्विति वृद्धिः॥ लटः सद्वेतिसप्रत्ययः॥ उगितश्चेतिङीप्॥ आच्छीनद्योर्नुमिति विकल्पान्नुमभावः॥ भियो भयहेतून् विपद इत्यर्थः॥
चिंतयति आलोचयत्येव स एवाह॥ अहो बलवद्विरोधिता दुरंता दुरवसाना सार्वभौमस्यापि प्रबलैः सह वैरायमाणत्वे सति सोनर्थसाहाय्य पर्यवसाय्य

नामैक देशग्रहणे नाममात्रग्रहणम् ॥ इति न्यायात् अश्व वश्च तयोः तादृश वाह्यौ कौ तयोः अभिधानं यस्मिन् पदे तस्मात् यद्वा कथाप्रसंगतः श्रूयते
जनाश्वं तत्र के पदम् ३॥

नन्व गूढाकारेंगितस्य भयं त्वया कथं निरधारीत्यत आह ॥ कथाप्रसंगेति ॥ कथाप्रसंगेन गोष्ठीवशेन जनैर्लोकैः अन्यत्र विषयेण कथाप्रसंगो वार्त्तायां विषयेऽपि वाच्य
वदिति विश्वः ॥ एकवचनस्यातंत्रत्वाज्जन इति विशेषणं ॥ उदाहृतादुच्चारितान्नवाभिधानात् नामधेयात् स्मारकाद्धेतोः हेतावितिपंचमी ॥ आख्याह्वये अभिधानं च नामधेयं
च नामधेयमित्यमरः ॥ अनुस्मृतः आखंडलसूनुविक्रमः स्मृतार्जुनपराक्रमः सन् ॥ सुदुःसहादिति ॥ दुःसहान्मंत्रपदान्मंत्रशब्दात् स्मारकाद्धेतोः आखंडलसूनुरिंद्रानुज उपेंद्रो विष्णु
रिति यावत् अनुपुत्रेऽनुजेऽरवाविति विश्वः ॥ नस्याविपतीगरुड इत्यर्थः ॥ नस्य क्रमः पदविक्षेपः सोऽनुस्मृतो येन सः तथोक्तः स्मृतः गरुडमहिमा उरग इव नतानननः सन् अथ ते दुः
खायते ॥ पीडा बाधा व्यथा दुःखमित्यमरः ॥ अस्तु कस्माद्भयं दोषादि विकारादुर्वार इति भावः ॥ सर्वत्र जयमन्विच्छेत् पुत्रादिच्छेत्पराजयमिति न्यायादर्जुनोत्कर्षकथनं युधिष्ठिरस्य भूष

कथाप्रसंगेन जनैरुदाहृतादनुस्मृताखंडलसूनुविक्रमः ॥ तवाभिधानाद्व्यथते नताननः सुदुःसहान्मंत्रपदादिवोरगः ॥ २४ ॥

नराधिप कर्तुं त्वयि जिह्मतां गते विधीयतां तत्र विधेयमुत्तरं ॥ परप्रणीतानि वचांसि चिन्वतां प्रवृत्तिसाराः खलु मादृशां धियः ॥ २५ ॥

णमेवेति सर्वमवृदात्ते अवधानं ॥ २४ ॥ तदेति ॥ तत्तस्मात्त्वयि जिह्मं कपटं कर्तुं उद्यते त्वां जिघांसतीत्यर्थः ॥ तत्रास्मिन् दुर्योधने विधेयं कर्तव्यं उत्तरं प्रतिक्रि
या आशु विधीयतां क्रियतां ॥ ननु कर्तव्यमिति त्वयैवोच्यतामित्यर्थः ॥ गिरः प्रवृत्ति वृत्तांत इत्यमरः ॥ वार्त्तामात्रावदिनो वयं ॥ तेपेत्याह ॥ परेति ॥ परप्रणी
तानि परैराज्ञानि वचांसि चिन्वतां गृह्णतां ॥ मादृशां वार्त्ताहारिणामित्यर्थः ॥ तत्र नास्मिन् दुर्योधने गिरः प्रवृत्ति वृत्तांत इत्यमरः ॥ वार्त्तामात्रावदिनो वयं ॥ ननु
कर्तव्यार्थोपदेश समर्था । अतस्त्वयैव निर्धार्य्य कार्य्यं निमित्तविशेषसमर्पणाद्दर्थान्तरन्यासः ॥ २५ ॥ रामजी रामजी ॥

उरगः पन्नगो भोगी इत्यमरः ॥ ११

पाठं वा गिरः इत्यपि पाठः

कि॰टी॰
टं॰१
९

इतीति ॥ इतीति वनसंनिवासिनां पत्यौ वनेचराधिपे इति गिरमीरयित्वा उक्त्वा ॥ आत्तसत्क्रिये ॥ गृहीतपारितोषिके गते सति तुष्टिदानमेव चाराणां वेतनं ते हि तल्लोभात्स्वामिकार्ये प्रतीव त्वरयंति इति वाक्यामृतात् ॥ अथ महीभुजा राज्ञा ॥ कृष्णा सदनं द्रौपदी भवनं प्रविश्य ॥ अनुजसंनिधौ नकुलादीनां सन्निधौ वचः आचचक्षे ॥ आख्याति ॥ अथवा कृष्णे ति पदच्छेदः ॥ सदनं प्रविश्यानुजसंनिधौ तद्वचः कृष्णा आचचक्षे ॥ आख्याते ॥ विसिद्धेद्दुहादेर्द्विकर्मकत्वादप्रधाने कर्मणि लिट् ॥ २६ ॥ निशम्येति ॥ अथ द्रुपदात्मजा द्रौपदी द्विषतां सिद्धिं वृद्धिरूपां निशम्य ॥ ततो द्विषद्भ्यः आगता ततस्त्याः ॥ अव्ययात्त्यप् ॥ अपाकृती निराकारान् विनियंतुं निरोद्धुमक्षमा असती नृपस्य युधिष्ठिरस्य

इतीरयित्वा गिरमात्तसत्क्रिये गतेथ पत्यौ वनसन्निवासिनां ॥ प्रविश्य कृष्णा सदनं महीभुजा तदाचचक्षेनुजसन्निधौ वचः ॥ २६ ॥
निशम्य सिद्धिं द्विषतामपाकृतीस्ततस्ततस्त्या विनयंतुमक्षमा ॥ नृपस्य मन्युव्यवसायदीपिनीरुदाजहार द्रुपदात्मजा गिरः ॥ २७ ॥
भवादृशेषु प्रमदाजनोदितं भवत्यधिक्षेप इवानुशासनं ॥ तथापि वक्तुं व्यवसाययन्ति मां निरस्तनारीसमया दुराधयः ॥ २८ ॥

मन्युव्यवसाययोः क्रोधोद्योगयोर्दीपिनीं संवर्द्धिनीं गिरो वाक्यान्युदाजहार जगाद ॥ २७ ॥ भवादृशेष्विति ॥ भवादृशाः भवद्विधाः पंडिताः इत्यर्थः ॥ तेषु विषये त्यादिनाकञ् आ सर्वनाम्न इत्याकारादेशः ॥ प्रमदाजनोदितं स्त्रीजनोक्तं वदेः क्तः ॥ वचिस्वपीत्यादिना संप्रसारणं ॥ अनुशासनं नियोगवचनमधिक्षेप स्तिरस्कार इव भवति ॥ अतोऽनायुक्तमित्यर्थः ॥ तथापि वक्तुमन्युचेतेपि निरस्तनारीसमयाः ॥ त्याज्या शालीनता रूपस्त्रीसमाचारा समया ॥ सपथाचार कालसिद्धांतसंविद इत्यमरः ॥ दुराधयः समयोल्लंघनाहेतुत्वाद्दुष्टा मनोव्यथा ॥ पुंस्याधिर्मानसी व्यथा इत्यमरः ॥ मां वक्तुं व्यवसाययंति प्रेरयंति न किंचिदयु

अखंडमिति॥ आखंडलतुल्यधामभिः इंद्रपराक्रमैः॥ स्ववंशजैः॥ भूपतिभिर्भरतादिभिः॥ चिरमखंडमविछिन्नं धृता मही त्वया मदंध्यातिमदच्युत किंचु तेन मदस्राविणा गजेन
स्वगिवात्महस्तेन स्वकरेण सचापलेनेत्यर्थः॥ अपवर्जिता प्रहृता त्यक्तोवाद्ध्वायमनर्थागम इत्यर्थः॥२७॥ व्रजंतीति॥ मूढाधियो निर्धियो निर्विवेकबुद्धयः ते पराभवं व्र
जंति॥ ये मायाविषु मायावत्सु विषये॥ अस्मायेत्यादिना विनिप्रत्ययः॥ मायिनो मायावंतः॥ व्रीह्यादित्वादिनिः प्रत्ययः॥ न भवंति॥ अत्रैवार्थः॥ तरं प्रसति
प्रविशेपति॥ शठाः अपकारिणः धूर्तास्तथाविधान् अकुटिलान् संवृतांगानवर्मितांश्च शरीराणि निशिता इषवः प्रविश्य प्रवेशं कृत्वा घ्नंति हि कुटिलेषु नतीति रि

अखंडमाखण्डलतुल्यधामभिश्चिरं धृता भूपतिभिः स्ववंशजैः॥ त्वया स्वहस्तेन मही मदच्युता मतंगजेन स्रगिवापव
र्जिता॥२८॥ व्रजंति ते मूढधियः पराभवं भवंति मायाविषु ये न मायिनः॥ प्रविश्य हि घ्नंति शठास्तथाविधानसंवृतांगा
न्निशिता इवेषवः॥२९॥ गुणानुरक्तामनुरक्तसाधनः कुलाभिमानी कुलजां नराधिपः॥ परैस्त्वदन्यः क इवापहारयेन्म

तिभावः॥२९॥ गुणानुरक्तेति॥ न च लक्ष्मीचापल्याद्यमनर्थः॥ दोषे तादेशमूलत्वादित्याशयेनाह॥ गुणेति॥ अनुरक्तसाधन अनुकूलसाहायवान्॥ उक्तंचकामं
दके॥ उद्योगात्स्वनृत्तस्य सुसहायस्य धीमतः॥ छायेवानुगतानस्य नित्यं श्रीः सहचारिणीति॥ कुलाभिमानी क्षत्रियत्वाभिमानी च॥ त्वदन्यः त्वत्तोन्यः॥ अन्यारादित्या
दिना पंचमी॥ को नराधिपः॥ गुणैः संध्यादिभिः सौंदर्यादिभिश्च॥ अनुरक्तां सानुरागिणीं॥ कुलजां कुलक्रमादागतां कुलीनां च मनोरमां मनोहरां सुंदरीं श्रियं
लक्ष्मीं॥ आत्मवधूं स्वभार्यामिव॥ वधूर्जाया स्नुषा स्त्री चेत्यमरः॥ परैः शत्रुभिः अपहारयेत॥ स्वयमेवापहारं कारयेदित्यर्थः॥ कलत्रापहारवल्लोकमपहारोपि
राजा नराधिपेन माने हार्य कत्वाद्दनुपेक्षणीय इति भावः॥ ३१॥

कि॰टी॰
दं॰१
९॰
10

अथ द्वाभ्यां श्लोकाभ्यां कोपोद्दीपनं करोति ॥ भवंतमिति ॥ हे नरदेव नरेंद्र ॥ नर्हि इदानीं अस्मिन्नापत्काले इत्यर्थः ॥ एतर्हि संप्रति इदानीं अधुना सांप्रतं तथेत्यम
रः ॥ इदमो र्हिल् प्रत्ययः ॥ एतेतौ रथोरित्येतादेशः ॥ आपदमेवाह ॥ मनस्विगर्हिते श्रेष्ठजनजुगुप्सिते वर्त्मनि मार्गे निवर्त्तमानं शत्रुकृतां दुर्दशामनुभवंतमुदी
रत उद्दीपनो मन्युः क्रोधः ॥ शुष्कं नीरसं ॥ शुष्कः कः इति निष्ठातकारस्य ककारः ॥ समीचासौ नरुश्चेति विशेषणसमासः ॥ समीग्रहणं शीघ्रज्वलनस्वभावात्
कृतं उच्छिष उद्भवति ज्वालः ॥ घृणिज्वाले अपि शिप इत्यमरः ॥ वह्निरिवकथं न ज्वलयितुमुचित इत्यर्थः ॥ मितां ह्रस्वः इति ह्रस्वम् ॥ ३२ ॥ नन्वंतःशत्रुत्वा

भवंतमेतर्हि मनस्विगर्हिते विवर्त्तमानं नरदेव वर्त्मनि ॥ कथं न मन्युर्ज्वलयत्युदीरितः समीतरुं शुष्कमिवाग्निरुच्छि
खः ॥ ३२ ॥ अवंध्यकोपस्य निहंतुरापदां भवंति वश्याः स्वयमेव देहिनः ॥ अमर्षशून्येन जनस्य जंतुना न जातहार्देन न चे
विद्विषादरः ॥ ३३ ॥

त्वं क्रोधसाध्य एवेत्याशंक्याह ॥ अवंध्येति ॥ अवंध्यकोपस्य एव च आपदां विहंतुः ॥ निग्रहानुग्रहसमर्थस्येत्यर्थः ॥ पुंस इति शेषः ॥ देहिनो जंतवः स्वयमे
व वश्या वशंगता भवंति ॥ वशंगते इति यत्प्रत्ययः ॥ अतः कोपिना भवितव्यमित्यर्थः ॥ व्यतिरेके त्वानिष्टमाचष्टे ॥ अमर्षशून्येन निष्कोपेन जंतुना
कन्यया शोक इति चेत ॥ हेत्वावित्तिस्तृतीया ॥ हृदयस्य कर्म हार्दं स्नेह प्रेमा ना प्रियता हार्दं प्रेम स्नेहोथ इत्यमरः ॥ युवादित्वादण्प्रत्ययः हलेषप
दएला सोधितिहृदादेशः ॥ जातहार्देन जातस्नेहेन सता सज्जनस्य आदरो द्विषा द्विषता च आदरोन ॥ अमर्षहीनस्य रागद्वेषाव किंचित्करत्वादनवेक्षणीय
त्यर्थः ॥ अथवा विद्विषा सता दरो भयं येन ॥ दरोस्त्रियां भये श्वभ्रे इत्यमरः ॥ एतस्मिन्नेव प्रयोगे दर इति पदच्छेदः पुंवाक्ये पुनर्दोषः ॥ अतः स्थाने कोपः कार्यः त्या

[illegible]

परिभ्रमन्निति॥ लोहितचंदनोचितः उचितलोहितचंदनः॥ वाहिताग्न्यादिष्विति साधुः॥ अभ्यस्तरक्तचंदन इत्यर्थः॥ अभ्यस्तेप्युचितं न्याय्यमिति यादवः॥ महारथो
रथचारी उभयत्रापि प्रागिति शेषः॥ अधुना रेणुरूषितो धूलिः धूसरितः॥ पदाभ्यां अतति गच्छति इति पदातिः पादचारी॥ अजपतिभ्यां चेत्यनुवृत्त्या पादे चेत्यौणा
दिक इण् प्रत्ययः॥ पादस्य पदाज्यातिगोपहतेष्विति पदादेशः॥ गिरिषु अंतः अंतर्गिरि विभक्त्यर्थे अव्ययीभावः॥ गिरेश्च सेनकस्येति विकल्पात् समासांता
भावः॥ परिभ्रमन्नयं वृकोदरो भीमः॥ सत्पथनस्येति सोल्लुंठनवचनं अथापि सत्यमेव रक्षस्व ननु भ्रातॄन् इति भावः॥ नवेति शेषः॥ मानसं दुनोति कच्चि

परिभ्रमंल्लोहितचन्दनोचितः पदातिरंतर्गिरिरेणुरूषितः॥ महारथः सत्पथनस्य मानसं दुनोति नो कच्चिदयं वृकोदरः॥३४॥
विजित्य यः प्राज्यमयच्छदुत्तरान्कुरूनकुप्यं वसु वासवोपमः॥ सवल्कवासांसि तवाधुना हरन्करोति मन्युं न कथं धनञ्जयः॥३५॥

त्परितापयति किं कच्चित्कामप्रवेदन इत्यमरः॥ स्वाभिप्रायः दुष्करणां कामप्रवेदनं॥३४॥ विजित्येति॥ वासवउपमानं सया
सवोपमः॥ सवल्कवासांसि तवाधुना हरन् इंद्रतुल्यो धनंजयः उत्तरान्कुरून् मेरूत्तरमानुष्यान् देशविशेषान् विजित्य प्राज्यं प्रभूतं प्रचुरं प्राज्यमित्यमरः
कुप्यादन्यत् कुप्यं हेमरूप्यात्मकं स्यात् कोशः हिरण्यं च हेमरूप्ये कृताकृते ताभ्यां यदन्यत्तत्कुप्यमित्यमरः॥ वसु धनमयच्छत् दत्तवान्॥ पाघ्रेत्यादिना दाणो य
च्छादेशः॥ धनं जयतीति धनंजयोऽर्जुनः॥ संज्ञायां भृतवृजीत्यादिना खच्प्रत्ययः॥ अरुर्द्विषदित्यादिना मुमागमः॥ अधुना अस्मिन्काले अधुनेति निपातना॥ सा

कि॰टी॰
घं॰१
११

दन्तांतेति॥ वनांतो वनभूमिरेव शय्या तया कठिनी कृताकृती कठिनीकृतदेहौ॥ आकारो देह आकृतिरिति वैजयंती॥ विष्वक् समंतात्॥ समंततस्तु परितः सर्वतो विष्वगित्यपि इत्यमरः॥ कचाचितौ चितौ कचयोः॥ विशीर्णकेशावित्यर्थः॥ अत एव गजौ गिरिसंभवौ॥ गजाविव स्थितौ एतौ यमौ युग्मजातौ माद्रीपुत्रौ वित्यर्थः॥ यमो दंडधरे ध्वांक्षे स्वयमेव गलेपि चेति विश्वः॥ विलोकयस्त्वं कथं धृतिसंयमौ॥ संतोषनियमौ॥ धृतिर्योगांतरे धैर्ये ध्वरणाध्वरतुष्टिषु इति विश्वः॥ बाधितुं नोत्सहसे न प्रवर्त्तसे॥ शक्धृषेत्या दिना तुमुन्॥ अहो तेन महद्धैर्यमिति भावः॥३६॥ इमेति॥ अथ राज्ञो दुर्दशां दर्शयितुमुपोद्घातमाह॥ प्रकृतमर्थं वर्णयितुमर्थांतरवर्णनमुपोद्घातः॥ इमां वर्त्तमानां॥ न

वनांतशय्याकठिनीकृताकृती कचाचितौ विष्वगिवागजौ गजौ॥ कथं त्वमेतौ धृतिसंयमौ यमौ विलोकयन्नुत्सहसे न बाधितुं॥३६॥
इमामहं वेद न तावकीं धियं विचित्ररूपाः खलु चित्तवृत्तयः॥ विचिंतयंत्या भवदापदं परां रुजंति चेतः प्रसभं ममाधयः॥३७॥

न वेद्मि तावकीं त्वदीयां न स्वद्रमित्यण्प्रत्ययः॥ नवकममकाचेकवचनमिति तवकादेशः॥ धियं त्वदापद्विषयां चित्तवृत्तिमहं न वेद कीदृशी न वेद्मि॥ परबुद्धेरप्रत्यक्षत्वा दिति भावः॥ विदेल्लटो वेति लटो णलादेशः॥ न चात्मदृष्टांतेन तापन्नत्वात्॥ दुःखित्वमनुमापयितुं शक्यते॥ धीरादिषु अनैकांतकत्वादित्याशयेनाह॥ चित्तवृत्तयो विचित्ररूपाः॥ धीरादिरनेकप्रकाशाः॥ खलु किंतु परामुत्कृष्टां भवदापदं विचिंतयंत्या॥ मम चेतश्चित्तं॥ आधयो मनःपीडाः॥ उपसर्गे घोः किः प्रत्ययः॥ प्रसभं प्रसह्य॥ रु जंति भजंति॥ रुजो भंग इति धातोर्लट्॥ पश्यतामपि दुःसहा दुःखजननी॥ त्वद्विपद् इति रनुभवितारं त्वां न विकारीति महच्चित्तमित्यर्थः॥ चेत इति रुजार्थानां भा ववचनानां अज्वर इति षष्ठी न भवति॥ तत्र शेषाधिकारात् शेषस्य वैवक्षिकत्वादिति॥३७॥ रामजी रामजी राम

नदामेवम्लोकत्रयेणाह ॥ पुरेति ॥ यस्त्वं महाधनं बहुमूल्यं श्रेष्ठमित्यर्थः ॥ महामूल्ये इति विश्वः शयनं शय्यामधिरूढः सन् ॥ स्तुतियो गीतप्रधाना एवं मंगलानितैः क
रणभूतैः ॥ परा विबुध्यसे ॥ वैतालिकैरितिशेषः ॥ पूर्वं विबोधित इत्यर्थः ॥ पुरि लिङ्‌चेति भूतार्थे लट् ॥ सत्वं ॥ अदभ्रदर्भा बहुकुशां ॥ अस्त्री कुशं कुशो दर्भ अदभ्रं बहु
लं बहु इत्यमरः ॥ स्थलीमकृत्रिमाभूमिं जनपदेत्यादिना अकृत्रिमार्थे ङीप् ॥ एतेन दुःसहस्पर्शत्वमुक्तं ॥ अधिशीङ्स्थासां कर्मेति कर्मत्वं ॥ अधिशय्य शयित्वा ॥
अयङ् मिङ्‌तीति अयङादेशः ॥ अशिवैरमंगलैः ॥ शिवारुतैः ॥ क्रोष्टुवाशितैः ॥ शिवा हस्तकी क्रोष्टुशमनी यामलक्युमेति वैजयन्ती ॥ निद्रां जहासि अये

पुराधिरूढः शयनं महाधनं विबोध्यसे यः स्तुतिगीतमंगलैः ॥ अदभ्रदर्भामधिशय्य स स्थलीं जहासि निद्रामशिवैः शि
वारुतैः ॥ ३८ ॥ अनारतं यो मणिपीठशायिनावरंजयद्राजशिरःस्रजां रजः ॥ निषीदतुस्तौ चरणौ वनेषु ते मृगद्विजा
लूनशिखेषु बर्हिषां ॥ ३९ ॥ पुरोपनीतं नृप रामणीयकं द्विजातिशेषेण यदेतदंधसा ॥

तिशेषः ॥ ३८ ॥ अनारतमिति ॥ अनारतमजस्रं ॥ मणिपीठशायिनौ चरणौ राजशिरः नमद्भूपालमौलिस्रजां रजः ॥ परागो रंजयांतौ तेचरणौ मृगैर्द्विजै
श्च तपस्विभिः तपोवद्भिः रालूनशिखेषु द्विजयेषु बर्हिषां मयूराणां बर्हिः कुशहुताशयो रिति विश्वः ॥ वनेषु निषीदतः तिष्ठतः इति ॥ ३९ ॥ पुरेति ॥ हे
नृप यदेतत्पुरोवर्त्ति वपुर्द्विजातिशेषेण द्विजभुक्तावशिष्टेनांधसान्नेनभिः ॥ सा त्वाभक्तमन्धोन्नमित्यमरः ॥ रमणीयस्य भावः रामणीयकं ॥ मनोहरत्वमु
पनीतं प्रापितं ॥ नयतेर्द्विकर्मकत्वात् प्रधाने कर्मणि क्तः ॥ प्रधानकर्मण्याख्येयेलादीनां वक्तृद्धिकर्मणा इति वचनात् ॥ अद्य वन्यफलाशिनस्तेतव ॥ तद

पुर्यशसा समं परिमितमात्रं कार्श्यं परैति प्राप्नोति उपमपि क्षायते इत्यर्थः॥ अत्र सहोक्तिरलंकारः॥ तदुक्तं काव्यप्रकाशे॥ सहसोक्तिः सहार्थस्य बलादेकार्थवाचिक
मिति॥४॥ ननु सर्वप्राणिसाधारणाभयादिकापरिवेदनेत्यत्राह॥ द्विषदिति॥ यद्यतः कारणादियं दशा अवस्था॥ दशावार्भावस्थायामितिविश्वः॥ द्विषतां
निमित्तं यस्याः सा द्विषो मित्र इतिशतृप्रत्ययः॥ अतो मे मनः समूलं साशयं मुन्मूलयतीव उत्पाटयतीव देविकी आपत्तदुःखायेत्याह॥ परैरिति॥ परैः शत्रु
भिः अपर्यासिता अपर्य्यवर्त्तिता वीर्य्यसंपद्येषां मानिनां पराभवो विपदुत्सवः॥ एवेति वैधर्म्येणार्थान्तरन्यासः॥ मानहानिर्दुःसहत्वादिति भावः॥४१॥

नद्यतेवन्यफलाशिनः परं परैति कार्श्यं यशसा समं वपुः॥४०॥ द्विषं निमित्ता यदियं दशा ततः समूलमुन्मूलयतीव
मे मनः॥ परैरपर्यासितवीर्य्यसंपदां पराभवोप्युत्सव एव मानिनाम्॥४१॥ विहाय शान्तिं नृप धाम तत्पुनः प्रसीद
संधेहि वधाय विद्विषां॥ व्रजंति शत्रूनवधूय निःस्पृहाः समेन सिद्धिं मुनयो न भूभृतः॥४२॥ यमजौ॥

विहायेति॥ हे नृप शान्तिं विहाय तत्प्रसिद्धं धाम तेजो विद्विषां वधाय पुनः संधेहि॥ अंगीकुर्वित्यर्थः॥ प्रसीद प्रार्थनायां लोट्॥ शमेन कार्यसिद्धौ किं॥ क्रो
धेनेत्याह॥ व्रजंतीति॥ निःस्पृहा मुनयः शत्रूनवधूय निर्जित्य समेन सिद्धिं व्रजंति॥ भूभृतस्तु न केवल्यकार्य्यवद्राजकार्य्ये न शान्तिसाध्यमित्यर्थः॥४२॥
पुरःसर इति॥ किंच धामवतां तेजस्विनां॥ परनिकारासहिष्णुनामित्यर्थः॥ पुरःसरंतीति पुरःसरा अग्रेसराः॥ पुरो अग्रेषु सर्त्तेरित्यप्रत्ययः॥ यशोधनाः
भवादृशाः॥ सुदुःसहमीदृशमुक्तप्रकारं प्राप्य रतिं संतोषमाधिकुर्वते चेत्॥ हंत इति खेदे॥ मनस्विता अभिमानिता॥ निराश्रया सती हता तेजस्विनैक

धारणत्वान्मनस्विताया इत्यर्थः॥ अतः पराक्रमितव्यमिति भावः॥ यद्यप्यत्र प्रसहनस्यासंगतेरधिश्रयीकरोतेः अथः प्रसहनश्चात्मनेपदं न भवति॥ प्रसहनपराभव इति काशिका॥ तथाप्यास्माः कर्त्रभिप्रायविवक्षया एव प्रयोजनत्वात्कर्त्रभिप्राये स्वरितञित इत्यात्मनेपदं प्रसिद्धं॥ ४३॥ अथेति॥ अथेति पक्षांतरे निरस्तविक्रमः सन्॥ चिरायपर्येषि॥ सुखस्य साधनं विहाय लक्ष्मीपति लक्ष्मकार्मुकं जटाधरः सन् जुहुधीह पावकं॥ चिरकालेनापि क्षमां शांतिं॥ वहतीति क्षांत्या क्षेमापि चेन्मम ॥ सुखस्य साधनं पर्येषि॥ अवगच्छसि॥ तर्हि लक्ष्मीपति लक्ष्म राजचिह्नं कार्मुकं॥ विहाय त्यक्त्वा॥ धरतीति धरः पचाद्यच् जटानां धरो जटाधरः सन् इह वनेपा

पुरःसरा धामवतां यशोधनाः सुदुःसहं प्राप्य निकारमीदृशं॥ भवादृशाश्चेदधिकुर्वते रतिं निराश्रया हंत हता मनस्विता॥ ४३॥ अथ क्षमामेव निरस्तविक्रमश्चिराय पर्येषि सुखस्य साधनं॥ विहाय लक्ष्मीपतिलक्ष्मकार्मुकं जटाधरः सन जुहुधीह पावकं॥ ४४॥ न समयपरिरक्षणं क्षमं ते निकृतिपरेषु परेषु भूरिधाम्नः॥

वकं जुहुधि॥ पावकेग्नौ होमं कुर्वित्यर्थः॥ अधिकरणे कर्मत्वोपचारः॥ विरक्तस्य किं धनुषेत्यर्थः॥ हुझल्भ्यो हेर्धिरिति धिः॥ ४४॥ अथ समयोल्लंघना द्बिभेषि तदपि न किंचिदित्याह॥ न समयेति॥ परेषु शत्रुषु निःकृतिपरं प्रधानं येषु तेषां तेपकारतत्परेषु सत्सु॥ भूरिधाम्नो महौजसः प्रतीकारसमर्थस्येत्यर्थः॥ तेन व सपथस्त्रयोदशवत्सरान्वनेनेव वस्यामीत्येवं येषु तेषां कोपकार रूपा संवित्॥ समयाः शपथाचारकालसिद्धांतसंविदः इत्यमरः॥ तस्य परिरक्षणं प्रतीक्ष णं न क्षमं न युक्तं॥ तमे सत्वहितेति विष्वित्यमरः॥ हियस्मा हि जयार्थिनो विजिगीषवः॥ क्षितीशाः॥ अरिषु विषये सोपधि सकपटं यथा तथा॥ कपटो स्त्री व्याज

कि॰टी
हं॰स॰१
२३
13

इंधोपधयः॥ छद्मकैतवइत्यमरः॥ संधिदूषणानि विदधति॥ केनचिद्व्याजेन दोषमापाद्य संधिं दूषयति विघटयंतीत्यर्थः॥ शक्तस्य हि विजिगीषोः सर्वथा कार्यसाधनं अन्यत्समपरतमा दिकमशक्येतिभावः॥ अर्थांतरन्यासोलंकारः॥ पुष्पिताग्रावृत्तं॥ ४५॥ विधिरिति॥ विधिर्दैवं विधिर्विधाने दैवेपीत्यमरः॥ समयः कालस्तेपानि योगात्रियमनाद्धेतोः तेयेदु रतिक्रमादितिभावः॥ अगाधेदुस्तरे॥ आपन्नपयोधिरिवेत्यपयमितिसमासः॥ दिनकृतमिवेति वक्ष्यमाणानुसारात्॥ तस्मिन्नापत्पयोधौमग्नं सत्येहि सायंसागरे मज्जति परेद्युरुन्मज्जतीत्यागमः॥ दीप्तिः प्रतापः ध्यानपक्षेतस्याः संहारेण जिह्मं अप्रसन्नं॥ शिथिलवसुं शिथिलं धनं॥ अन्यत्र शिथिलरश्मिं वसुकृदेन्नो रक्तेसौवसुनायेयेधने मरीचौविति वैजयंती॥ शिथिलबलमिति पाठेत्वभयत्रापि शिथिलशक्तिमित्यर्थः॥ अथ परिपुतिमिरमिवचनयुतिमिरमुद्धस्य निरस्यो दीयमानमुपनंदीडु गना विति धान्नोर्ध्ववारिकान्कर्त्तरि शानच्॥॥ दिनादौ दिनकृतमिवलक्ष्मीर्भूयः समभ्येतु भजतु॥ आशिषि लिङ्लोटा विति लोट्॥ चमत्कारित्व

धारिषु हि विजयार्थिनः क्षितीशा विदधति सोपधि संधिदूषणानि॥ ४५॥ विधिसमयनियोगाद्दीप्तिसंहारजिह्मं शि थिलबलमगाधेमग्नमापत्पयोधौ॥ रिपुतिमिरमुदस्योदीयमानं दिनादौ दिनकृतमिवलक्ष्मीस्त्वां समभ्येतु भूयः॥

पामंगलाचरणत्वयनया सर्गांत्यश्लोकेषुलक्ष्मीशब्दप्रयोगः भगवान्भाष्यकारः॥ मंगलादीनि मंगलमध्यानि मंगलांतानि शास्त्राणि प्रार्थंते॥ वीरपु रुषाण्यायुष्मत्पुरुषाणि च भवंति॥ अध्येतारश्च प्रवक्तारो भवंति पूर्णायमेवं॥ मालनीवृत्तं॥ संगतित्वाद्वृत्तभेदः॥ यथाह दंडी॥ सर्गैरनति विस्तीर्णैः श्रा व्यवृत्तैः सुधीरितं सर्वत्रभिन्नसर्गांतैरुपेतं लोकरंजनमिति॥ अथ कविः॥ कविः काव्यवर्णनमाख्यानपूर्वकं सर्गपरिसमाप्तिं कथयति॥ इति शब्दः परिसमाप्तौ॥ भारती कृतश्रुतिकविनामकथनं॥ प्रथमः सर्गः समाप्त इति शेषः॥ एवमुत्तरत्रापि द्रष्टव्यं॥ किरातार्जुनावधि कृत्य कृतो ग्रंथः॥

कि टी
टं० स१
१४
14

किरातार्जुनीयं शिशुपालवधमसभहं हैड्ड जनादिभ्यश्छः इति छः आच्छ: प्रत्ययः राघवपांडवीयमितिवत्॥ यथा ह्यर्जुन एवात्र नायकः किरातस्तु तदुत्कर्षा
य प्रतिभटतया वर्णितः॥ यथाह दंडी॥ वंशवीर्यश्रुतादीनि वर्णयित्वा रिपोरपि॥ तज्जयान्नायकोत्कर्षकथनं च धिनोति नः॥ इति॥ यथायं

इति श्रीकिरातार्जुनीये महाकाव्ये भारवीकृते लक्ष्म्यंके किरातद्रौपदीवचनवर्णनं नाम प्र
थमः सर्गः॥१॥

संग्रहः॥ नेतामध्यमपांडवो भगवतो नारायणस्य प्रभुस्तस्योत्कर्षकृते नुवर्ण्यते नित्यादिव्यः किरातः पुनः॥ शृंगारादिरसोयमत्र वि
जयी वीरः प्रधानं रसः॥ शैलेयानि च वर्णितानि बहुशो दिव्यास्त्रलाभः फलं भवतीत्यर्थः॥४६॥ इति श्रीमहामहोपाध्यायकोलाचल
मल्लिनाथविरचितायां किरातार्जुनीयकाव्यव्याख्यायां घंटापथसमाख्यायां प्रथमः सर्गः समाप्तिमगमत्॥१॥ रामजी
संवत् १९२६ आश्विनशुक्लविजयदशम्यां लिखितं गिरधारीणा स्वार्थं वा परार्थं॥

सर्वाणि पत्राणि चतुर्दशानि

सटिक किरातस्य द्वितीयः सर्गः पत्रसंख्या १४

२

ओं श्रीगणेशाय नमः ॥ विहितामिति ॥ अथ वृकोदरो भीमः ॥ प्रियया द्रौपद्या प्रियार्थहरणमस्याहितोपदेशानानर्थसूचनार्थं विहितामभिहितामित्यर्थः ॥ विपूर्वो दधाते
र्द्धानोः क्रियासामान्यवाचित्वेनोपयोगपविशेषेऽपि वर्तमानत्वात् मनःप्रियामभिमतार्थयोगात् मनोहरां विशेषणद्वयेनापि गिरो ग्राह्यत्वमुक्तं ॥ गिरं गरीयसीं सारवत्तरां ॥ नि
श्चित्य नृपं धर्मराजं ॥ उपपत्तिमत् युक्तियुक्तं ॥ ऊर्जिताश्रयं उदारार्थं वचनमूचे उक्तवान् ॥ कर्त्तरि लिट् ॥ ब्रुवो वचिरादेशः ॥ ब्रुविशासीत्यादिना द्विकर्मकत्वं ॥ अकथितं
चेति नृपस्य कर्मत्वं किं तद्वचनं तदाह ॥ २ ॥ यदिति ॥ मानिनी तु क्षत्रियकुलाभिमानवती द्रौपदी ॥ स्नेहमयेन ॥ स्नेहप्रचुरेण ॥ तत्प्रकृतवचने मयट् ॥ चक्षुषा ज्ञानचक्षुषा ॥

विहितां प्रियया मनःप्रियामथ निश्चित्य गिरं गरीयसीं ॥ उपपत्तिमदूर्जिताश्रयं नृपमूचे वचनं वृकोदरः ॥ १ ॥ यदवोचदवेक्ष्यमा
निनी परितः स्नेहमयेन चक्षुषा ॥ अपि वागधिपस्य दुर्वचं वचनं तद्विदधीत विस्मयम् ॥ २ ॥

एतेनाप्तत्वमुक्तं ॥ परितोऽवेक्ष्य समंततो विविच्य ॥ यद्वचनं अवोचत् ॥ ब्रुवो वचेर्वा लुङ् ॥ वचेरुमित्युमागमः ॥ वागधिपस्य बृहस्पतेरपि दुर्वचं ॥ वक्तुमशक्यं ॥ शेषषष्ठीयं
न कृद्योगलक्षणा ॥ अतो न लोकेत्यादिना षष्ठीप्रतिषेधो नास्ति ॥ तद्वचनं विस्मयं विदधीत ॥ सर्वस्यापीति शेषः ॥ अथवा वागधिपस्यापि विस्मयं विदधीते
ति संबंधः ॥ दुर्वचं केनापीति शेषः ॥ पुंस्त्रैणामपि शास्त्रं अनुरुद्धि हितं चानुवभाति ॥ अतो विस्मयकरं ग्राह्यं चैतद्वचनमिति तात्पर्यार्थः ॥ २ ॥ विस्मयकर
त्वे हेतुमाह ॥ विषमेति ॥ विषमोऽपि दुर्बोधोऽपि ॥ अन्यत्र दुःप्रवेशोऽपि ॥ नयो नीतिशास्त्रं ॥ पयसामाशयो ह्रद इव ॥ कृततीर्थः ॥ कृताभ्यासादुपायस्तत्र ॥ तीर्थेषा

येनो नौजलावतारेषु मंत्र्याद्यशास्त्रेष्वपी इति विश्वः ॥

ऽध्वरे तेत्रोपायोपाध्यायमंत्रिष्विति विश्वः । अन्यत्र कृतजलावतरणः सन् । तीर्थं योनौ जलावतारे चेति हलायुधः । विगाह्यते गृह्यते प्रविश्यते च । किं नु तत्र नये सना
दृशः पुरुषो विशेषदुर्लभो नितान्तदुर्लभः । यः कृत्यं संधिविग्रहादिकार्यं स्नानादिकं च तस्य वर्त्म तन्साधु देशकालाद्यविरुद्धं यथा तथोपन्यस्यति । अन्यत्र गर्त्तग्राहपाषा
णादिभीरहितं उपन्यस्यमुदाहरति । उपन्यासस्तु वाङ्मुखं । उपोद्घात उदाहारु इत्यमरः । यथा केनचित्कृततीर्थपयसि गंभीरेपि प्रवेशः स्यात् तीर्थकरस्तु वि
रलः । न हन्नीतावपि गूढतत्त्वं वक्तारि सति बोद्धारः संति वक्ता तु न सुलभः । एवमपंडितापि साधवक्री तिष्ठन्ते विस्मयश्च नार्थ्यः ॥ ३ ॥ अथ ग्राह्यत्वे हेतुमाह । परिणा

विषमोपि विगाह्यते नयः कृततीर्थः पयसामिवाशयः । स तु तत्र विशेषदुर्लभः सदुपन्यस्यति कृत्यवर्त्म यः ॥ ३ ॥
परिणामसुखे गरीयसि व्यथकेऽस्मिन्वचसि क्षतौजसां । अतिवीर्यवतीव भेषजे बहुरल्पीयसि दृश्यते गुणः ॥ ४ ॥

मेति । परिणामः फलकालः । परिपाकावस्था तत्र सुखे हिते । शस्तं चाथ त्रिषु द्रव्ये पापं पुण्यं सुखादि चेति । सुखशब्दस्य लिंगत्वं । गरीयसि भूयिष्ठे
श्रेष्ठे च । क्षतौजसां उभयत्रापि हीनशक्तीनां व्यथके । पुंस्याधिः पोद्दलकर्त्तरि भयंकरे । अन्यत्रास्मिन् संशयादिदुःखजनके । अल्पीयसि स्वल्पातरे । अल्प
मात्रे च । उक्तं च खल्पादिमात्रादिगुणः पुरस्त्रेत । अस्मिन्वचसि द्रौपदीवचने । अतिवीर्यवत् तत्सामर्थ्यवति भेषजे औषधे च । भेषजौषधभैष
ज्यानीत्यमरः । बहुरनेको गुणः । मात्रत्राणराज्यलाभादिः । आरोग्यबलपोषादिश्च दृश्यते । अतो ग्राह्यमस्या वचनमिति भावः ॥ ४ ॥ ॥ रामजी ॥

नि

तात्पर्यार्थः ४

विशेष्य ४१

गुर्वर्थप्रतिपाद्यकेर्थ ४४ =

॥कि॰॥का॰॥टी॰॥
॥टं॰॥ स॰॥२॥
॥२॥ 16

स्वदतां २ रते अभिमतगुणाय

सत्यमेवतथापिमह्यंनरोचते किंकरोमीत्याह॥इयमिति॥रुचिरार्था हितार्थ संपन्नेति रुचिहेतूक्तिः॥इयंभारतीद्रौपदीवाक्यं इष्टगुणायगुणग्राहिणेइत्य
र्थः॥भवतेतुभ्यंरुच्यर्थानांप्रियमाणइतिसंप्रदानत्वाच्चतुर्थी॥रोचतांप्रियतां॥स्वाद्यतां॥विध्यर्थेलोट्॥हितवचनेबलादपीच्छांकुर्यादौषधवदितिभावः॥नयपि
वैरेणवचसिकाश्रद्धातत्राह॥नन्विति॥गुणानांगृह्याः गुणपक्षाः॥गुणपक्षपातिनइत्यर्थः॥पदास्वैरिपक्षेपक्षेषुचेतिगृह्येःक्यप्॥विपश्चितोविद्वांसोवचने
विषये वक्तृविशेषे॥स्त्रीपुंसादिलक्षणे॥निःस्पृहाः॥ननुनिरस्ताः॥खलु॥आबालादपिसुभाषितंग्राह्यमितिन्यायादितिभावः॥५॥संप्रतिस्वयमुपालभते॥चत

विद्वानविपश्चिन्दोषज्ञोऽसन्मनः २

निरलसाः ४

इयमिष्टगुणायरोचतांरुचिरार्थाभवतेपिभारती॥ननुवक्तृविशेषनिस्पृहागुणगृह्यावचनेविपश्चितः॥५॥च

तसृष्वपितेविवेकिनीनृपविद्यासुनिरूढिमागता॥कथमेत्यमतिर्विपर्य्ययंकरिणीपंकइवावसीदति॥६॥ मि

सृष्वपीति॥हेनृपचतसृष्वपिविद्यासु॥आन्वीक्षिक्यादिषु॥आन्वीक्षिकीत्रयीवार्त्तादण्डनीतिश्चशाश्वती॥विद्याश्चैताश्चतस्रश्चलोकसंस्थिति
हेतवः॥इतिकामंदकः॥निरूढिमागता॥प्रसिद्धिंगता॥अतएवविवेकिनी॥सदसद्विवेकवती॥यथाहमनुः॥आन्वीक्षिकींचविज्ञानंधर्माधर्मौत्रयीस्थि
तौ॥अर्थाऽनर्थौतुवार्त्तायांदंडनीत्यांनयानयाविति॥ते तव मतिःकथंकरिणीपंकमिव॥विपर्य्ययं॥वैपरीत्यं॥अविवेकत्वरूपमेत्यावसीदतीति॥नश्यति॥
नमुक्तमितिभावः॥६॥किंछिन्नमिरानीयेनेत्यमुपलभेमहीत्यत्राह॥विधुरैरिति॥त्वयिपरैःशत्रुभिरिमामीदृशीमवगीतां॥गर्हितां॥अवगीतंचनिर्वादेमुहुर्दृष्टे

अर्थानर्थौच

मि न

२६

संभावितवृत्ति

चगर्हित इति विश्वः॥ दृशांगमिते प्रापिते सति॥ सुरैरपि भावितवृत्ति बहुमानप्रसारं॥ अथवा निश्चितसद्भावं पौरुषं पुरुषाकारः॥ युवादित्वादण्प्रत्ययः॥ अवसीदति॥ न
१२ यपतीयत्॥ अतः परं॥ अतोन्यदधिकं॥ विधुरं किं कष्टं न किंचिदित्यर्थः॥ विधुरं प्रत्यवाये स्यात्कष्टसंश्लेषयोरपीति वैजयंती॥ अत्र ... विशेषः॥ अस्ति भवति परः॥ प्रथमपुरुषो
तीर् प्रयुज्यमानोप्यस्तीति भाष्यकारः॥ भवंति॥ लट् पूर्वाचार्याणां संज्ञा॥ यद्वा पुरुषाज्यमानोप्यस्तीति भाष्यकारः॥ भवति लुधिकारस्य दुर्दशा सा च शत्रुकृतानादुपरि म
त्वयोपेतत४ हत्कष्टं॥ नत्वत्वदुपेक्षयैव सुपालभ्यत इत्यर्थः॥ ७॥ अथापेक्षाकालत्वादियमुपेक्षेत्याशंक्य नायमुपेक्षाकाल इति वक्तुं तदेव तावच्छ्लोकद्वयेन विविनक्ति॥ द्विषतामि

विधुरं किमतः परं परैरवगीतां गमिते दशामिमां॥ अवसीदति यत्सुरैरपि त्वयि संभावितवृत्ति पौरुषम्॥ ७॥ द्विषता ति॥ १

मुदयः सुमेधसा गुरुः स्वंततरः सुमर्षणः॥ न महानपि भूतिमिच्छता फलसम्पत्प्रवणः परिक्षयः॥ ८॥

ति॥ भूतिमुदयमिच्छता॥ शोभनामेधा यस्य तेन सुमेधसा॥ सुधिया नित्यमसिच्॥ प्रजामेधयोरित्यसिच्प्रत्ययः॥ गुरुर्महानप्यस्वंततरः॥ अनंतं दुरंतः
तयोर्न्सुख इति यावत्॥ द्विषतामुदयः॥ सुखेन मृष्यत इति सुमर्षणः॥ सुसहः॥ उपेक्ष्य इत्यर्थः॥ स्वंतस्त्वित्तु दुर्मर्षण इति भावः॥ भाषायां शासियुधीत्यादिना खल्
लर्थेयुच् प्रत्ययः॥ महानपि फलसंपत्प्रेक्ष इति भावः॥ न ह्युदय इत्येव प्रतीकार्यः॥ न च क्षय इत्येवोपेक्ष्यः॥ किंतु स्वंतत्वास्वंतत्वाभ्यामुभावपि प्रतीकार्यावुपेक्ष्यौ च भव
महानपि फलसंपत्प्रवणः फलसमृद्ध्युन्मुखः प्रतिरन्तरित्यादिनाणत्वं परिक्षयो न सुमर्षणः नोपेक्षयेत्यर्थः अल्पप्यात्वपेक्ष्या इति भावः॥

भा॰ टी॰ ... १०

मध्ये एकतरस्योदयस्तत्क्षयोगमुक्ता इदानीं १

अथोभयोरपि युगपत्परिक्षयागमे गतिमाह॥ अचिरेणेति॥ कृतमनेनेति कृती कुशल इत्यर्थः॥ इष्टादिभ्यश्चेतीनिः प्रत्ययः॥ परस्य शत्रोः क्षययुक्तिं क्षययोगमचिरेण अनुभाविनीं भूयसीं दुरन्तां च तथा आत्मनः क्षययुक्तिं विपरीतां चिरभाविनीमल्पीयसीं च विगणय्य विचार्य ल्यपि लघुपूर्वादित्ययादेशः॥ उपेक्षते अन्यथा उक्तवैपरीत्ये परस्य क्षययुक्तौ अल्पीयस्यां स्वस्य भूयस्यां च सत्यामित्यर्थः॥ तत्प्रतीकारं तस्याः क्षययुक्तेः प्रतीकारं अचिरेण कुरुते॥ संसति यदा शत्रोरभ्युदयः स्वस्य चेति परीक्षयोरयं यास्मा कं॥ न दा किं वक्तव्यं॥ स यः प्रतिकुरुत इत्यर्थात्सिद्धमनुसंधेयम्॥ ६॥ तथाप्युपेक्षायामनिष्टमावहे॥

अचिरेण परस्य भूयसीं विपरीतां विगणय्य चात्मनः॥ क्षययुक्तिमुपेक्षते कृती कुरुते तत्प्रतिकारमन्यथा॥ ६॥

अनुपालयतामुदेष्यतीं प्रभुशक्तिं द्विषतामनीहया॥ अपयान्त्यचिरान्महीभुजां जननिर्वादभयादिव श्रियः॥ २॥

ल२

अनुपालयतामिति॥ उदेष्यतीं॥ वर्द्धिष्यमाणां॥ आच्छिनघोर्नुम्॥ इति विकल्पान्नुमभावः॥ द्विषतां प्रभुशक्तिं॥ कोशदंडजं तेजः॥ स प्रभावः प्रतापश्च य तेजः॥ कोशदंडजमिति॥ अनीहया॥ अनुत्साहेन॥ अनुपालयतामुपेक्षमाणानां॥ महीभुजां श्रियः॥ संपदो जननिर्वादभयान्निकृष्टपुरुषानुरागो न्यलोकापवादभयादिवेति हेतूत्प्रेक्षा॥ अचिरादपयांति॥ अपसरंति॥ यथाह कामंदकः॥ स्त्रीभिः षंडैश्च वक्षोभिरलसः परिभूयत इति॥ अतः पराक्रमितव्यमित्यर्थः॥ १०॥ ननु लीराः कथं प्रबलेनभियुज्यतेत्यत्राह॥ क्षयेति॥ क्षययुक्तमपि तथादीनामपि संतं स्वभावजं॥ सहजं शिवं॥ सर्वजनाह्लादकं धाम

परि

ख१०

प्रतिपद्युदेनदृत्ती
मा ग्रहणमिति २४

दात्वं तेजः ॥ प्रकाशं वदधतं ॥ समृद्धये ॥ ऐश्वर्यमुत्थितं मृयुक्तमुत्साहमानमितियावत् ॥ अन्यत्रोत्थितमुदितं ॥ अतएवानपायं ॥ अविनाशिनं ॥ वर्द्धिष्णुमित्यर्थः ॥ नृपं ॥ प्रजाः
प्रतिपच्चन्द्रं द्वितीयाचन्द्रमिवेत्यर्थः ॥ प्रतिपादितस्याहश्यत्वादितिभावः ॥ प्रणमंत्यनुवर्त्तते ॥ अन्यत्र नमस्कुर्वंति ॥ नयस्याभुत्साहः कार्य्यसिद्धेर्निदानमित्यर्थः ॥ नयं
हिशत्रोरुत्साही दुर्वलोपि समश्नुते इति कामंदकः ॥ ११ ॥ ननु प्रभुशक्तिमूलस्यैत्साहः कुत्रोपयुज्यत इत्यत्राह ॥ प्रभव इति ॥ कर्मणामारंभोपायः ॥ पुरुषद्रव्यसंपत् ॥
देशकालविभागः ॥ विनिपातप्रतीकारः कार्य्यसिद्धिश्चेतिपंचांगानि ॥ यथाह कामंदकः ॥ सहायाः साधनोपायाः विभागो देशकालयोः ॥ विनिपातप्रतीकारः सिद्धिः

तपप्रक्रममपिस्वभावजं दधतं धामशिवं विवृद्धये ॥ प्रणमंत्यनपायमुत्थितं प्रतिपच्चन्द्रमिव प्रजा नृपम् ॥ ११ ॥ प्रभ
वः खलु कोशदंडयोः कृतपंचांगविनिर्णयो नयः ॥ स विधेयपदेषु दक्षतां नियतिं लोक इवानुरुध्यते ॥ १२ ॥

पंचांगमिष्यते इति ॥ इतिपंचानामंगानां विनिर्णयः ॥ पंचांगविनिर्णयः ॥ नद्धितार्थेत्यादिना उत्तरपदसमासः ॥ कृतः पंचांगविनिर्णयो यस्य येन वा स तथो
क्तो नयो नीतिमात्र इतियावत् ॥ कोशोऽर्थराशिः ॥ कोशोस्त्रीकुड्मले खड्गपिधानेर्थौघदिव्ययोरित्यमरः ॥ दंडश्चतुरंगसैन्यं ॥ दंडोस्त्रीशासने राज्ञां हिंसायां लगु
यमे डेध्वजे सैन्यभेदे इति वैजयंती ॥ तयोः कोशदंडयोः ॥ प्रभुशक्तेरित्यर्थः ॥ प्रभवंत्यस्मादिति प्रभवः कारणं ॥ स्रोरोरप् ॥ स नयो विधेयपदेषु ॥ कार्य्यवस्तु
षु दक्षतां ॥ क्षिप्रकारित्वं ॥ उत्साहमित्यर्थः ॥ लोकः कृष्यादिप्रवृत्तो जनो नियतिं दैवमिव ॥ नियतिर्नियमे दैव इति विश्वः ॥ अनुरुध्यते ॥ अनुसरति ॥ रुधेर्दैवादिकात्त्वा

पदं व्यवसितं ॥ त्रात्मस्यानलत्वां त्रिवस्तु छिति अमरः २४

॥कि॰ का॰॥ टी॥
॥ग्रं॰ स॰ २॥
॥६॥
18
प्र

त्कर्त्तरि लट्॥ मंत्रस्यापि मूलमुत्साह॥ तन्मूलायाः॥ प्रभुशक्तेर्मूलमिति किमु वक्तव्यमतः स एवाश्रयणीयः॥ यतो नक्तंदिवं मंत्रयतस्तस्यापि प्रभोर्निरुत्साहस्य न किंचित्सिध्य
तीति॥१२॥ ननु सोत्साहस्यासहायस्य कथमर्थसिद्धिरित्यत आह॥ अभिमानेति॥ अभिमानवतो मानधनस्य प्रियमिष्टमुच्चैरुन्नतं पदं स्थानं राज्यादिकमारुरुक्षतः॥ आरो
ढुमिच्छतः॥ प्राप्तुकामस्य मनस्विनो धीरस्यात्मपौरुषं स्वपुरुषकार एव विनिपातनिवर्त्तनक्षममनर्थप्रतीकारसमर्थमालंबनं सहकारि मतमिष्टं॥ यथा कस्यचिद्दुर्
गमारोहतः॥ किंचित्पतनप्रतिबंधकमनुचरहस्तादिकमालंबनं तद्वदिति ध्वनिः॥ किं पौरुषादन्यैः॥ सहायैः कारणमिति भावः॥१३॥ पौरुषानंगीकारे दोषमाह॥

अभिमानवतो मनस्विनः प्रियमुच्चैः पदमारुरुक्षतः॥ विनिपातनिवर्त्तनक्षमं मतमालंबनमात्मपौरुषम्॥१३॥
विपदोऽभिभवंत्यविक्रमं रहयत्यापदुपेतमायतिः॥ नियता लघुता निरायतेरगरीयान्न पदं नृपश्रियः॥१४॥

तिरस्कुर्वंति

विपद इति॥ अविक्रमं पौरुषहीनं विपदोऽभिभवंति॥ आक्रमंति॥ आपदुपेतं॥ विपन्नमायतिः॥ उत्तरकालः॥ उत्तरः काल आयतिरित्यमरः॥ रहयति॥ त्यजति
निरायतेरासन्नक्षयस्येत्यर्थः॥ लघुता॥ अगौरवं॥ नियता॥ अवश्यंभाविनी॥ न कश्चिदेनमाद्रियत इत्यर्थः॥ अगरीयान्॥ लघीयान्॥ नृपश्रियः॥ राजल
क्ष्म्याः॥ पदं स्थानमास्पदं न भवति॥ यद्वा नृपेति पदच्छेदः॥ तस्मात्पौरुषं कर्त्तव्यमेवेत्यर्थः॥ अत्र सर्वपूर्वस्याविक्रमत्वादेरुत्तरोत्तरं विपदादिकं प्रतिका
रणत्वात्कारणमालाख्यालंकारः॥ तथा च सूत्रे॥ पूर्वपूर्वस्योत्तरहेतुत्वे कारणमालेति॥१४॥ ॥रामजी॥ ॥सहायजी॥ ॥रामजी॥

ननुसमयः प्रतीक्ष्यतेइत्यत्राह २ | उन्नतेरभ्युदयस्य प्रतिपक्षमंतरायं अवसायवंध्यतां उद्योगशून्यतां अवलंब्य अलं उद्योगशून्यतालंबनेनालमित्यर्थः १५

फलितमाह ॥ तदिति ॥ तत्तस्मादुपेक्षायां दोषसंभवादित्यर्थः ॥ अलं खल्वोः प्रतिषेधयोः प्राचांक्तेति क्त्वा प्रत्ययेतस्य ल्यवादेशः ॥ तथाहि ॥ पराक्रमः ॥ आश्रयः ॥ कारणं यासां तास्तथोक्ताः ॥ समृद्धयः ॥ संपदः ॥ विषादेन समं ॥ अनुत्साहेन समं न निवसंति ॥ पौरुषसाध्याः ॥ संपदो न विरोधसाध्या उभयोः सहावस्थानविरोधादित्यर्थः ॥ १५ ॥ अथेति ॥ अथावधिः कालः प्रतीक्ष्यते चेत् ॥ अवधिस्त्ववधाने स्यात्सीम्नि काले बलेपि चेति विश्वः ॥ आविष्कृता जिह्मवृत्तिना प्रकटितकपटव्यवहारेण ॥ धृतराष्ट्रसुतेन युर्योधनेन ॥ नरेंद्रसंपदो राजसंपदः ॥ नरेन्द्रेति वा पदच्छेदः ॥ चिरं चतुर्दशवर्षाणि पास्वाद्य अनुभूय कथं सुत्यज्याः ॥ त्याज्या स्वादेन तेन पश्चादपि सुखेन युद्ध

अनुद्योगसाध्या २८

वैधर्म्येण कार्यकारणरूपोऽर्थान्तरन्यासः ३८

दुर्योधनः

संपदो ४८

तदलं प्रतिपक्षमुन्नतेरवलंब्य व्यवसायवन्ध्यताम् ॥ निवसंति पराक्रमाश्रया न विषादेन समं समृद्धयः ॥ १५ ॥ अथ चेदवधिः प्रतीक्ष्यते कथमाविष्कृतजिह्मवृत्तिना ॥ धृतराष्ट्रसुतेन सुत्यजाश्चिरमास्वाद्य नरेन्द्रसंपदः ॥ १६ ॥ द्विषता विहितं त्वयाथवा यदि लब्धा पुनरात्मनः पदं ॥ जननाथ तवानुजन्मनां कृतमाविष्कृतपौरुषैर्भुजैः ॥ १७ ॥ क्लेशं विनान्यत एवेत्यवधिप्रतीक्षणमनर्थमित्यर्थः ॥ १६ ॥ अथवा तरां दैववशात्स्वयमेव संपदो दास्यति चेत्तथापि किं रोचयामहीत्याह ॥ द्विषतेति ॥ अथवा द्विषता विहितं पुनः प्रत्यर्पितमित्यर्थः ॥ आत्मनः पदं राज्यं ॥ लब्धा लप्स्यते यदि ॥ लभेः कर्मणि लुट् ॥ हे जननाथ ॥ तवानुजन्मनामनुजानामाविष्कृतपौरुषैर्भुजैः ॥ प्रकटितपराक्रमैः ॥ भुजैः कृतं अलं ॥ भुजैर्न किंचित्साध्यमित्यर्थः ॥ राज्यदानादानयोर्द्विषामेव स्वातंत्र्यं ॥ अस्मद्भुजवैफल्यात् ॥ क्षात्रियस्य विजितस्यमिति शास्त्रात् ॥ क्षात्रेणैव राज्यं ग्राह्यमितिभावः ॥ कृतमिति निषेधार्थमव्ययं ॥ वादिषु पठ्यते ॥ कृतमिति निषेधयोरिति ॥ गुणाभ्यासमानेभुजैरिति ॥ गम्यमानसाधनक्रियापेक्षया

वर्ण्यमिति भावः ३८

अस्मद्भुजैर्न किंचित्साध्यं इत्यर्थः २५

॥कि॰का॰टी॰॥
॥टी॰॥स॰॥२॥
॥५॥
नपाहि
19

ननुसाम्नैवकार्य्यसिद्धौकिंतात्रेण॥यथाहमनुः॥साम्नादानेनभेदेनसमस्तैरुतवापृथक्॥विजेतुंप्रयतेतारीन्नयुद्धेनकदाचनेति॥नात्किमाग्रहेणत्याशंक्याह॥मदसिक्तइति॥मृगाधिपःसिंहः॥मदसिक्तैर्मुखैर्मदवर्षिभिरित्यर्थः॥स्वयं स्वेनैवहतैः॥करिभिर्वर्त्तयते॥हत्तिंकरोति॥नैरेवजीवतीत्यर्थः॥चौरादिकत्वाद्दृत्तेर्णिच्॥भोवादिकस्य॥त्वणावकर्मकत्वाच्चित्तवत्कर्त्रकादितिपरस्मैपदनियमादिति॥तेजसाप्रभावेन॥तेजोबलेप्रभावेचज्योतिष्यर्चिषिरेतसीतिवैजयन्ती॥जगल्लघयन्॥लघूकुर्वन्॥महांस्तेजस्वी॥अन्यतोऽन्यस्मात्पुरुषाद्भूतिंहृद्धिंनेच्छतिखलु॥नहितेजस्विनःपरायत्तहृत्तित्वं॥मतुदवचनंत्वप्रस्तुतविषयं॥विशेषेणावसमाणसामान्यसमर्थ

मदसिक्तमुखैर्मृगाधिपः करिभिर्वर्त्तयते स्वयंहतैः लघयन्खलु तेजसा जगन्न महानिच्छति भूतिमन्यतः॥१८॥

अभिमानधनस्य गत्वरैरसुभिः स्थास्नु यशश्चिचीषतः॥ अचिरांशुविलासचंचला ननु लक्ष्मीः फलमानुषंगिकं॥१९॥

नरूपोऽर्थांतरन्यासः॥१८॥ननुपुरुषार्थात्किंलोभउपायांतरेणननयेत्याशंक्याह॥अभिमानेति॥अभिमानधनस्यवैरिनिर्यातनमात्रनिष्टस्यातएव॥गत्वरैर्गमनशीलैरस्थिरैः॥गत्वरश्चेतिक्वरन्तोनिपातः॥असुभिःप्राणैः॥पुंसिभूम्न्यसवःप्राणाइत्यमरः॥स्थास्नुस्थिरं॥ग्लाजिस्थश्चग्स्नुरितिगस्नुप्रत्ययः॥अचिरंशवोयस्याःसाऽचिरांशुर्विद्युत्॥तस्याविलासःस्फुरणं॥तद्वच्चंचलाक्षणिकालक्ष्मीःसंपत्॥अनुषंगादागतमानुषंगिकमन्वाचयाशिष्टमल्पंफलं॥मानत्राणाजं॥यशःएवमुख्यंफलं॥अभ्युच्चयस्तुलक्ष्मीरितिमानिनामिदमेवश्लाघ्यमित्यर्थः॥अत्रोऽस्थिरप्राणत्यागेनास्थिरंयशःस्वाकाराभिधानान्न्यूनेनाधिकाविनिमयालंकारः॥परिदृत्तिर्विनिमयोयोऽर्थानांस्यात्समासमैरिति॥१९॥

मानत्राणजं
तदुक्तंकाव्यप्रकाशे

मेवजनंयस्येत्यर्थः यशश्चिकीषतः चेतुं संग्रहीतुमिच्छतः ४
चिनोतेः सन्नन्तात् शतृप्रत्ययः ४५

२९

नन्वत्यस्यमानस्यहेतोः कथं प्राणत्यागः शक्यते कर्तुं मनोजीवन्नरो भद्रशतानि पश्येदित्याशंक्याह॥ ज्वलितमिति॥ जनो भस्मनां चयं पुंजमास्कंदति पदाहिनाक्रमति। अदाहकत्वादितिभावः॥ ज्वलितं ज्वलंतं कर्त्तरि क्तः॥ गतिबुद्धीत्यादिसूत्रेचकारादूर्त्तमानार्थत्वं॥ हिरण्यरेतोयस्यतमग्निं नास्कंदति दाहकत्वादितिभावः॥ अतोहेतोर्मानिनोऽभिभूतिभयात्प्राणलोभेन तेजस्त्यागे परिभविष्यतीतिभयादसूनेव सुखमक्लिष्टमुज्झंति त्यजंति। धाम तेजस्तु नोज्झंति मानहानिकाराज्जीवनात्तेजस्विनां मरणमेव वरमित्यर्थः॥ पूर्वोत्तरश्लोकवदर्थान्तरन्यासः॥२०॥ अथ पवाकिमत्रप्रयोजनं चिंतया किंतु तेजस्विनामयमेवस्वभाव एव यज्जिगीषुत्व

ज्वलितं न हिरण्यरेतसं चयमास्कंदति भस्मनां जनः॥ अभिभूतिभयादसूनतः सुखमुज्झंति न धाम मानिनः॥२०॥ किमपेक्ष्य फलं पयोधरान्ध्वनतः प्रार्थयते मृगाधिपः॥ प्रकृतिः खलु सा महीयसः सहते नान्यसमुन्नतिं यया॥२१॥ कुरु तन्मतिमेव विक्रमे नृप निर्धूय तमः प्रमादजं॥ ध्रुवमेतदवेहि विद्विषां त्वदनुत्साहहता विपत्तयः॥२२॥

मित्याशयेनाह॥ किमिति॥ मृगाधिपः सिंहः॥ किं फलं प्रयोजनमवेक्ष्य ध्वनतो गर्जतः॥ धरंतीति धराः पचाद्यच्॥ पयसो धरास्तान्पयोधरान्॥ मेघान्॥ प्रार्थयते ऽभियाति॥ याञ्चायामभियाने च प्रार्थनाकथ्यते॥ बुधैरितिकेशवः॥ यद्वा अवरुणद्धीत्यर्थः॥ प्रथमे ऽर्थयते॥ प्रार्थनायस्त्रा घावरोधयोरित्यभिधानात्॥ नयाहि महीयसो महत्तरस्य सा प्रकृतिः स्वभावः॥ खलु यया प्रकृत्या॥ अन्यसमुन्नतिं परवृद्धिं न सहते॥ महतः परभंजनमेव पुरुषार्थ इत्यर्थः॥ पूर्ववदलंकारः॥२१॥ निगमयति॥ कुर्विति॥ हे नृप तस्मादुक्तीत्या पराक्रमोत्साहत्वाद्धेतोः॥ प्रमादजं ततो हेत्वा वित्तेमरः॥ प्रमादजं तमो मोहं निर्धूय निरस्य विक्रमे पौरुषे एव मतिं कुरु॥ विक्रममेवांगीकुरु॥ नतूपायां

नरमित्यर्थः॥ न च विक्रमवैफल्यमाशंकनीयमित्याह॥ अ(ए)वमिति॥ हि द्विषां विपन्नयः॥ त्वदनुत्साहहतालवानुत्साहेनाध्यवसायेन हता॥ प्रतिवज्ञाः॥ अन्यथा प्रागेव वि
पद्येरन्निति भावः॥ अनेन तद्ध्रुवं निश्चितमेव हि॥ विद्धि॥ ध्रुवं निपानिश्चिते चेति शाश्वतः॥२२॥ न च नः पराजयशंका कार्येत्याह॥ द्विरदानिति॥ दिग्विभावितान् दिलुभ
स्यातान्॥ आयतः॥ आगच्छतः॥ आङ्पूर्वादिणो धातोः शतृप्रत्ययः॥ चतुरो द्विरदान् दिग्गजानिव तथा च विशेषणाश्चतुरस्तोयनिधीनिव रणे॥ आयतो दिग्विभावि
तान्॥ शतमन्युतेजसः॥ इंद्रविक्रमांश्चतुरस्तवानुजान्॥ द्विषतां मध्ये कः प्रसहेत॥ सोढुं शक्नुयादित्यर्थः॥ शाकि लिङ्॥ इति शाकार्थे लिङ्॥ अतो निःशंकं

द्विरदानिव दिग्विभावितांश्चतुरस्तोयनिधीनिवायतः॥ प्रसहेत रणे तवानुजान्द्विषतां कः शतमन्युते
जसः॥२३॥ ज्वलतस्तव जातवेदसः सततं वैरिकृतस्य चेतसि॥ विदधातु शमं शिवेतरा रिपुनारीनयनांबु
संततिः॥२४॥

प्रवर्तस्वेति भावः॥२३॥ आशीर्वादव्याजेन फलितमाह॥ ज्वलत इति॥ तव चेतसि॥ सततं ज्वलतो वैरिकृतस्य॥ जातवेदसः
क्रोधाग्नेः॥ शिवेतरा॥ अशिवा॥ अमंगला॥ वैधव्यदुःखजन्यत्वादिति भावः॥ रिपुनारीनयनांबुसंततिः॥ वैरिवनिताश्रुप्रवाहः॥ शमं विदधातु वै
रिजनितस्य क्रोधस्य॥ वैरिवधमंतरेण शांत्यसंभवात्तद्वधे तद्धे त्वया कर्तव्य इत्यर्थः॥ क्रोधस्य विषयनिगरणेन॥ विषयिणो जातवेदस एवोप
निबंधादतिशयोक्तिरलंकारः॥ तदुक्तं॥ विषयस्यानुपादानाद्विषय्युपनिबध्यते॥ यत्रासावतिशयोक्तिः स्यात्कवेः प्रौढोक्तिजीवितेति॥ तथापि क्रोधस्य जातव

कोप

इतीति ॥ इत्युक्तरीत्या दर्शिता विक्रिया विकारो वागारंभात्मको येन तं क्रोधपरीतमानसं संकोपाक्रांतचित्तं ॥ इदं विशेषणद्वयं द्विरदेपि योज्यं ॥ मरुत्सुतं भीमं ॥ महीपतिर्युधिष्ठिरो दुष्टं
द्विरदमिव ॥ एतेन भीमस्य शौर्यमेव बुद्धिरस्तीति गम्यते ॥ उपशान्त्वयितुं अनुनेतुं ॥ उपचक्रमे ॥ प्रवृत्तः ॥ प्रोपाभ्यां समर्थाभ्यामात्मनेपदं ॥ राज्ञां तावदुपकारा विशेषापेक्षया कथं
चिद्वशयोजनः शनैः शनैः ॥ द्विरदवद्वशीकरणीयो न तु त्याज्य इति भावः ॥ न तूपेक्षणीयो वा ॥ २५ ॥ प्रथमं तावत्स्तुत्यादिभिः प्रसादयति ॥ अपवर्जितेति ॥ विप्लवः प्रमाणबा
धः ॥ अन्यत्र वाक्ये मंगलसंक्रांतोपवर्जितस्य ॥ तस्मिन्नपवर्जितविप्लवे शुचौ सोशाक्ष्यं लोभहेतुत्ये शुचित्वं तद्वदिति ॥ अतएव हृदयग्राहिणि मनोहरे ॥ मंगलास्पदे

शुचिः शुद्ध४

इति दर्शितविक्रियं सुतं मरुतः क्रोधपरीतमानसं ॥ उपशान्त्वयितुं महीपतिः द्विरदं दुष्टमिवोपचक्रमे ॥ २५ ॥ अपवर्जित
विप्लवे शुचौ हृदयग्राहिणि मंगलास्पदे ॥ विमला तव विस्तरे गिरां मतिरादर्श इवाभिदृश्यते ॥ २६ ॥ एकत्राहितार्थप्रतिपादक

६

त्वादन्यत्र मंगलवस्तुत्वात् ॥ श्रेयस्करो रोचनं चंदनं हेम मृदंगं दर्पणं मणिः ॥ गुरुमग्निं तथा सूर्य्यं प्रातः पश्येत्सदा बुधः इति पुराणात् ॥ नव गिरां विस्तरे
वाक्यप्रपंचे ॥ प्रथममेव प्रशब्द इति वक्त्र प्रतिषेधात् ॥ अक्षेरविन्यप्र ॥ अतएव ॥ विस्तारो विग्रहो व्यासः स च शब्दस्य विस्तर इत्यमरः ॥ मतिस्तु बुद्धिरादर्शो दर्प
णः उद्वदर्पणे ॥ दर्पणे मुकरादर्शा वित्यमरः ॥ विमला विशदा अभिदृश्यते ॥ वाग्वैशद्यादेव मतिवैशद्यमनुमीयते ॥ तत्पूर्वकत्वात्तस्य इत्यर्थः ॥ २६ ॥ अथ
युग्मेनाह ॥ स्फुटतेति ॥ उपपत्तिरिति युग्मं ॥ पदैः सुनिर्डंजशब्दैः ॥ स्फुटता विशदार्थता ॥ नापाकृता नोपेक्षिता ॥ अर्थगौरवं भूयस्त्वं चैन स्वीकृतमिति ॥ नाकिं तु स्वी

अर्थ

॥कि॥का॥टी॥
॥वं॥स॥२॥
॥२७॥
21

येचसदागुरुणामा
त्रवचनात्॥यथा
गौरवंत्रयाणां रसो
गंधः स्पर्शः इत्येवमा
दयस्तेषामनिषेधा
त्

कृतमेवेत्यर्थः॥ वैसद्याऽप्रसक्तार्थगौरवाभावनिवर्त्तनार्थनञ्द्वयं॥ संभाव्य[illegible] निषेधानिषेधनिवर्त्तनौ ह्वौ प्रतिषेधाविति वामनः॥ गिरां पदानामवांत
रवाच्यानां च पृथगर्थता भिन्नार्थताऽपुनरुक्तार्थतेति यावत्॥ रचिता कृता॥ न याकेचिदपि सामर्थ्यं गिरामन्योन्यसाकांक्षत्वं नापोहितं न वर्जितं॥
अन्यथा दशदाडिमादिशब्दवदेकवाक्यता न स्यात्॥ यथाहुः॥ अर्थैकत्वादेकं वाक्यं साकांक्षं चेद्विभागे स्यादिति॥ ननु चार्थगौरवं इत्यत्र कथं षष्ठीसमा
सः॥ पूरणगुणेत्यादिना प्रतिषेधात्॥ नैष दोषः॥ पेस्तुस्लाद्यशब्दा॥ गुणेन गुणिनि वर्त्तते॥ यथा पटस्य शुक्लः॥ शुक्लः पटः॥ इति च तेषामेवात्र निषेधा
त्॥ न याव…स्थैश्च गुणैः षष्ठी समस्यते इति वचनात्॥ वहुलमभियुक्तप्रयोगदर्शनाच्च॥ वलाकायाः॥ शौक्ल्यमित्यादौ तु भाष्यकारवचनात्॥ असमासः

स्फुटतानपदैरपाकृता न च नस्वीकृतमर्थगौरवम्॥ रचिता पृथगर्थता गिरां न च सामर्थ्यमपोहितं क्वचित्॥२७॥

मनुष्कैतमिति पाठः

उपपत्तिरुदाहृता वलादनुमानेन न चागमः क्षतः॥ इदमीदृगनीदृगाशयः प्रसभं वक्तुमुपक्रमेत कः॥२८॥

अत एवाह वामनः॥ अत्रापीति मादिषु गुरुवचनसमासोऽस्यात्॥२७॥ उपपत्तिरिति॥ किं च वलाद्वलमाश्रित्य॥ कर्मणि ल्यब्लोपे पंचमी च वक्तव्या॥ उप
पत्तिर्युक्तिरुदाहृता परामपत्त्वएवंश्रेयानिति युक्तिरुक्तेत्यर्थः॥ उचितं चैतन्महावीरस्येति भावः॥ न चात्र अनुमानेन क्षतत्वा॥ आगमः शास्त्रं च न क्षतो नात
हतः॥ किं त्वागमाविरुद्धमेवोक्तं॥ अन्यथा न विरोधादनुमानस्यैव प्रामाण्यभंगप्रसंगादिति॥ ईदृगित्यं तात्रयुक्तमिदं वचनं॥ अविद्यमान ईदृगाशय
इत्थं हात्रयुक्ताभिप्रायो यस्य सोऽनीदृगाशयः॥ अभिप्रायश्छंद आशय इत्यमरः॥ कः प्रसभं वक्तुमुपक्रमेत न कोपीत्यर्थः॥ इत्थं वक्तुमुपक्रममि

21

नैवनास्ति॥ वक्तानुहूरायात्तएवेतिभावः॥ केचित्तुनत्श्लोकत्रयंनिंदापरत्वेनापियोजयंति तदसत्॥ हितोपदेशमात्रननमरस्या पीतिवत्सलस्यराज्ञोमन्त्रीरिगएवमही

विधेये २४ धीरैरन्तर्निर्सर्वानर्थमूलभूते ... निंदातात्पर्यकल्पनौचित्यादिति॥ २८॥ यदिसाधूक्तंतर्हिनचैवकिंयत्ताम्निन्याशंक्याह॥ अविनष्टतयेति॥ तथापित्वयासम्यकृनि

अ र्णीतेपिमेहृदयं॥ अविनष्टतया॥ संतुष्टतया॥ अद्यापिसंशयत्वेनेत्यर्थः॥ निर्णयमेवधावत्यनुसरति॥ यथैतन्नश्यतीयोवदन्॥ अद्यापिनिर्णयस्यानुदयादितिभावः

अवेति ४४ निर्णयानुदयेहेतुमाह॥ विधेयेषुसंधिविग्रहादिषु कर्त्तव्यार्थेषु ... याविशेषसंपदो ऽवांतरभेदः॥ भूमानस्तोः सुखमक्लेशेनावशाययितुं॥ पुरुषार्थप्रत्याकूले सम्, दुःखेनाकुला तिनाः

नस्वस्वरूपं स्वयमेवशाधय्यप्रत्याययितुमित्यर्थः॥ समन्तरापत्ताद्गणि कर्मकर्तृकानुमुन॥ रोगराणादिस्तन्नस्यायंविषयः॥ तमंतनश्यतितमाः॥ शक्तानभवेनि पचा

अविनष्टतयातथापिमेहृदयंनिर्णयमेवधावति॥ अवसाययितुंतमाः सुखंनविधेयेषुविशेषसंपदः॥ २९॥

घत्॥ तमंशाक्रेकृतेष्विनमरः॥ विधेयमात्रेसुगमत्वेपितद्विशेषाणांसौक्ष्म्यात्॥ बाहुल्याच्चदुर्ज्ञेयत्वादद्यापिनिर्णयाकांक्षेतितात्पर्यार्थः॥ अत्र

निर्णयधावनं॥ अनुत्तरवाक्यार्थस्यहेतुत्वेनाभिधानात्॥ वाक्यार्थहेतुकंकाव्यलिंगमलंकारः॥ तदुक्तं॥ हेतोर्वाक्यपदार्थत्वेकाव्यलिंगमुदाहृ

तमिति॥ २८ [illegible] ॥ २८॥ वस्तुविशेषावत्तरणमंतरेणैवक्षतिरत्र हन्तिरित्याशंक्याह॥

सहसेति॥ क्रियतइतिक्रियाकार्य्यं॥ सहसा॥ अविमृश्यप्रवृत्तेः॥ सहसेत्याकस्मिकाविमर्शयोरितिगणव्याख्याने स्वरादिपाठादव्ययं॥ नविदधीत॥ कुतः॥

॥ कि॰ का॰ टी॰
॥ चं॰ स॰ २
॥ ४८

22

विपत्ति

अविवेकः॥ अविमृश्यकारित्वं परमत्यंतं॥ आपदां पदं स्थानं कारणमित्यर्थः॥ व्यतिरेकेणोक्तमर्थमन्वयेनाप्याह॥ वृणुत इति॥ गुणलुब्धा गुणगृध्नव इ-
ति॥ स्वयंवरहेतुकाः॥ संपदः श्रियः॥ विमृश्य करोतीति विमृश्यकारी॥ उपपदमतिङ् इति समासः॥ तं स्वयमेव वृणुते भजंते॥ वृङ् संभक्ताविति धातुः॥ तस्मा-
द्विमृश्यैव प्रवर्तितव्यमित्यर्थः॥ अत्र सहसा विधाननिषेधात्तत्ता विमृश्यकारित्वरूपकारणस्यापद्रूपव्यतिरेक[illegible]कार्येण समर्थनाद्वैधर्म्येण
र्थान्तरन्यासः॥ द्वितीयार्द्धे तु स एव साधर्म्येणेति ज्ञेयं॥ ३०॥ ननु साहसिकस्यापि फलसिद्धिर्दृश्यते एवं तत्किं विवेकिनेत्यत्राह॥ अभीति॥ यः पु-

सहसा विदधीत न क्रियामविवेकः परमापदां पदं॥ वृणुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव संपदः॥ ३०॥
अभिवर्षति योऽनुपालयन्विधिबीजानि विवेकवारिणा॥ स सदा फलशालिनीं क्रियां शरदं लोक इवाधि[ष्ठति]॥

मान्॥ विधीयंत इति विधयः॥ कृत्यवस्तूनि॥ बीजानीवेत्युपमितसमासः॥ शारदं लोक एवेति॥ व्याकरणेनोपमानुसारात्॥ तानि विधिबीजानि वि-
ष्यायार्थः॥ स सम्यक्च॥ फलं हेतुकृते सस्य इत्युभयत्राप्यमरः॥ तच्छालिनीं क्रियां कर्म लोको जनः॥ लोकस्तु भुवने जन इत्यमरः॥ शरदमिव सदानि-
त्यमधितिष्ठति॥ (सद्य) क्रियाफलं प्राप्नोत्येव न कदाचिद्व्यभिचरतीत्यर्थः॥ साहसिकस्य तु काकतालीयत्वे फलसिद्धिर्विवेकिनस्तु नियतैवेति भावः॥ अत्र
फलशब्देन सस्यहेतुक[illegible]तयोरर्थयोरभेदाध्यवसायात् श्लेषमूलातिशयोक्तिः सा तु गृहीता चोपमेत्यनुसंधेयम्॥ ३१॥ ॥रामजी॥

२२

गुणगृध्नवः

विवेको वारि इव विवेक वारि तेन विवेकवारिणा पूर्ववत्समासः अनुपालयन् प्रतीक्षमाणः संरक्षन् यः अभिवर्षति सिंचति स पुमान् सफलं साधनं ति ३५

सपराक्रमः नयापादिता नीतिसंपादिता विवेकपूर्विकेतियावत् सा चासौ सिद्धिश्चैव भूषणं प्रपस्यसतयोक्त्वा: ३५

नियताविवेकिनः फलसिद्धिरित्युक्तं संप्रतितामेवरूच्यर्थं स्तौति ॥ शुचीति ॥ शुचिसंप्रदायशुद्धं ॥ श्रुतं शास्त्रश्रवणं कर्त्तृ वपुर्भूषयति ॥ अन्यथाऽविद्वान्पुरुषोनशोभत इतिभावः ॥ तस्य श्रुतस्य प्रशमः ॥ क्रोधोपशांतिरलंक्रियाभूषणं भवति ॥ अन्यथा श्रुतवैफल्यादितिभावः ॥ पराक्रमः ॥ सत्यवसरे शौर्यं प्रशमस्याभरणं ॥ अप्रमयासर्वैः परिभूयतइतिभावः ॥ अन्यथासाहसिकस्यसिद्धेः ॥ काकातालीयत्वेनपरोपराक्रमस्यैवायथ्यस्यादितिभावः ॥ वपुषोभूष्यत्वेनात्रासिद्धेर्भूषणत्वोक्तेसार्वानंतर्यात्स्तुतिर्गम्यते ॥ अत्रोत्तरोत्तरस्य पूर्वपूर्वविशेषणत्वादेकावल्यलंकारः ॥ तदुक्तमेकावल्यां ॥ यत्रविशेषणभावंपूर्वपूर्वंप्रतिक्रमेणैवभजंतिपरेषामलं

शुचिभूषयतिश्रुतंवपुःप्रशमस्तस्यभवत्यलंक्रिया ॥ प्रशमाभरणंपराक्रमस्तनयापादितसिद्धिभूषणः ॥ ३२ ॥

मतिभेदतमस्तिरोहितेगहनेकृत्यविधौविवेकिनां ॥ सुकृतःपरिशुद्धआगमःकुरुतेदीपइवार्थदर्शनं ॥ ३३ ॥

कृतिरेकावलीकथितेति ॥ ३२ ॥ विमृश्यकुर्यादितिस्थितंतत्रविमर्शोपायः कइत्यत्रोक्तेशास्त्रमेवेत्याह ॥ मतीति ॥ मतिभेदः ॥ कार्यविप्रतिपत्तिस्तमएवेत्युपमितसमासः ॥ दीपइवेत्युपमानानुसारात् ॥ तेनतिरोहिते ॥ आच्छन्ने ॥ अतएवगहने ॥ दुरवगाहे ॥ कृत्यविधौकार्यानुष्ठाने ॥ विवेकिनां ॥ सुकृतः ॥ सद्भ्यस्तः ॥ अतएवपरिशुद्धोनिश्चितो ॥ ऽन्यत्रसुविहितैः ॥ प्रवातादिदोषरहितश्च ॥ आगमः शास्त्रं ॥ आगमःशास्त्रमाम्नाय इतिविश्वः ॥ दीपइवार्थदर्शनं कार्यज्ञानं ॥ वसुप्रतिभासंकुरुते ॥ ३३ ॥ एवंविमृश्यकुर्वतोदैवादनर्थागमोऽपि नकश्चिदपराधइत्याह ॥

उभयंमध्यमार्गात्तुप्रशतपूर्वोत्तरपदयोरितिविवेकः एवंविधोऽसिद्धेरनन्यभूषितापाएवभूषणत्वोक्त्यातत्सर्वाभरणानयास्तुतिर्गम्यते ४५

भवतिर८

वा

परं

मतिभेद ३५

म्ना

दर्शनारोपि

॥कि॥का॥टी॥
॥पं॥ स॥ २॥
॥९॥ 23

स्पृहणीयेति॥ स्पृहणीयगुणैः लोकश्लाघ्यगुणैर्महात्मभिः॥ सज्जनैश्चरिते ऽनुष्ठिते वर्त्मनि आचारे मनो यच्छतां॥ निदधतां सन्मार्गेण व्यवहरतामित्यर्थः॥ विधिहेतुर्दैवनिमित्तकः विधिर्विधाने दैवे चेति विश्वः॥ अत एवागसामपराधानामहेतुर्विनिपातो दैविकानर्थः॥ विनिपातो ऽवपाते स्याद्दैवाद्व्यसनेपि चेति विश्वः॥ [illegible] समुन्नतेरुत्कर्षस्य समस्तुल्यः॥ दैविकेषु पुरुषस्यानुपलभ्यत्वादिति भावः॥ यथाह कामंदकः॥ यथासम्यगुपक्रांतं कार्यमेति विपर्ययम्॥ पुरुषं तत्वं नुपालभ्यो दैवान्तरित पौरुष इति॥ ३४॥ संप्रति [illegible]दाह॥ शिवमिति॥ जिगीषवो वि

पुमाँस्तत्रा ४=

स्पृहणीयगुणैर्महात्मभिश्चरिते वर्त्मनि यच्छतां मनः॥ विधिहेतुरहेतुरागसो विनिपातोपि समः समुन्नतेः॥ ३४॥
शिवमौपयिकं गरीयसीं फलनिष्पत्तिमदूषितायतिं॥ विगणय्य नयंति पौरुषं विजितक्रोधरया जिगीषवः॥ ३५॥

विजितक्रोधवेगाः

जयेच्छवो नृपाः॥ विजितक्रोधरयाः संतो गरीयसीं॥ प्रभूतामदूषिता[illegible]यतिं निर्मलोत्तरकालां स्वनामित्यर्थः॥ फलनिष्पत्तिं फलसिद्धिं॥ विगणय्य फलयत्वं निश्चित्येत्यर्थः॥ पौरुषं पुरुषाकारं शिवमनुकूलमौपयिकमुपायं॥ विनयादिस्वार्थे ठक्॥ उपायात् स्वार्थे च॥ नयंति प्रापयंति॥ पौरुषमुपायेन योजयंतीत्यर्थः॥ अनिश्चितफलं कर्म न कुर्वंतीति भावः॥ यथाह कामंदकः॥ निष्फलं क्लेशबहुलं संदिग्धफलमेव च॥ न कर्म कुर्यान्मतिमान् सदा वैरानुबंधि चेति॥ नयतिः प्रापणार्थे द्विकर्मकः॥ अत्र पौरुषस्य कर्तृस्थकर्मत्वेप्युपायस्यानयात्वात् क्रोधं विनयत इत्यादिवत्॥ कर्तृस्थचाशरीरे कर्मणि आत्मनेप

२२

पुरुषेण

वि

षड्वर्गविजितक्रोधतया इति तदावश्यकमित्याह ॥ अपनेयमिति ॥ उदेतुमभ्युदेतुमिच्छता राज्ञा पुरः प्रथमं रोषमयं रोषादागतं मयट् निमयट् ॥ तिमिरमज्ञानं धिया वि

प वेकबुद्ध्याकरणेनापनेयमनोद्यम् ॥ तथा हि ॥ अंशुमतापि कर्त्रा प्रभया तेजसा करणेन निशाकृतं तमोऽध्वान्तमभिद्य नोदीयते ॥ किंतु विभिद्यैवेत्यर्थः ॥ सूर्यस्यापि एवं

किमुतान्येषामित्यपिशब्दार्थः ॥ इणो भावे लिट् ॥ ३६ ॥ ननु दुर्बलस्यैवमस्तु बलीयसस्तु क्रोधादेव कार्यसिद्धिरित आह ॥ बलवानिति ॥ बलवान्शूरोऽपि यः कोपाज्ज

प न्मयस्य तस्य कोपजन्मनः ॥ अव्ययीभावबहुव्रीहिर्वैयधिकरण्ये जन्माद्युत्तरपद इति वामनः ॥ तमसो मोहस्य ॥ कर्तृकर्मणोः कृति षष्ठी ॥ अभिभवमाक्रान्तिं न रुणद्धि

कर्मणि षष्ठी ४=

अपनेयमुदेतुमिच्छता तिमिरं रोषमयं धिया पुरः ॥ अविभिद्य निशाकृतं तमः प्रभया नांशुमताप्युदीयते ॥ ३६ ॥

बलवानपि रोषजन्मनस्तमसो नाभिभवं रुणद्धि यः ॥ क्षयपक्ष इवैन्दवीः कलाः सकला हन्ति स शक्तिसंपदः ॥ ३७ ॥

न विचारयति ॥ स नृपः ॥ क्षयस्य पक्षः क्षयपक्षः कृष्णपक्षः ॥ ऐन्दवीरिन्दुसंबन्धिनीः कलाः इव सकलाः ॥ समग्राः शक्तिसंपदः ॥ प्रभुमन्त्रोत्साहशक्तीस्तिस्रोऽपि

नपि हन्ति नाशयति ॥ अंधस्य जंघाबलमिव क्रोधांधस्य लोकोत्तरसामर्थ्यमप्यर्थमेवेत्यर्थः ॥ अत्र कालस्य सर्वकारणत्वात् क्षयपक्षस्य कलाक्षयकारित्वम

त्यपक्षतमसस्तु तत्कालविजृंभणात्तथात्वमपदेशः ॥ ३७ ॥ विमृश्यकुर्वतः क्रियाप्रकारमाह ॥ समेति ॥ यः समानाति मृदुर्नातितिग्मा क्षन्तिर्यस्य स समव

त्तिः ॥ सन्समये सत्यवसरे मार्दवं मृदुवृत्तिमुपैति ॥ तिग्मतां तीक्ष्णवृत्तिं च तनोति ॥ समवृत्तीपतिर्विवस्वानिवौजसा तेजसा ॥ लोकमधितिष्ठति ॥ स्या ॥

॥कि॥का॥टी॥
॥वं॥स॥२॥
॥१०॥
24

आपन्नकालादिना

क्रमति॥ तयोर्गुणानुभेदेन वा समवृत्तिरित्यादि योज्यं॥३८॥ उक्तमन्यथाकरणे निष्टमाह॥ क्वेति॥ श्रियां संपदां चिराय बहुकालं परिग्रहः स्वायत्तीकरणं क्व इंद्रि याण्येव वाजिनोऽश्वा इति समासः॥ दुष्टानाम मार्गधाविनां॥ इंद्रियवाजिनां वश्यता वशंगतः तस्य भावः स्वामकनोभयमेकत्र तिष्ठतीत्यर्थः॥ कुतः॥ हि यस्मात् शरद भ्रवच्चलाश्चचलाः॥ किंच [illegible] बहुच्छला बहुव्याजा बहुर आश इति यावत्॥ छलं तु स्खलिते व्याज इति विश्वः॥ चलेन्द्रियैरजितेंद्रियैरसुरक्षा रक्षितुमशक्य

श्रियः लक्ष्मीः

समवृत्तिरुपैति मार्दवं समये यश्च तनोति तिग्मतां॥ अभिनिष्टति लोकमोजसा स विवस्वानिव मेदनीपतिः॥३८॥

क्वचिरायपरिग्रहः श्रियां क्वच दुष्टेंद्रियवाजिवश्यता॥ शरदभ्रचलाश्चलेंद्रियैरसुरक्षा हि बहुच्छलाः श्रियः॥३९॥

किमसामयिकं वितन्वता मनसः क्षोभमुपात्तरंहसः॥ क्रियते पतिरुच्चकैरपां भवता धीरतयाधरीकृतः॥४०॥

तयाः॥ कथंचित्प्राप्ता अपि श्रियो नाविनीते ष्ठतिष्ठंतीत्यर्थः॥ वाक्यार्थहेतुकं काव्यलिंगमलंकारः॥३९॥ क्रोधस्य दुष्टतामुक्त्वा तन्त्यागमुपदिशति॥ किमि ति॥ उपात्तरंहसः आप्तत्वरस्य मनसः॥ समयोऽस्य प्राप्तः॥ सामयिकस्तदस्य प्राप्तमिति ठक्॥ स न भवतीति॥ असामयिकम प्राप्तकालं क्षोभं॥ वितन्वता भव ता धीरतया धैर्यगुणेन मनसो निर्विकारत्वं धैर्यं॥ सत्त्वपि हेतुष्विति रसिकाः॥ अधरीकृतस्तिरस्कृतः॥ प्रागिति शेषः॥ अपां पतिरपि॥ किं किमर्थमुच्चकै रधिकः॥ क्रियते नेन पराजितं॥ पुनरुच्चकैः कुर्यादिति भावः॥ अत्र वितन्वतेति भीमविशेषणसामर्थ्येन॥ पदार्थस्यात्र [illegible] करणे हेतुत्वोक्त्या काव्यलिंगम

सामयिकः

किराताट्टीका

२४

त्य =१

त्रियं अ कामक्रोधलोभमोहमात्सर्य्यादीन्

ऋतमिति॥ किंच येऋतं शास्त्रमधिगम्यापि शरीरजन्मनः॥ शरीरसंभवान्॥ रिपून् कामक्रोधादीन्नविनयंते॥ ननियच्छंति॥ कर्त्तर्य्येचाशरीरेकर्मणीत्यात्मनेपदं॥ तेखल्वचिराय संपदां॥ चापलाश्रयं स्थैर्य्यनिबंधनमयशो दुःकीर्त्तिं जनयंति॥ आश्रयदोषादस्थैर्य्यं संपदां न स्वदोषादित्यर्थः॥ अजितारिषड्वर्गस्य कुतः संपद इति भावः॥ ४१॥ तथापि क्रोधात्कार्य्यहानिरित्याशयेनाह॥ अतीति॥ अतिपातितानि अतिक्रांतानि कालः समयोनुकूलसाधनानि॥ सहायादीनि येषा तेनतुल्यमिति ४= सानयोक्ता॥ तापयतीति॥ कर्त्तरिल्युट्॥ टित्वान्ङीप्॥ स्वस्य यच्छरीरमिंद्रियवर्गश्च तयोस्तापनी॥ अक्षमा क्रोधोभवंतं जनवत्॥ पृथक्जनमिव॥ नदहमिति

उदितेति

तापिनी ४

अनंतरूपः ३=

ऋतमप्यधिगम्य येरिपून्नविनयंतिनशरीरजन्मनः॥ जनयंति चिराय संपदामयशोतेखलु चापलाश्रयं॥ ४१॥
अतिपातितकालसाधनास्वशरीरेंद्रियवर्गतापिनी॥ जनवत्भवंतमक्षमानयमिक्षरूपनेतुमर्हति॥ ४२॥
उपकारकमायतेर्भृशं प्रसवः कर्मफलस्य भूरिणः॥ अनपायिनिवर्हणं द्विषां नतितिक्षासममस्तिसाधनं॥ ४३॥

वतिप्रसय॥ तेनैवाधीलक्ष्यते॥ तद्धितश्चासर्वविभक्तिरित्यव्ययम्॥ नयस्तिक्रेर्नयसाध्यात्फलात्पनेतुं॥ पृथक्कर्त्तुं नार्हति॥ असमयक्रोधस्यात्मसंतापा तिरिक्तंफलं नास्तीत्यर्थः॥ ४२॥ दुष्टः क्रोधइत्युक्तं॥ अथ तमायागुणागुणानाह॥ उपकारकमिति॥ आयतेरुत्तरकालस्य भृशमत्यंतमुपकारकं॥ स्थिरफल हेतुकमित्यर्थः॥ भूरिणः प्रभूतस्य कर्मफलस्य॥ प्रसूयते नेनेति प्रसवः कारणं॥ अपायो नाशो नास्तीत्यनपायि स्वयमविनश्वरं द्विषां॥ निवर्हणं॥ विनाशकं॥
व

एवंगुणकंसाधनं॥निनिसितम्॥ तमानुत्यंनास्ति॥ सांतिसितिनिसाभिद्याः॥ अिन्यमरः॥ तिजनिशाननइतिधातोर्गुप्तिजकिद्भ्यः सन्निति सामार्थे सन्प्रत्ययः॥ ति
तिक्षासममितिअनुक्तोपमासमासोर्थलुप्तोपमर्थे मा[illegible]मेनयायिशब्दैः॥ साधनांतरवैलक्षण्यात्॥ व्यतिरेकश्चव्यज्यते॥ भेदप्रधान्येन॥ उपमानादुपमेयस्याधि
क्येविपर्ययेचव्यतिरेकः॥४३॥ ननुनितिक्षायाःकालक्षेपेसुयोधनः सर्वान्राज्ञोवशीकुर्यादित्यत्राह॥ प्रणतीति॥ सहजस्नेहेन॥ प्रकृतिमप्रेमणा
निवद्धचेतसोस्मासुगाढलग्नचित्ताः॥ सुयोधनेतुनतथेतिभावः॥ किंच मानभृतां॥ अहंकारिणां॥ प्रथमे॥ अग्रेसराः॥ सुयोनेतुनतथापीतिभावः॥ हस्म

प्रणतिप्रवणान्विहायनः सहजप्रेमनिवद्धचेतसः॥ प्रणमंतिसदासुयोधनंप्रथमेमानभृतांनवृष्णयः॥४४॥
सुहृद्स्सहजास्तथेतरेमतमेषांनविलंघयंतिये॥ विनयादिवयापयंतितेधृतराष्ट्रात्मजमात्मसिद्धये॥४५॥

योयादवाः॥ प्रणतिप्रवणान्॥ प्रणामपरान्॥ सुयोधनस्तुनतथेतिभावः॥ नोस्मान्विहाय॥ सुयोधनंसदानप्रणमंति॥ ननमंति॥ किंतुकालंतत्संत्येवस
र्षः॥ सतियादवविग्रहेनकिंचिदस्माकमसाध्यमितिभावः॥ अनेकपदार्थहेतुकंकाव्यलिंगमलंकारः॥४४॥ सुहृदइति॥ किंच॥ एषांहस्मीनांयेसहजाः सहजा
ताः॥ पितृपक्षास्सपिंडाः॥ अन्येष्वपिदृश्यतेइतिडः प्रत्ययः॥ सुहृदोमित्राणि॥ तथेतरे॥ कृत्रिमसुहृदश्च॥ मतंतदाज्ञापितं॥ नलंघयंति॥ नातिक्रमंति॥ तेहृद्यपिनराः॥
दुर्योधनोपजीविनोपीतिभावः॥ आत्मसिद्धये॥ आत्मजीवनार्थंधृतराष्ट्रात्मजं॥ दुर्योधनंविनयादानुकूल्यादिवयापयंति॥ कालंगमयंति॥ कार्यकालेहासिप

किंचकारणाहेतुमाह॥ उप २८ न४ मातृ२४ कार्य४४

आहवः २=

चोरादि ३=

किंतु नायमभियोगकाल इत्याशयेनाह ॥ अभियोग इति ॥ कृतावधेः परिभाषितकालस्य ॥ अवधिस्त्ववधाने स्यात्सीम्नि काले बिले ऽपि चेति विश्वः ॥ तस्य सुयोधनस्य कर्मणि षष्ठी भवता ह्यतः ॥ अवधि इतिशेषः ॥ अभियोगः आर्द्राभिमान इति यावत् ॥ अभियोगस्तु शपथे स्याद्दोहे चापराभवे इति विश्वः ॥ इमान्सर्वोन्क्रान् ॥ महीभुजो राज्ञः ॥ हरिदश्वस्तु सूर्यः रश्मिकमलाकरानिव समुत्पतन्नुद्यन्नेव प्रविघाटयिता ॥ भेत्स्यति ॥ घटयतेर्भौवादिकस्य लुट् ॥ चौरादिकस्य तु मितां ह्रस्व इति ह्रस्वत्वं स्यात् ॥ ४६ ॥ अप्यनयेह्य क्षिपत्याशक्यामाह ॥ उपजापइति ॥ मदोद्धतः ॥ स दुर्योधनो नृपतीनन्यान् नृपान् ॥ विलंघयन् ॥ मर्यादवमानयन् ॥ सहतं इति सहाः ॥ पचाद्यच् ॥ उपजापस

अभियोग इमान्महीभुजो भवता तस्य ततः कृतावधेः ॥ प्रविघाटयिता समुत्पतन्हरिदश्वः कमलाकरानिव ॥ ४६ ॥ उपजापसहान्विलंघयन्स विधाता नृपतीन्मदोद्धतः ॥ सहते न जनोऽप्यधःक्रियां किमु लोकाधिकधाम राजकं ॥ ४७ ॥ असमापितकृत्यसंपदां हतवेगं विनयेन तावता ॥ प्रभवंत्यभिमानशालिनां मदमुत्तंभयितुं विभूतयः ॥ ४८ ॥

हान् भेद्ययोग्यान् ॥ भेदोपजापावित्यमरः ॥ विधाता ॥ विधास्यति ॥ दधातेर्लुट् ॥ अवमानितो जनः सुभेद्य इति भावः ॥ न च ते सहिष्यंत इत्याह जनः प्राकृतोऽप्यधः क्रियामपमानं न सहते ॥ लोकाधिकधाम लोकोत्तरप्रतापं ॥ राजकं ॥ राजसमूहः ॥ गोत्रोक्षोष्ट्रेत्यादिना वुञ्प्रत्ययः ॥ किमु सहत इति किमुवक्तव्यमित्यर्थः तथा सति कृत्स्नमेव राजमंडलमस्मानेव आलंबिष्यत इति भावः ॥ ४७ ॥ ननु सखीनिवेत्यादि वनेचरोक्तरीत्या तस्य मदसंभावना कथमित्यत्राह ॥ असमापित इति ॥ असमापितकृत्यसंपदां ॥ असमाप्तकृत्यानां ॥ अतोऽभिमानशालिनां ॥ अहंकारिणां विभूतयः ॥ संपद इव ॥ तावता ॥ स्वल्पेन ॥ विनयेन कार्यै

अवितुन

अपरागो प्रीतिद्वेष इति यावत्

॥कि॰ का॰ टी॰॥
॥ग्रं॥ स॰॥ २॥
॥१२॥
26

अथ मदस्यानर्थहेतुतां युग्मेनाह ॥ मद इति ॥ अपराग इति ॥ युग्मं ॥ मदमानाभ्यां दर्पाहंकाराभ्यां समुद्धतं नृपं मूढता कार्य्यापरिज्ञानत्वं नियमेनावश्यं न वियुंक्ते ॥ न विमुंचति ॥ अति मूढो नयान्नीतिमार्गादुदस्यते ॥ उत्क्षिप्यते ॥ कर्मकर्त्तरि लट् ॥ नयहीनाज्जनोऽपरज्यते ॥ विरक्तो भवति ॥ स्वरितेत्वादात्मनेपदं ॥४९॥ अपरागसमीरणेरितः ॥ क्रमशीर्णाकुलमूल संततिः ॥ सुकरस्तरुवत्सहिष्णुना रिपुरुन्मूलयितुं महानपि ॥ अपरागो प्रीतिद्वेष इति यावत् ॥ समीरणः श्वसनेनेरितः क्षोभितः ॥ अत एव क्रमेण शीर्णा भग्ना आकुला चलाच मूल संततिः ॥ प्रकृत्यादिः स्वजनवर्गः शिफासंघातश्च यस्य स तथोक्तः ॥ मूलं वशीकृते नसस्य शिफा वृत्ताणि कादिष्विति वैजयंती ॥ रिपुर्महानपि तरुवत् ॥ सहस्व सहिष्णुना

मदमानसमुद्धतं नृपं न वियुंक्ते नियमेन मूढता ॥ अतिमूढ उदस्यते नयान्नयहीनादपरज्यते जनः ॥४९॥ अपरागसमीरणेरि तः क्रमशीर्णाकुलमूलसंततिः ॥ सुकरस्तरुवत्सहिष्णुना रिपुरुन्मूलयितुं महानपि ॥५०॥ अणुरप्युपहंति विग्रहः प्रभुमं तः प्रकृतिप्रकोपजः ॥ अखिलं हि हिनस्ति भूधरं तरुशाखांतनिघर्षजोऽनलः ॥५१॥ क्षमावता ॥ उन्मूलयितुमुद्धर्तुं सुकरः ॥ सुसाध्यः ॥ सुक रोन्मूलन इत्यर्थः ॥ अत्र मदादेः पूर्वस्योत्तरं प्रतिकारणत्वात्कारणमालात्तद्वत् उपमा चेति द्वयोः संसृष्टिः ॥५०॥ अणुरिति ॥ अणुरल्पोऽप्यंतः ॥ प्रकृतिप्रकोपजोऽतरंगा मात्याद्यपरागसमुत्थः ॥ प्रकृतिः पंचभूतेष्वस्वभावे मूलकारणे ॥ छंदःकारणगुणेषु जंतवेमात्यादिष्विति वैजयंती ॥ विग्रहो वैरं प्रभुमुपहंति ॥ नाशयति ॥ अत्र दृष्टांतमाह ॥ तरुशाखांतानां निघर्षो निघर्षणं ॥ तज्जोऽग्निर्भूधरं गिरिमखिलं ॥ साकल्येन हिनस्ति दहतीत्यर्थः ॥ तत्रोपमानोपमेयसमानधर्माणां ॥ बिंबवत्तया निर्देशो दृष्टांतालंकारः ॥५१॥

तत्त्वं तत्र भेदमात्रेण क थं सुसाध्यस्तत्राह ॥५२॥

के

न

२६

तथापि कथं वर्द्धमानं शत्रुमुपेक्षेतेत्याशंक्य दुर्विनीतत्वादित्याह ५१

त्यजतीति

मतिमानिति ॥ मतिमान्नृप्रज्ञो विनयं प्रमथ्नातीति वि[illegible]नयप्रमाथिनो दुर्विनीतस्य द्विषः समुन्नतिं वृद्धिमुपेक्षेत ॥ उपेक्षायाः फलमाह ॥ तादृगविनीतोंतरे छिद्रे व्यसने सु

खलु — जयः सुखेन जेतुं शक्यः ॥ हि यस्मादविनीतसंपदो विपदंताः ॥ अनर्थोत्पादकाः ॥ ५२ ॥ कथं दुर्विनीतस्य शत्रोः सुजयत्वं इत्याशंक्य भेदजर्जरितत्वादित्याह ॥ लाघवेति ॥ लघु

वृत्तितया स्वस्य दुर्हतरूपतया बहिर्मित्रादिजनपदेषु ॥ अंतरमात्यादिषु च भिदां भेदं गतं ॥ षिद्भिदादिभ्योऽङ् इत्यङ्प्रत्ययः ॥ नृपस्य मंडलं राष्ट्रमनंतरः ॥ संनिहितो जिगीषुरापगा

रयो नदीवेगः ॥ शिथिलमंतर्भेदजर्जरं ॥ कूलमिवाभिभूयाक्रम्य हरति ॥ ५३ ॥ अन्विति ॥ इतीत्थमाकुलं ॥ अरिनिकारस्मरणात् क्षुभितमर्जुनाग्रजं ॥ भीमसेनं नयव

मतिमान्विनयप्रमाथिनः समुपेक्षेत समुन्नतिं द्विषः ॥ सुजयः खलु तादृगंतरे विपदंता ह्यविनीतसंपदः ॥ ५२ ॥ लघुवृ

त्तितया भिदां गतं बहिरंतश्च नृपस्य मंडलं ॥ अभिभूय हरत्यनंतरः शिथिलं कूलमिवापगारयः ॥ ५३ ॥ अनुशासि

तमित्यनाकुलं नयवर्त्माकुलमर्जुनाग्रजं ॥ स्वयमर्थ इवाभिवांछितः तमभीयाय पराशरात्मजः ॥ ५४ ॥

मार्गमनाकुलं

त्य ४१ — र्त्मनीति मनाविलमसंकीर्णं यथा तथा ॥ अनुशासतं ॥ उपदिशंतं ॥ जक्षित्यादयः षडिभ्यस्त संज्ञा ॥ नाभ्यस्ताच्छतुरिति नुमभावः ॥ तं युधिष्ठिरं पराशरात्मजो वेदव्यासः ॥ स्वयमभिवां

छितोर्थ इव साक्षात्मनोरथ इवेत्युत्प्रेक्षा ॥ अभीयायाभ्याजगाम ॥ ५४ ॥ अथ युग्मेनाह ॥ मधुरेति ॥ सह सेति युग्मम् ॥ मधुरैः शांतैर्निरीक्षितैरवलोकनैः ॥ नपुंसके भावे क्तः ॥ नुवियते

वशं ॥ आयत्तत्वं येषां तान्यवशानि प्रतिकूलानि ॥ वशस्यायत्ततायां चेति किप्त्वः ॥ तिर्यंचि मृगपक्षादीनि शमं शांतिं लंभयन् ॥ प्रापयन् ॥ लभेश्चेति नुमभावः ॥ गत्यर्थेत्यादि

परी — नाद्विकर्मकत्वं ॥ पटुउज्ज्वलं ॥ एनसां दहतीति दहनं ॥ निवर्त्तकं ॥ तथापि विलोचनसमं ॥ दर्शनसमं ॥ ब्रह्मादिविलक्षणमिति भावः ॥ धाम्न तेजो बिभ्रत् ॥ ५५ ॥

चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः इत्यमरः ४०

पुनः अर्कस्मादागतः

सहसेति॥ सहसोपगतः॥ सविस्मयं॥ तपसां सूतिः प्रभवः॥ एनसां आपदां अप्रसूतिरप्रभवः॥ निवर्त्तकश्चेति यावत्॥ स मुनिर्व्यासः॥ वपुष्मान्देहधारी॥ पुण्यसंचयः पुण्यराशिरिवेत्युत्प्रेक्षा॥ जगतीभुजा सविस्मयं ददृशे दृष्टः॥ ५६॥ अथेति॥ अथ दर्शनानन्तरमुच्चैकैरुन्नतात्पराध्यात् [illegible] आसनात्॥ अर्घ्येण च परावरार्धमनिमर्घ्यं वाचेति यस्य तथा॥ आसनतः सिंहासनात् उदयन्नुत्तिष्ठन्॥ अत एव धृतानि कपिशानि अरुणानि वल्कलाग्राणि यस्य स तथोक्तः॥ स नृपः॥ कीर्णं विसृतं॥ आकपिशमंशुजालं यस्य स तथोक्तः॥ सुमेरोः शृङ्गात् उदयन्॥ निगमरश्मिरिव रराज॥ ५७॥ अवहितेति॥ स अवहितहृदयः॥ अप्रमत्तचित्तः सन्॥ ऋषिप्रवरे मुनिश्रेष्ठे॥ ऋषिवदर्हां॥ अर्हां पूर्ववत्प्रसयः॥

मधुरैरवशानि लम्भयन्नपि तिर्यञ्चि शमं निरीहितैः॥ परितः पटुबिभ्रदेनसां दहनं धाम विलोकनक्षमं॥ ५५॥ सहसोपगतः सविस्मयं तपसां सूतिरसूतिरेनसां॥ ददृशे जगतीभुजा मुनिः स वपुष्मानिव पुण्यसंचयः॥ ५६॥ अथोच्चकैरासनतः पराध्यादुद्यन्स धूतारुणवल्कलाग्रः॥ रराज कीर्णाकपिशांशुजालः शृङ्गात्सुमेरोरिव घर्मरश्मिः॥ ५७॥ अवहितहृदयो विधाय सोऽर्हामृषिवदृषिप्रवरे गुरूपदिष्टां॥ तदनुमतमलंचकार पश्चात्प्रशम इव श्रुतमासनं नरेन्द्रः॥

गुरूपदिष्टां शास्त्रीयामित्यर्थः अर्हां पूजां गुरोश्च हल इत्यकार प्रत्ययः २

विधाय पश्चादनन्तरं॥ तदनुमतं॥ तेनानुमतमनुज्ञातमासनं प्रशमः॥ शान्तिः॥ श्रुतं॥ शास्त्रश्रवणमिव॥ अलंचकार॥ शोभयत॥ उक्तं च॥ प्रशमस्तस्य भवत्यलंक्रियेति॥ पुनर्नृपस्तया॥ उपविष्टवानित्यर्थः॥ ५८॥ व्यक्तोदितेति॥ व्यक्तोदितैः॥ स्फुटोद्गतैः॥ स्मितमयूखैः॥ विभासिता वाक् यस्य स तथोक्तः॥ विकीर्णधाम्नः॥ विसीर्ण तेजसः॥ मुनेरभिमुखं तिष्ठन्॥ स नृपः॥ रुद्धं दीप्तमंशुजालं॥ तन्वतं गुरुं॥ गीष्पतिं॥ गुरुर्गीष्पतिः॥ गीष्पतिर्धिषणो गुरुरित्यमरः॥ अभितः परितः इत्यादिना

स नृपः कीर्णं विलूतं आकपिशं अंशुजालं यस्य स तथोक्तः

स
त
व

त्तिगत्तिषत्तिवात्तिस्त्वं परापगपत्लीपपा मापधापरपश्चात्तु उतिराति सुतिविते॥१॥

त्तैं गे त्तैं षे त्तैं वो त्तैं वों
पै रो पे गे पे ली पे पों
मो पे धो प र् पे श्चो तु
उ तैं रो ति सु त्तैं वि त्तैं
रेखा:१२

मोमापममममाहंहे हयागहूलनंभबाः ३ त्येत्येवंविजानीयात्सत्यातिपरमांगतिं॥१॥

मो मा रो म म मा हं है
हे यो गे हे ले नें भ बो

गरुड तिष्ठ वैभव
विरांजराजपुत्रारितन्नामचतुरक्षरं
पूर्वार्द्धं तव शत्रूणां परार्द्धं तव वेश्मनि॥१॥
मृत्युंजय॥ शत्रूणांमृत्युः॥तवजयःराजन्

द्वितीयया ॥ अभितोभिमुखं तिष्ठत इति शेषः ॥ सकलस्य संपूर्णस्य शशांकमूर्त्तेर्यस्य ॥ तस्येंदोर्लक्ष्मीमुवाह वहति स्म ॥ अत्रोपमेयस्य राज्ञ उपमानेन्दुधर्मेणालक्ष्म्याः संबंधासंभवात् ॥ तस्य सदृशीं लक्ष्मीमिवेति ॥ विम्वकरणाद्संभव वस्तुसंबंधा पदार्थगति निदर्शनालंकारः ॥ तदुक्तं ॥ प्रतिविंवस्य तु करणं संभव नियत वस्तु योगे

प्रक्रोदितः शिव स्मितमयूखविभासितोष्टाप्तिष्ठन्मुनेरभिमुखं सविकीर्णधाम्नः ॥ तन्वंतमिद्धमभितोगुरुमंशुजालं लक्ष्मीमुवाह सकलस्य मृगांकमूर्त्तेः ॥ ५९ ॥ इति श्री किरातार्जुनीये महाकाव्ये लक्ष्मपंके भारवीकृतौ द्वितीयः सर्गः ॥ ॥

असंभविता
ना ॥ गम्यदसन्नवता वा ॥ निदर्शनासाद्विधाभिमतेति ॥ ५९ ॥ इति श्रीमहामहोपाध्याय श्रीमल्लिनाथसूरि विरचितायां किरातार्जुनीय टीकायां घंटापथसमाख्यायां द्वितीयः सर्गः ॥ २ ॥ संवत् १९३७ कार्त्तिक शुक्ला द्वितीयायां समाप्तिमगमत् लिपितं गिरधारीणा स्वार्थं वा परार्थं ॥ शुभमस्तु श्रीजगदंवरूप ॥

कृत्वा मेरुमु स्वखलं सुरपतेर्हन्द्रेन दिग् यांषितौ स्वर्गगामुशाल्लेनशालयश्वं त्वत्कीर्तयः कौडिनाः नास्तांराशिरसै स्तुषमशिखरी स्तारा: गणास्तत्करणाः प्रोद्यत्स्वर्गसुधांशुरिव मस्मरणो यो त्वत्तां चवत्तत्पांशावः ॥१॥

सटीककिरातस्य तृतीयःसर्गः पत्रसंख्या ११

नवविकसितायशोहिमदीधितौ सतुलयन्नतुलयाकमलसिनः द्विजविलोकपयोधिकुमोरुवंहिपतिभाति ततः कमतः किमु ॥१॥

कि॰टी॰
टी॰न॰३
१

ॐ श्रीगणेशाय नमः ॥ अथ त्रिभिः मुनिं विशिनष्टि चतुर्भिः कलापकमाह ॥ द्वाभ्यां युग्ममिति प्रोक्तं त्रिभिः श्लोकैर्विशेषकं ॥ कलापकं चतुर्भिः स्यात्तदूर्ध्वं कुलकं स्मृतमिति ॥१॥ ततः इति ॥ ततः रूपदेशनानंतरं ॥ धर्म्मात्मजो युधिष्ठिरः ॥ शरच्चंद्रकरा इवाभिरामैः आह्लादकैरुत्सर्पिभिः ऊर्द्ध्वप्रसारिभिरंशुजालैः प्रांशुमुन्नतमिव स्थितमित्युत्प्रेक्षा ॥ पुनः आनीलरुचं ईषत्कृष्णवर्णं ॥ पिशंगीः ॥ पिंगलवर्णाः ॥ गौरादित्वात् ङीष् ॥ जटा विभ्राणं धारयंतं ॥ अत एव ॥ तडित्वंतं विद्युद्युक्तं ॥ अंबुवाहमिव स्थितमित्युत्प्रेक्षा ॥१॥

संपर्द४=
२१

प्रसादेति ॥ पुनः समग्रां संपूर्णां ॥ प्रसादः सौम्यता तस्य लक्ष्मीं शोभां दधतं ॥ अत एव जनमतिगच्छतीति जनातिगेन लोकातिशायिना ॥ अनेनापत्रापिहृप्यतइति

ततः शरच्चन्द्रकराभिरामैरुत्सर्पिभिः प्रांशुमिवांशुजालैः ॥ विभ्राणमानीलरुचं पिशंगीर्जटास्तडित्वंतमिवांबुवाहं ॥१॥

तं १

प्रसादलक्ष्मीं दधतं समग्रां वपुःप्रकर्षेण जनातिगेन ॥ प्रसह्य चेतःसु समासजंतमसंस्तुतानामपि भावमार्द्रं ॥२॥

स्तुस २=

अनुद्धताकारतया विविक्तां तन्वंतमन्तःकरणस्य वृत्तिं ॥ माधुर्यविस्रंभविशेषभाजा कृतोपसंभाषमिवेक्षितेन ॥३॥

व्यासोय १=

वपुःप्रकर्षेण आकारसंपदा ॥ असंस्तुतानां अपरिचितानामपि ॥ अयं सोदर्यमित्यजानतामपीत्यर्थः ॥ संस्तवः स्यात्परिचय इत्यमरः ॥ चेतःसु चित्तेषु आर्द्रं स्नेहार्द्रभावमभिप्रायं प्रसह्य बलात् समासजंतं लगयंतमिति यावत् ॥ दंशसंजस्वजां शपीत्युपधालोपः ॥ प्रसन्नाकारेषु सर्वोपि स्निह्यतीति भावः ॥२॥

भावं २४
स्प ३४
पुन: ४

अनुद्धतेति ॥ पुनः अनुद्धताकारतया शांताकारतया लिंगेन अंतःकरणस्य वृत्तिं ॥ विविक्तां पूतामिति यावत् ॥ विविक्तौ पूतविजनावित्यमरः ॥ तन्वंतं प्रकटयंतं ॥ आकृतरेवास्य चित्तशुद्धिं कथयतीत्यर्थः ॥ माधुर्यं निसर्गसौम्यता ॥ विस्रंभो विश्वासः ॥ तयोर्विशेषमतिशयं भजतीति ॥ तथाभूतेनेक्षितेन दर्शनेनैव कृता उपसंभाषा संभाषणं येन तमिवेत्युत्प्रेक्षा ॥ दृष्टिविशेषेणैवायं संभाषणमिव स्थितमित्यर्थः ॥ काशिकायां तु उपसंभाषणं उपसांत्वनमिति भाषणादिस्

शांतां

२९

धर्म्मात्मजो युधिष्ठिरः ट
तादृशं मुनिं भावभावे इति
चतुर्थ श्लोकेनान्वयः
३४

तं ३४

त्वं १

कारसंगः५
ग्रावभाषेउवाच
रवात्ररजोधूलिरन्यत्र
गुणः ४–

धर्मात्मजेति॥ पुनः धर्मनिवध्नंती धर्मनिवंधिनामाम्निहोत्रादिधर्मप्रतिपादिकानां॥ एनःप्रणुदां अघच्छिदां क्विप्॥ श्रुतीनां वेदानां॥ श्रुतिस्त्री वेद आम्नायइत्यमरः॥
प्रसूतिं प्रभवं॥ सुखेनोपविष्टं॥ मुनिं तदभ्यागमने तस्य मुनेरागमने हेतुं परीप्सुः जिज्ञासुः॥ आप्नोतेः सनंताडुःप्रत्ययः॥ आप्ज्ञप्यृधामीदितीकारः॥ अत्रलोपो
भ्यासस्येति अभ्यासलोपः॥४॥ कुलकम्॥ अनाप्तेति॥ अनाप्तपुण्योपचयैः अकृतपुण्यसंग्रहैः॥ दुरापा दुर्लभा॥ मलस्य सविश्री श्रेयस्करी॥ निर्धूतरजाः हतरजोगु
णाः अन्यत्र निरस्तधूलिः॥ रजोरजोगुणेधूलौ परागार्त्तवयोरपि इतिशर्म्मितः॥ एषा भवद्दर्शनस्य संपत्तिर्लाभ इतियावत्॥ संपदादिक्विपो भावार्थत्वात्॥ वीतवलाहका

धर्मात्मजो धर्मनिवंधनीनां प्रसूतिमेनःप्रणुदां श्रुतीनां॥ हेतुं तदभ्यागमने परीप्सुः सुखोपविष्टं मुनिमावभाषे॥४॥
अनाप्तपुण्योपचयैर्दुरापा फलस्य निर्धूतरजाः सवित्री॥ तुल्या भवद्दर्शनसंपदेषा वृष्टेर्दिवो वीतवलाहकायाः॥५॥
अवाक्क्रियाः कामदुघाः क्रतूनां सत्याशिषः संप्रति भूमिदेवाः॥ आसंसृतेरस्मि जगत्सु जातस्त्वय्यागते यद्बहुमानपा

या निर्मेघादिवो न दिवः संवंधिन्याः वृष्टेस्तुल्या इत्युपमालंकारः॥ अनभ्रवृष्टिवदत्र किंतोपपन्नं भवद्दर्शनं मर्वपाकसविन्न॥ अयमोनिदानमित्यर्थः॥ वारिव
हंतीति वलाहकाः पृषोदरादित्वात्साधुः॥५॥ अवेति॥ अधकृत्त्वानां क्रियाः अनुष्ठानानि कामान्दुहंतिश्रिति कामदुघाः फलदा इत्यर्थः॥ दुहेः कप्घश्चेति कः प्रत्ययः॥
वादेशश्च॥ संप्रत्यधभूमिदेवा ब्राह्मणाः॥ जन्मभूदेवबाडवा इत्यमरः॥ सत्याशिषो ब्राह्मणाशिषो अवधफलिता इत्यर्थः॥ मधतः कारणात् त्वय्यागते सति त्वदा
गमनेन निमित्तेनेत्यर्थः॥ आस्मि अहमित्यर्थेव्ययम्॥ अस्मीत्यस्मदर्थानुवादे अहमर्थेपीति गणव्याख्याने॥ दासे कृतागसि भवत्युचितः॥ प्रभूणां पादप्रहार
इति सुंदरीणां स्निग्धे इति प्रयोगश्च॥ आसंसृतेः संसारात् यावत्संसारमित्यर्थः॥ अभिविधावाङ् विकल्पाद् समासः॥ जगत्सु बहुमानपात्रं पात्रः॥ सकलसत्त्वेम

बहुपोम्पता भाजनं
द्विजात्यग्रजन्मभूदेवबाडवा विप्रश्च ब्राह्मणा इत्यमरः२

खेदं
खेदं त्यक्त्वा वं धावेदह ४४   किं न धत्ते ५   अवगा ष्यदशातिः
कि॰ टी॰   आविफलं   घो
वं॰ स॰ ३

श्रियं इति॥ आत्मयोनेर्ब्रह्मण इव॥ लोकगुरोस्तव अमोघं अविकलं संदर्शनं श्रियं विकर्षति आकर्षति॥ अघानि दुःखान्यपहंति॥ अघो दुःखव्यसनेष्वघ
मित्यमरः॥ श्रेयः पुरुषार्थं॥ पुरुषार्थं परिद्योतिस्यवति॥ कीर्तिं तनोति॥ बहुना किं न करोति सर्वं करोतीत्यर्थः॥ ७॥ क्षमातदिति॥ हे भगवन्॥ क्षमातन्मयूखैः
सुधास्वाविकरे॥ हिमद्युता विंशवपिविषयेन निर्वृत्तं अनिर्वृत्तं॥ नञर्थस्य नशब्दस्य सुप्सुपेति समासः॥ मे चक्षुस्त्वत्सन्निधौ निर्वृतिं सुखमेति तथा चेतश्च॥ समुज्झि
तज्ञाति वियोगदुःखं समुच्छ्वसतीव त्वदुपरोधेन प्राणितीवेत्युत्प्रेक्षा॥ [illegible]॥ पूर्वार्द्धे तु निर्वृति कारणसत्त्वपीन्दुः [illegible] व [illegible] निर्वृति कथनाद्विशेषोक्तिः॥

श्रियं विकर्षत्यपहंत्यघानि श्रेयः परिस्त्योतितनोति कीर्तिं॥ संदर्शनं लोकगुरोरमोघं तवात्मयोनेरिव किं न धत्ते॥ ७॥ क्षमातन्मयूखेपि हिमद्युतौ मे न निर्वृतं निर्वृतिमेति चक्षुः॥ समुज्झितज्ञातिवियोगखेदं त्वत्सन्निधावुच्छ्वसतीव चेतः॥ ८॥ निरास्पदं प्रश्नकुतूहलित्वमस्मास्वधीनं किमु निस्पृहाणां॥ तथापि कल्याणकरी

तदुक्तं तत्सामग्राम निर्वृति विशेषोक्तिर्निगद्यत इति॥ ८॥ निरास्पदमिति॥ प्रश्नकुतूहलित्वं निरास्पदं॥ आगमनप्रयोजनप्रश्नो निरास्पद इत्यर्थः॥ आ
स्पदं प्रतिष्ठायामिति निपातः॥ प्रश्नानवकाशे हेतुमाह॥ निस्पृहाणां युष्मद्दृशामिति शेषः॥ अस्मास्वधीनं आयत्तं किमु [illegible] न किंचिदस्मनो [illegible] लभ्यमित्यर्थः
आधारत्वविवक्षायां सप्तमी॥ तथापि कल्याणकरी मम स्मादिनैके हेतुमित्यर्थः॥ निस्पृहवृत्तेः पारार्थ्यादिति भावः॥ कृञो हेतु इत्यादिना टप्रत्यये ङीप्॥ अन्तस्ते
गिरं श्रोतुं इच्छामि वागस्मात्वीति मुखरो निरंतरभाषी॥ [illegible] मुखकुंजेभ्यो रेवक्रम्य इतिरप्रत्ययः॥ दुर्मुखे मुखरावद्ध मुखावित्यमरः॥ तत श्रु प्रत्ययः॥ मुख

२ धातूनामने कार्थत्वापारी त्यौतीतिपाठे स एवार्थः २४
३०
खे
त्त ३
इवं
गिरं ३
३

इतीति॥ इतीत्युक्तिविशेषरम्यमुक्तिवैचित्र्यचारुत्वयथा तथोक्तवान्॥ उदारचेता महात्मना॥ नरेन्द्रो द्वैपायनेन व्यासेन॥ द्वीपमयनं स्थानं जन्मभूमिर्यस्य सः द्वीपायनः प्रज्ञादिभ्यश्चेति स्वार्थे अण् प्रत्ययः॥ नापत्यार्थे नडादिभ्यः फक्॥ तेष्वेव पाठान् बोधितार्थत्वाच्च॥ जयोपपत्तौ मनः समाधाय जयसिद्धिमपेक्ष्येत्यर्थः॥ इति वक्ष्यमाणप्रकारामुदारामर्थवतीं गिरमभिदधे उक्तः॥ दुहादित्वादप्रधाने कर्मणि लिट्॥ प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्॥ अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः

ताभंग ४४

इति वचनात् ॥२९॥ आदौ तावत्स्वस्य माध्यस्थ्यदोषं युग्मेन परिहरति॥ चिकीर्षतामिति॥ खल्वधीगुर्वी वानोगुणवचनादिति ङीप्॥ यशोवतेऽसां कीर्तिभूषणं उभयत्र च इहामुत्र च भूतिं श्रेयः चिकीर्षतां चेन्नु संग्रहीतुमिच्छतां विनेतेः सनंतात्तशात्त्र प्रत्ययः॥ जन्मवतां शारीरिणां॥ वंधुषु विषये॥ तुल्यरूपा हन्ति एके

इत्युक्तवानुक्तिविशेषरम्यं मनः समादाय जयोपपत्तौ॥ उदारचेता गिरमित्युदारां द्वैपायनेनाभिदधे नरेन्द्रः॥२९॥

चिकीर्षतां जन्मवतामलघ्वीं यशोवतंसामुभयत्र भूतिं॥ अभ्यर्हिता वंधुषु तुल्यरूपा हन्ति विशेषेण तपोधनानां॥३०॥ तथापि निघ्नं नृप तावकीनैः प्रह्वीकृतं मे हृदयं गुणौघैः॥ वीतस्पृहाणामपि मुक्तिभाजां भवंति भव्येषु हि

न्ह ४

विशार्हत्निर्व्यवहारोऽभ्यर्हिता उचिता॥ तपोधनानां त्वसादृशं विशेषेण नियमेनाभ्यर्हिता॥३०॥ तथापीति॥ तथापि तुल्यदृशो वित्तेऽपि तावकीनैः त्वदीयैः॥ युष्मदस्मदोरन्यतरस्यां खञ्चेति खञ् प्रत्ययः॥ तवकममकावेकवचनेति तवकादेशः॥ गुणौघैः प्रह्वीकृतं आवर्जितं मे हृदयं निघ्नं त्वदायत्तं॥ अधीनो निघ्न आयत्त इत्यमरः॥ ननु निःस्पृहस्य कोऽयं पक्षपात इत्यत्राह॥ वीतेति॥ वीतस्पृहाणां वीतरागिणां मुक्तिभाजां मुमुक्षूणामपीत्यर्थः॥ भवंतीति भव्याः साधवः॥ भव्यगेयेत्यादिसूत्रेण कर्तरि निपातः॥ तेषु पक्षपाताः स्नेहा भवंति॥ न तु साध्वनुग्रहो महतां माध्यस्थ्यभंजक इति भावः॥ ३१॥

हेन्त ५४

विरक्तानां

सुतानकिं १४   ऽपांति तानहातिरयापादि मिः १४

कि॰टी॰
यं॰सर
३
३१

अथ नृपस्य गुणवत्तां प्रकटयिष्यन् धृतराष्ट्रस्य दुश्चेष्टामुद्घाटयति ॥ सुता इति ॥ यूयं तस्य राज्ञो धृतराष्ट्रस्य सुतानकिमु सुता एवेत्यर्थः ॥ गुणैः सुयोधनं नातीता नातिक्रांता वा अतीता एवेत्यर्थः कर्त्तरि क्तः ॥ असुतत्वमगुणत्वं च त्यागे हेतुः युष्मासु नास्तीत्यर्थः ॥ उपालंभे कारणमाह ॥ य इति ॥ यः धृतराष्ट्रो वो युष्मान् त्यक्त्वा निष्कारणमेव त्यक्तवान् ॥ यदि वयं सुताः गुणाधिकाश्च कथमत्याक्षीत्तत्राह ॥ वलाद्धेति ॥ विषयाभिलाषो भोगतृष्णा वलाद्धा वलादिव ॥ वास्यात्ययानि धार्यं पिसमुच्चये इति विश्वः ॥ मोहमविवेकं विधत्ते विषयाभिलाषातिरिक्तो न कश्चित्त्यागे हेतुरस्तीत्यर्थः ॥ अत्र कारणेन कार्य्यसद्धिकल्पोपमयोरिवार्थेपिसमुच्चये इति विश्वः ॥

सुतान यूयं किमु तस्य राज्ञः सुयोधनं वा न गुणैरतीताः ॥ यस्त्यक्तवान्वः स वृथा वलाद्धा मोहं विधत्ते विषयाभिलाषः ॥ २४ ॥ जहातु नैनं कथमर्थसिद्धिः संशय्य कर्णादिषु तिष्ठते यः ॥ असाधुयोगो हि जयांतरायः प्रमाथिनीनां विपदां पदानि ॥ २४

मर्थन रूपोऽर्थांतरन्यासः ॥ २३ ॥ अथ राज्ञः उत्साहवर्द्धनाय शत्रोर्हानिं सूचयति ॥ जहात्विति ॥ एनं धृतराष्ट्रं ॥ अर्थसिद्धिः कथं न जहातु जहात्वेवेत्यर्थः ॥ प्रेषातिसर्गप्राप्तकालेषु कृत्याश्च इति प्राप्तकाले लोट् ॥ हानिकालः प्राप्त इत्यर्थः ॥ कुतः धृतराष्ट्रः संशय्य संदिह्य कर्णादिषु तिष्ठते कर्णादीन् दुर्मंत्रिणः संदिग्धार्थनिर्णेतृत्वेनावलंवत इत्यर्थः ॥ प्रकाशनस्थेयाख्ययोश्चेति स्थेयाख्यायामात्मनेपदं तिष्ठत्यस्मिन्निति स्थेयः ॥ विवादपदनिर्णेता ॥ तथाहि असाधुयोगाः दुर्जनसंसर्गः ॥ जयांतरायाः जयविघातकाः ॥ किंच ॥ प्रमाथिनीनां उन्मूलनशीलानां विपदां पदानि स्थानानि ॥ पदं व्यवसितित्राणस्थानलक्ष्मांघ्रिवस्तुष्वित्यमरः ॥ न केवलमर्थहानिः

वलात्कार इव स्व युष्मान् ४४   त्यक्तवान् ४

तस्य २४

जय १८

कि॰ टी॰

तु१=

मार्गान्तरात्प्राप्यां

एवं शत्रोरनर्थं सूचयित्वा राज्ञोर्थसिद्धिं सूचयति ॥ पथश्च्युता इति ॥ रिपूणां समितौ सभायां ॥ सभा समिति संसद इत्यमरः ॥ पथश्च्युतायां दुरात्मनो दुःशासनस्य स्त्रीसंग्रहसाहसमंगीकृतवत्यामित्यर्थः ॥ चिराय धर्म्यां धर्मादनपेतां ॥ धर्मपथ्यर्थन्यायादनपेत इति यत्प्रत्ययः ॥ धुरं भारं दधानेन ॥ कृच्छ्रेष्वपि धर्मादचलतेत्यर्थः ॥ त्वया विपत्स्वपि अविपत्तिः अविनाशि अत एव रम्यं ॥ गुणेषु क्षान्त्यादिषु विषये परमुत्कृष्टं प्रेम आविष्कृतं दुःसहमपि भवता त्वया साधु कृतमिति भावः ॥२५॥ विधायेति ॥ किंच शम एव एका मुख्या वृत्तिर्यस्य तस्य अपरोपतापिन इत्यर्थः ॥ भवतः छलेन कपटेन ॥ आत्मने हितं आत्मनीनं सन्न भवतीति आत्मनीनः ॥ स्वस्यैवानर्थहेतुरित्यर्थः ॥ तं आत्मन् विश्वजनभोगोत्तरपदात्खः इति खप्रत्ययः ॥ विध्वंसमपकारं विधाय ॥ प्रकाशितः प्रख्यापि

पथश्च्युतायां समितौ रिपूणां धर्म्यां दधानेन धुरं चिराय ॥ त्वया विपत्स्वप्यविपत्तिरम्यमाविष्कृतं प्रेम परं गुणेषु ॥२५॥

विधाय विध्वंसमनात्मनीनं शमैकवृत्तेर्भवतः छलेन ॥ प्रकाशितत्वन्मतिशीलसाराः कृतोपकारा इव विद्विषस्ते ॥२६॥

लभ्या धरित्री तव विक्रमेण ज्यायांश्च वीर्यास्त्रबलैर्विपक्षः ॥ अतः प्रकर्षाय विधिर्विधेयः प्रकर्षतंत्रा हि रणे जयश्रीः ॥

तः ॥ त्वन्मतिशीलयोः तव प्रज्ञासद्वृत्तयोः सारः प्रकर्षो यैस्ते तथोक्ताः ॥ ते तव विद्विषः कृतोपकारा इव उपकृतवन्त इव ॥ अपकारोप्युपकारायैव संवृत्तः यतः सौजन्यं च त्वत्सौजन्यं च जगति सु व्यक्तमासीदित्यर्थः ॥ वर्धमानस्यापि सुजनस्य चंदनदारुण इव गुणापरिणामतः एव प्रचुरी भवंतीति भावः ॥२६॥ अथ प्रयोजनं विवमाह ॥ लभ्येति ॥ तव त्वयेत्यर्थः ॥ कृत्यानां कर्त्तरि वेति षष्ठी ॥ धरित्री विक्रमेण लभ्या प्राप्तव्या न च सुलभेत्याह ॥ विपक्षः शत्रुरपि वीर्यैः सौर्यैः ॥ अस्त्राणि आग्नेयादीनि बलानि सैन्यानि तैर्वीर्यास्त्रबलैर्ज्यायान् प्रशस्यतरः अधिकतर इति यावत् ॥ ज्य चेति ज्यादेशः ॥ अतः प्रकर्षाय आधिक्याय विधिरुपायो विधेयः कर्त्तव्यः ॥ हि यस्मात् रणे जयश्रीः प्रकर्षतंत्रा प्रकर्षप्रधाना उत्कर्षायत्तेत्यर्थः ॥२७॥

मार

वि

दौ ५

परिभवे २

तु२२५

त्रिशब्दान्तात्सप्तत्रिः सप्तवारान् त्रिःसप्तकृत्वः एकविंशति कृत्वइत्यर्थः ॥ गणने कृत्वसुजिति कृत्वसुच् प्रत्ययः जगतीपतीनां महीपतीनां हंता गुरुरस्त्रवेदोपदेष्टा सप्रसिद्ध १८

कि॰ टी॰
वं॰ स॰ ३
६

अथ त्रिरित्यादिना श्लोकचतुष्टयेन विपक्षस्यायस्तं वर्णयन्ति ॥ त्रिरिति ॥ त्रिसप्तशब्दयोः सुप्सुपेति समासः ॥ संख्यायाः क्रियाभ्यावृत्त्यर्थः ॥ अत एव शब्दानपेक्षत्वं ॥ तदुक्तं काव्यप्रकाशे ॥ प्रक्रान्तं प्रसिद्धानुभूतार्थविषयः ॥ तच्छब्दो यदुपादानं नापेक्षते ॥ जमदग्नेरपत्यं पुमान् जामदग्न्यः ॥ गर्गादिभ्यो यञिति यञ् ॥ एकविंशतिवारः जगतीपतीनां क्षत्रियाणां हंता गुरुरपि ॥ यस्य भीष्मस्य वीर्यावधूतो विक्रमाभिभूतः ॥ अंबिकादिस्वयंवरे इत्यर्थः ॥ तदा भंगसमये गुणानां शौर्यादीनां प्रकर्षमतिशयं आधारवशमाश्रयाधीनं विवेद ॥ ज्ञातवान् ॥ स्वविद्यायाः स्वशिष्ये भीष्मे तस्मादपि प्रकर्षाधानदर्शनादिति भावः ॥ स्मेति पादपूरणे ॥ स्म पादपूरणेऽतीत इति विश्वः ॥ १८ ॥ यस्मिन्निति ॥ युगलकं ॥ यस्मिन् भीष्मविषये ॥ अनीश्वरस्य भावः अनैश्वर्यं असामर्थ्यं ॥ नञःशुचीश्वरक्षेत्रज्ञनिपुणकुशलेति

वीर्यातिशयम् ४

त्वो॰

त्रिःसप्तकृत्वो जगतीपतीनां हन्ता गुरुर्यस्य स जामदग्न्यः ॥ वीर्यावधूतः स्म तदा विवेद प्रकर्षमाधारवशं गुणानां ॥ १८ ॥

यस्मिन्ननैश्वर्यकृतव्यलीकः पराभवं प्राप्त इवान्तकोऽपि ॥ धुन्वन्धनुः कस्य रणे न कुर्यान्मनो भयैकप्रवणं स भीष्मः ॥ १९ ॥

सृजन्तमाजाविषुसंहतीर्वः सहेत कोपज्वलितं गुरुं कः ॥ परिस्फुरल्लोलशिखाग्रजिह्वं जगज्जिघत्सन्तमिवान्तवह्निं ॥ २० ॥ जि २

विकल्पान्नञः पूर्वपदस्य वृद्ध्यभावे ॥ तेन कृतव्यलीकः जनितवैलक्ष्यः ॥ दुःखे वैलक्ष्ये व्यलीकं इति यादवः ॥ अन्तकोऽपि पराभवं प्राप्त इव भीष्मस्येच्छामरणत्वादन्तकोऽपि पराजित एवास्ते किमुतान्ये इति भावः ॥ स भीष्मो रणे धनुर्धुन्वन् कस्य मनो भयैकप्रवणं भये एकप्रवणं एकोन्मुखं शिवभागवत्समासः ॥ न कुर्यात् सर्वस्यापि मनसि भयं कुर्यादेवेत्यर्थः ॥ १९ ॥ सृजन्तमिति ॥ आजौ रणे इषुसंहतीर्बाणसंघान् सृजन्तं वर्षन्तं ॥ कोपज्वलितं ॥ अत एव परिस्फुरन्त्यो लोलाश्च शिखा याग्रा एव जिह्वा यस्य तं तथोक्तं ॥ जगल्लोकं जिघत्सन्तं अत्तुमिच्छन्तं ॥ अदेः सनन्ताच्छतृप्रत्ययः ॥ लुङ्सनोर्घस्लृ इति घस्लृ आदेशः ॥ अन्तवह्निं कालाग्निमिव स्थितं गुरुं द्रोणं वः कः सहेत ॥ सोढुं शक्नुयात् ॥ न कोऽपीत्यर्थः ॥ शकि लिङ् चेति शक्यार्थे लिङ् ॥ २० ॥ रामजी ॥

यमे॰

३२

युष्माकमध्ये

आकारेणैव ॥

कोपेन

निरीक्ष्येति ॥ संरंभेण निरस्तं धैर्य्यं निर्विकारचित्तत्वं येन तं तथोक्तं ॥ आटोपेनैव परधैर्यापहारिणमित्यर्थः ॥ आराधितजामदग्न्यं शुश्रूषितभार्गवं जामदग्न्यादधिगता-
स्त्रहरस्यमित्यर्थः ॥ राधेयं राधासुतं कर्णं ॥ भीष्मोऽप्युक्तः ॥ निरीक्ष्य मृत्योरप्यसंस्तुतेषु अपरिचितेषु संस्तवः स्यात्परिचय इत्यमरः ॥ भयेषु पक्षपातः परिचयो जायेत ॥ प्रसभं २४

अ

मृत्युरप्यस्माद्बिभेतीत्यर्थः ॥ किमुतान्य इति भावः ॥ संभावनायां लिङ् ॥ अर्जुनेन क्रियापेक्षया समानकर्तृत्वाभावेऽपि पक्षपातक्रियापेक्षया तत्संभवान्निरीक्ष्येति
क्त्वाप्रत्ययनिर्देशः ॥ समर्थनीय प्रधानोपसर्जनभावस्तु अप्रयोजक इति मल्लिनाथविवेककारः ॥ अत्र भयसंबंधराहित्यस्य मृत्योर्भयसंबंधाभिधानादसंबंधे संबंधरूपाति-

निरीक्ष्य संरंभनिरस्तधैर्य्यं राधेयमाराधितजामदग्न्यम् ॥ असंस्तुतेषु प्रसभं भयेषु जायेत मृत्योरपि पक्ष-
पातः ॥ २१ ॥ यया समासादितसाधनेन सुदुश्चरामाचरता तपस्यां ॥ एते दुरापं समवाप्य वीर्य्यमुन्मूलिता-
रः कपिकेतनेन ॥ २२ ॥ राम

शयोक्तिरलंकारः ॥ २१ ॥ अथानंतरकरणीयसामग्रीमुपदिशन् आगमनप्रयोजनफलं प्रसंगेनाह ॥

विद्यया २८

ययेत्यादि ॥ यया करणेन सुदुश्चरां मतिदुष्करां तपस्यां तपश्चर्य्यां ॥ कर्मणो रोमंथतपोभ्यां वर्त्तिचरोः इति क्यङ् ॥ अ प्रत्ययादिति स्त्रियामप्रत्ययः ॥ आच-

पद्म

रतापतिं प्रतितपः कुर्वतेत्यर्थः ॥ अत एव समासादितं साधनं पाशुपताद्यस्त्ररूपं येन तेन ॥ कपिः केतनं चिह्नं यस्य तेनार्जुनेनेत्यर्थः ॥ दुरापं अन्यदुर्लभं हनुमान् २८

वीर्य्यं तेजः समवाप्य एते शर्वोक्ताभीष्माद्यः ॥ समुन्मीलितारः ॥ उन्मूलयिष्यंते ॥ उन्मूलयतेर्णिजंतात्कर्मणि लुट् ॥ अत्र चिरावादेरागमे चिरत्वद्भावस्यासि-
द्धवत्त्वाभावादिति ॥ असिद्धत्वाद्दिनिटीति निधानात् ॥ तदुक्तं ॥ विणवद्भावि [illegible] हनेष्वत्वलंरीर्ती कौ योमित्तां वा चिरणीति इट्चासिद्धत्वेन नलुप्यते ण्लीति

सो नीटीति णिलोपः । तालेमित्तस्येव अ[illegible] उक्त ति ट्स

कि॰ टी॰
वं॰ स॰ ३
५

महत्वयोगायेति ॥ हे नृप महत्वयोगाय प्रकर्षलाभाय ॥ महामहिम्नां महानुभावानां देवतानां इंद्रादीनां ॥ आराधते अनया इत्याराधनीतां प्रसादयित्रीमित्यर्थः ॥ करणे ल्युट् ङीप् ॥ भूरिधाम्नी महाप्रभावनं ॥ धामदेहे गृहे रस्मौ स्थाने जन्मप्रभावयोरिति विश्वः ॥ अन उपधालोपिनो न्यतरस्यामिति ङीप् ॥ विद्या ऐंद्रमंत्ररूपां सिद्धिं साक्षात्कार्यसिद्धिमिवेति ॥ विद्यायाश्च प्र भोवत्वात् ॥ हे प्रदानोचित दानपात्रभूत फलभोक्तारस्य पात्रत्वात् ॥ दातुमुपागतो स्मि ॥ २३ ॥ इतीति ॥ इत्युक्तवंतं प्रसेदिवांसं ॥ भावार्थादेः स क्वसुस्तस्य वसु ॥ तं प्र ति ॥ जिष्णुर्जयशीलोर्जुनः ॥ ग्लाजिस्थश्च ग्स्नुः इति ग्स्नुप्रत्ययः ॥ व्रज साधय अनुतिष्ठ इत्येवंरूपमजातशत्रो धर्मराजस्य स्वयमदृष्टशीलत्वादियं संभावात् प्रमाणयन् ॥ प्र वर्त्तकीकुर्वन् ॥ नरादिष्टः सान्निध्यर्थः ॥ अंतेवसन्निव ॥ छात्रांते वासिनौ शिष्ये इत्यमरः ॥ विनयेन अनौद्धत्येनोपाससाद ॥ २४ ॥ निर्मायेति ॥ अथ वह्निकणा ॥

महत्वयोगाय महामहिम्नामाराधनीं तां नृप देवतानां ॥ दातुं प्रदानोचित भूरिधाम्नीमुपागतः सिद्धिमिवास्मि विद्यां ॥ २३ ॥ इत्युक्तवन्तं व्रज साधयेति प्रमाणयन् वाक्यमजातशत्रोः ॥ प्रसेदिवांसं तमुपाससाद वसन्निवान्ते विनयेन जिष्णुः ॥ २४ ॥ तिलकं ॥ निर्माय विद्याथ दिनादि रम्याद्बिंबादिवार्कस्य मुखान्महर्षेः ॥ पार्थाननं वह्निकणावदा

वदाता स्फुलिंगवदुज्ज्वला देवता सा निर्माय आदितिभावः ॥ विद्या ऐंद्रमंत्ररूपा दिनादिरम्यात् प्रभातभास्करादर्कस्य बिंबादिव महर्षेर्व्यासस्य मुखान्निर्माय निर्गत्य अश्लेषः समासेन नञ्पूर्वकोल्यप् ॥ दीप्तिरर्कदीप्तिर्दीधितिः ॥ स्फुरद्धिकस त्यच्छमिव पार्थाननं अर्जुनस्य मुखं अभिपेदे प्रविष्टा ॥ २५ ॥ योगमिति ॥ यो गतमायस्य अर्हतमाय तस्मै पार्थाय वक्ष्यमाणमहिमानं योगं ध्यानविधिं ॥ योगः सन्नहनोपायध्यानसंगतियुक्तिष्वित्यमरः ॥ तपः प्रभावात्स्वयः विन तारददौ ॥ चिरकालग्राह्यमपीतिभावः ॥ येन योगेन तत्त्वेषु प्रकृतिमहदादिषु अवभासे साक्षात्कारे कृते सति ॥ अस्यार्जुनस्य चक्षुरात्हिश्रिय चिरकालात् ॥

...रोमनश्च पंचतन्मात्राणि पंच वृद्धीन्द्रियाणि पंच कर्मेन्द्रियाणि पंचमहाभूतानि
इति चतुर्विंशति तत्त्वानि तत्र २४

नदातस्य कोपि महान

समुन्मीलेव उन्मीलितमिव चक्षुर्यस्य ॥ कोपि महाविलासज्ञानं भंजन ॥ तत्त्वावभासश्चिरादंधस्य दृष्टिलाभ इवाभवदिति भावः ॥२६॥ आकारमिति ॥ आशंसितः आशंसितः ॥ भूरिलाभो ऽनेकश्रेयः प्रशिर्येन
तं न योक्तुं महाभागस्य सूचकं इत्यर्थः ॥ अंतःकरणशब्देन सत्त्वहर्षैरुत्साहो लक्ष्यते ॥ तदनुरूपं तदनुकूलं ॥ उत्साहानुग्रहणं व्यापारत्वमिति ॥ आकारभूमिं दधानं ॥ तं अर्जुनं मुनिः विज
योदये विजयफलके तपःसमाधौ तपोनियमे ॥ समाधिर्नियमे ॥ ध्याने नितांते च समर्पण इति विश्वः ॥ नियोजयिष्यन् नियोजयितुमिच्छन्नित्यर्थः ॥ लृट् शेषे चेति लृटः सद्वेति
शतृप्रत्ययः ॥ इति वक्ष्यमाणमुवाच ॥२७॥ अनेनेति ॥ अनेन चोपदिष्टेनेत्यर्थः ॥ योगेन विवृद्धतेजाः निजां पदवीं ॥ परस्मै अयच्छन् ॥ परस्य प्रवेशमयच्छन्नित्यर्थः ॥ उपात्तशास्त्रग्रही

योगं च तं योग्यतमाय तस्मै तपःप्रभावाद्विततार सद्यः ॥ येनास्य तत्त्वेषु कृतेवभासे समुन्मिमीलेव चिराय चक्षुः ॥२६॥ आका
रमाशंसितभूरिलाभं दधानमन्तःकरणानुरूपं ॥ नियोजयिष्यन्विजयोदये तं तपःसमाधौ मुनिरित्युवाच ॥२७॥ अनेन
योगेन विवृद्धतेजा निजां परस्मै पदवीमयच्छन् ॥ समाचराचारमुपात्तशस्त्रो जपोपवासाभिषवैर्मुनीनाम् ॥२८॥ करिष्य
से यत्र सुदुष्कराणि प्रसक्तये गोत्रभिदस्तपांसि ॥ शिलोच्चयं चारुशिलोच्चयं तमेष क्षणान्नेष्यति गुह्यकस्त्वाम् ॥२९

स्तो

कूल २५

हे अर्जुन

त्तायुध एव सन् ॥ जपोपवासाभिषवैः स्वाध्यायोपशनस्नानैः ॥ मुनीनां आचारं समाचर अनुतिष्ठ ॥२८॥ तेत्र विशेषेण तपसि सिद्धिरित्याशयेनाह ॥ करिष्यस इति ॥ यत्र
शिलोच्चये गोत्रभिदः इंद्रस्य ॥ प्रसत्तये प्रसादाय ॥ सुदुष्कराणि तपांसि करिष्यसे ॥ चारुशिलोच्चयं रम्यशिखरं तं शिखरं ॥ शिलोच्चयं इंद्रकालाख्यं गिरिं ॥ अद्रिगोत्रगिरि
ग्रावाचलशैलशिलोच्चयाः इत्यमरः ॥ त्वामेषः गुह्यकोयक्षः ॥ अनंतरमेवास्य पुरस्तदानीमेव प्रादुर्भावादेषेति निर्देशः ॥ क्षणान्नेष्यति प्रापयिष्यति ॥२९॥
इतीति ॥ इतीत्थं ॥ महेंद्रसूनुमर्जुनं ब्रुवाणेन उक्तवतेत्यर्थः ॥ वर्त्तमानसामीप्ये भूते वर्त्तमानवत्प्रत्ययः स्तिरोधानस्याविलंबसूचनार्थः ॥ तेन महर्षिणा व्यासेन ॥

दिवक्षदेशं

निरोधमभवेन रुंधे ॥ भावे लिट् ॥ राजराजो नाम राजः ॥ राजा श्रभोनेरं द्वेचयते । तजिपशास्त्रयोरिति विश्वः ॥ तस्यानुचरः पर्वतीकपतो श्रस्पगुनेरादेशं ॥ स्ताहान्नमर्जुनाधिष्ठितं प्र
देशमध्यितस्यो ॥ श्राप्त इत्यर्थः ॥ स्वादित्वभ्यासेन चाभ्यासस्येति षत्वं ॥ ३ ॥ कृतेति ॥ सपुरुषजनो यक्षः ॥ कृतानतिः कृतप्रणामः सन् ॥ सख्या सुहृदीव ॥ श्रथमित्रं सखा सुहृ
प्राप — दित्यमरः ॥ संप्रसादं विश्रंभमियाय ॥ तथा हि ॥ सतां साधूनां ॥ योगः संगतिः ॥ श्राश्रुः विश्वासयति ॥ विश्वासं जनयति ॥ हिं सा मान्येन विशेषसमर्थनरूपो र्थांतरन्यासः ॥ ३४ ॥
श्रयेति ॥ श्रथास्मभासास्तर्येण श्रहणोदयाय पुनरुद्गमाय ॥ विहीयमानान् ॥ त्यजमानान् ॥ इतितमसः श्राप्तिकारणोक्तिः ॥ बृहद्युतीन् सौवर्णत्वात् दीप्यमानानित्यर्थः

जातस्पृहो जातास्पृहा श्राकांक्षायस्य तथा स माहतः उक्तः सांत्वव दः प्रियवचनं येन त स्मिन् जिष्णावर्जुने २४

३५

तं १= इति ब्रुवाणेन महेन्द्रसूनुं महर्षिणा तेन तिरोबभूवे ॥ ततो राजराजानुचरोस्य सद्यः प्रदेशमादेशमि वाधितस्थौ ॥ ३३ ॥ कृता
नतिर्व्याहृतसांत्ववादे जातस्पृहः पुण्यजनः स जिष्णौ ॥ इयाय सख्याविव संप्रसादं विश्वासयत्याशु सतां हि योगः ॥ ३४ ॥
श्रथास्मभासेव सुमेरुकुंजान्विहीयमानानुदयाय तेन ॥ बृहद्युतीन्दुःखकृतात्मलाभं तमः शनैः पाण्डुसुतान्प्रपेदे ॥ ३५ ॥
श्रसंशयालोचितकार्यनुन्नः प्रेम्णा समानीय विभज्यमानः ॥ तुल्याद्विभागादिव तन्मनोभिर्दुःखातिभारोपि लघुः स मे

इतितमसः ॥ संकोचकारणोक्तिः ॥ सुमेरुकुंजानिव ॥ श्रत्र सुमेरुग्रहणं कुंजानां सौवर्ण्यद्योतनार्थं ॥ तेनार्जुनेनोदयाय श्रेयसे ॥ विहीयकानान् ॥
श्रनेकविधप्रकाशान् — बृहद्युतीन् ॥ पांडुसुतान् ॥ चतुरइतिशेषः ॥ दुःखेन कृच्छ्रेण कृतं श्रात्मलाभउत्पत्तिर्यस्य तत्तथोक्तं ॥ तेषां विवेकित्वात्कथंचिल्लब्धोदयइत्यर्थः ॥ तमः शोकमं — विलंबोस्य ३=
सर्ववादिशोभषणाद्यस्य — धकारश्च ॥ तमोंधकारस्वर्भानौ तमः शोके गुणांतर इति विश्वः ॥ शनैर्मंदं प्रपेदे ॥ तेषां विवेकित्वाद्दीनभीतमिवेति भावः ॥ श्रत्र तमः शब्दस्य श्लिष्टत्वात् — ३६
प्रयोजनमनुसंधेयं २५ — श्लेषानुप्राणितेयमुपमा ॥ ३५ ॥ श्रसंशयेति ॥ श्रसंशयमसंदिग्धं ॥ श्रालोचिते कार्ये तेन नुन्नः ॥ इति लघुत्वहेतूक्तिः ॥ नुदविदेति निष्ठानत्वं ॥ कार्यंगो

यथातथा — उपादितः ३५ — विवेचितयत् १९ — निरस्तः १७

खमात्तो ऽपनिरस्त इत्यर्थः॥ तथापि प्रेम्णा आनर्वत्स्यलेन कर्त्रा समानीय पुनराकृष्य विभज्यमानः॥ समसौभागी क्रियमाणः॥ तुल्येनैतु ल्यदुःखं त्वं भवतीति भा
वः॥ स शर्वीको दुःखमेवातिभारोपि अतिभारभूतमपि दुःखमित्यर्थः॥ तन्मनोभिः तेषां चतुर्णां पार्थानां मनोभिस्तुल्याद्विभागाद्विवशृर्दीक्तान्प्रेमसक्तेनात्सम
पृ ३५ विभागाद्द्वैवेत्यर्थः॥ वस्तुतस्तु विवेकाद्वेवेतिभावः॥ पुनर्विभागग्रहणं तस्य हेतुत्वसौ त्वेन्द्रौमनुवाद इत्यदोषः लघुर्मने यथा एकोनेकधा विभज्य वहुभिरुह्य समन्यानि ३=
मानो महानपि भारो लघुर्मन्यते तद्वदित्यर्थः॥ अथेयं प्रेम्णा आकृष्यमाणमपि शोकं विवेको निर्जिगायेत्यर्थः॥ ३३॥ धैर्येणेति॥ धैर्येण तेषां निसर्गतो निर्वि
कारचित्तत्वेन तथा महर्षेर्व्यासस्य प्रवर्तकस्यातिशयः॥ विश्वासनया अपूर्वचनत्वेनेत्यर्थः॥ अरातिप्रभवादरातिहेतुकान् तीव्रात् निर्विडात् मन्योः। दुःसहात्

धैर्येण विश्वासतया महर्षेस्तीव्रादरातिप्रभवाच्च मन्योः॥ वीर्यं च विद्वत्सु सुते मघोनः स तेषु न स्थानमवाप शोकः॥
॥३४॥ तान्भूरिधाम्नश्चतुरोपि दूराद्विहाय यामानिव वासरस्य॥ एकौघभूतं तदशर्म कृष्णां विभावरीं ध्वांतमिवाससा

क्रोधाच्च हेतोः॥ तथार्जुनप्रभावपरिज्ञानाच्चेति हेत्वंतरं विशेषणमुखेनाह॥ मघोनः सुते अर्जुने च वीर्यं न लोके ऽस्यारिनाष्टीति निषेधः॥ वि
द्वत्सु ज्ञानवत्सु॥ विदेः शतुर्वसुरिति वैकल्पिको वस्वादेशः॥ तेषु पार्थेषु सशोकः स्थानं स्थितिं नावाप॥ ३४॥ तानिति॥ तान्पार्थांस्त्यक्त्वा॥ शर्म सुखं
शर्म शातसुखानि चेत्यमरः॥ नाद्दिरुद्धमशर्म दुःखं॥ नञ्त्रितिनञ्समासः॥ भूरिधाम्नस्तेजस्विन इति हानिहेतुत्वोक्तिः॥ चतुरस्तान्पार्थान्॥ वासरस्य भू
रिधाम्नः चतुरो यामान्प्रहरानिव विहाय त्यक्त्वा एकौघभूतं एकराशिभूतं॥ सतश्च एणाद्यः कृताद्भिभिरित्यर्थे कर्मधारयः॥ ओरणादिराकृतिगणः॥
तिशाकटायनः॥ कृष्णा विभावरी कृष्णपक्षरात्री ध्वान्तमिव कृष्णा द्रौपदी प्रपेदे प्राप॥ ३५॥ रामजी रामजी

कि॰टी॰

वे॰ न॰ २ परिगता नि

35

तुषारेति॥ सा द्रौपदी॥ विलोकने॥ अर्जुनाविलोकने॥ अगूढभावा अगूढाभिप्राया स्फुटाभिलाषिणीति यावत्॥ भावो लीला क्रियाचेष्टाभ्रूत्यभिप्रायजंतु षितिवैजयंती॥ मंगलभंगभीरुः॥ मंगलहानेर्भीतासती पर्यश्रुणी अश्रुसहिते तुषारलेशेन हिमचलेशेनाकुलितनीलोत्पलसदृशत्युपमालंकारः लोचने मीलयितुं मीलितुं न विषेहे न शशाक॥ अश्रुणो हृष्याचरकत्वेपि नस्थितिपानस्यामंगलत्वात्तन्निवर्त्तकं निमीलनं चकारेत्यर्थः॥३६॥ अकृतेति मेति॥ इंद्रसूनुरर्जुनः॥ क्रियया निर्वृत्तः। कृत्रिमः॥ ड्वितः क्रिः इति क्रिप्रत्ययः॥ क्रेर्मन्नित्यमिति मम्प्रत्ययः॥ प्रेमैव रसं अकृत्रिमेण प्रेमरसेनाभि

सानर नद्भुतः४

तुषारलेशाकुलितोत्पलाभे पर्यश्रुणी मंगलभंगभीरुः॥ अगूढभावापि विलोकने सा न लोचने मीलयितुं वि षेहे॥३६॥ अकृत्रिमप्रेमरसाभिरामं रामार्पितं दृष्टिविलोभि दृष्टं॥ मनःप्रसादांजलिना निकामं जग्राह पाथेय मिवेन्द्रसूनुः॥३७॥ धैर्यावसादेन हृतप्रसादा वन्यद्विपेनेव निदाघसिंधुः॥

रामं॥ अन्यत्र प्रेमरसेन मधुरादिना चाभिरामं॥ रामया रमण्या अर्पितं दृष्टिं विलोभयतीति दृष्टिविलोभि दृष्टिप्रियमित्यर्थः॥ दृष्टं दर्शनं नपुंस के भावे क्तः॥ मनःप्रसादः प्रसन्नं मनः इत्यर्थः॥ सोंजलिरेवेत्युपमितसमासः॥ तेन मनःप्रसादांजलिना॥ पथि साधु पाथेयं शंबलमिव॥ पथ्य तिथिवसतिस्वपतेर्ढञ्॥ निकामं जग्राह॥ रामार्पितं पाथेयं प्रापितेमायमभवतीत्यागमः॥३७॥ धैर्येति॥ वन्यद्विपेन वन्यग्रहणं उत्कटबलद्योतनना र्थं॥ निदाघसिंधुः ग्रीष्मनदीव निदाघग्रहणं दौर्बल्यद्योतनार्थं॥ धैर्यावसादेन धैर्यभ्रंशेन कर्त्रा हृतप्रसादा हृतनैर्मल्या शोभा गमितेत्यर्थः॥ राज

अतिशयेन २१

३५

स्वरं

पुत्री क्षत्रियसुता द्रौपदी ॥ अतः क्षात्रयुक्तमेव वदतीति भावः ॥ निरुद्धबाष्पोदयं सन्निरुद्धरोदनं सन्नकंठं हीनकंठं ॥ अथ तयोरुभयोः कृतबहुव्रीह्योः क्रियाविशेषणयोर्विशेषणसमा
सः ॥ कृच्छ्रात्कथंचित् इति वक्ष्यमाणमुवाच ॥ मग्नामिति ॥ पंकभूते पंकोपमे भूतं क्ष्मादौ पिशाचादौ न्याय्ये सत्योपमानयोरिति विश्वः ॥ द्विषच्छद्मनि शत्रुकपटे मग्नां दुरुद्धरामित्यर्थः
संभावनां योग्यतां गौरवमिति यावत् ॥ भूतिं संपदमिव ॥ भूतिर्भस्मनि संपदीत्यमरः ॥ उद्धरिष्यन् ॥ उद्धारकः सन्निति शेषः ॥ आधिद्विषां दुःखच्छिदां तपसां प्रसिद्धेः ॥ सम्यक्सिद्धिपर्यंतं ॥ मा
अस्मद्विना अस्माभिर्विनेत्यर्थः ॥ पृथग्विनेत्यादिना विकल्पात्तृतीया ॥ भृशं मा उन्मनीभूः ॥ अस्मद्विरहदुर्मना माभूरित्यर्थः ॥ दौर्मनस्यस्य तपः परिपंथित्वादिति भावः ॥ माङि माशीर

निरुद्धबाष्पोदयसन्नकंठमुवाच कृच्छ्रादिति राजपुत्री ॥३८॥ मग्नां द्विषच्छद्मनि पंकभूते संभावनां भूतिमिवोद्धरिष्यन् ॥ आ
धिद्विषामा तपसां प्रसिद्धेरस्मद्विना मा भृशमुन्मनीभूः ॥३९॥ यशोधिगंतुं सुखलिप्सया वा मनुष्यसंख्यामतिवर्त्तितुं वा ॥ नि
रुत्सुकानामभियोगभाजां समुत्सुकेवांकमुपैति सिद्धिः ॥४०॥

र्थे लुङ् ॥ न माङ्योगे इति अडागमप्रतिषेधः ॥ अनुन्मना उन्मना संपद्यमान उन्मनी अभूततद्भावे च्विः ॥ अरुर्मनश्चक्षुश्चेतोरहोरजःसलोपश्चेति सकारलोपः ॥ अ
स्य च्वावितीकारः ॥३९॥ अथानौत्सुक्यपदार्थत्वं सर्वार्थसिद्धिमूलत्वमाह ॥ यश इति ॥ यशो अधिगंतुं । कीर्त्तिं लब्धुमित्यर्थः ॥ सुखस्य लिप्सया लब्धुमिच्छया वा मनुष्य
संख्यां मनुष्येषु गणनां अतिवर्त्तितुं अतिक्रमितुं वा ॥ अमानुषं कर्म कर्त्तुमित्यर्थः ॥ अभियोगभाजां अभिनिवेशवतां ॥ निरुत्सुकानां अनुत्सुकानां ॥
अदुर्मनायमानानामेवेत्यर्थः ॥ सिद्धिः पूर्वोक्तयशःसुखार्थः सिद्धिः समुत्सुकेवानुरक्तकांतेवांकमंतिकमुपैति ॥ तस्मादस्मद्विरहदुःखं त्याज्यं तपःसिद्धेः सौलभ्यमिति भावः

कि. टी.
वे. नं. २
८
36

अथास्य मन्युदीपनद्वारान्तपः प्रवृत्तिं प्रपंचयितुं अरिनिराकरणं तावच्चतुर्भिरुद्घाटयति॥ लोकमिति॥ विधात्रा ब्रह्मणा॥ लोकं गोप्तुं विहितस्य सृष्टस्य क्षत्रस्य क्षत्रिय जातेः संबंधि जयशीलं जेतृ नदेव जैत्रं॥ जेतृशब्दात्तृजंतात् प्रज्ञादिभ्यश्चेति स्वार्थेऽण् प्रत्ययः॥ ओजो बलं दीप्तिर्वा॥ ओजो बले च दीप्तौ चेति विश्वः॥ तदेव वसु धनं रू तिरूपकालंकारः॥ मुष्णन्नपहरन्॥ अरिनिकृतस्य कुतः क्षात्रं तेजः इति भावः॥ किंच॥ विजयैकवृत्तेर्विजयैकजीविकस्य यावत्क्षत्रियस्य विजिगीषोः मितिस्तस्य रणादिति भा वः॥ वृत्तिर्वर्तनं जीवने इत्यमरः॥ तेजस्विता या तेजस्विनामित्यर्थः॥ तेजः प्राधान्यद्योतनार्थे भावप्रधानो निर्देशः॥ प्रियं प्राणमिव प्राणसममित्यर्थः॥ अभि मानमहंकारं निघ्नन् खंडयन्॥ तेजस्विनां प्राणहानिः प्रायो मानहानिरिति भावः॥ अधिक्षेपासहनं तेजः प्राणात्ययेऽपीत्याह॥ ४१॥ व्रीडेति॥ पुनश्च त्वमात्मजनो

लोकं विधात्रा विहितस्य गोप्तुं क्षत्रस्य मुष्णन्वसु जैत्रमोजः॥ तेजस्विता या विजयैकवृत्तेर्निघ्नन्प्रियं प्राणमिवाभिमानं॥ ४१॥ व्रीडानतैरात्मजनोपनीतः संशय्य कृच्छ्रेण नृपैः प्रपन्नः॥ वितानभूतं विततं पृथिव्यां यशः समूहन्निव दिग्वि कीर्णं॥ ४२॥

पनीतः॥ साधितः प्रापित इत्यर्थः॥ तथापि संशय्य सभा वित्तबुद्ध्येति भावः॥ व्रीडानतैः जुगुप्सितवृत्तान्तश्रवणादिति भावः॥ नृपैरेशांतरस्थैः कृच्छ्रेण प्रपन्नः॥ आप्तान्कृत्वा कथंचिद्विश्रब्ध इत्यर्थः॥ यशःश्रावतामपि द्रुः सहमुत्तानुभवतामिति भावः॥ [illegible] इत्ये वा पूर्वेषां व्याख्या॥ अन्यथा व्याख्यायते॥ आत्मजनोपनीतः ज्ञातिकृतः॥ संसय्य कथमिदमन्याय्यमुपेत्य मिति विचार्य॥ व्रीडानतैः॥ जुगुप्सितकर्मदर्शनादिति भावः॥ नृपैः सभासदैः॥ कृच्छ्रेण प्रपन्नो गीकृतागोत्रकलहेषु मध्यस्थैरुदासितव्यमिति बुद्ध्या उपेक्षित इत्यर्थः॥ पक्षद्वयेऽपि प्रपन्न इत्युक्त्या आत्मजनोपनीतस्य पदार्थभूतस्य विशेषणस्यागहेतुत्वात्पाकाव्यलिंगमलंकारः॥ पृथिव्यां वितानभूतं विताननसमं॥ उल्लोचतुल्यमिति यावत्॥ युक्तं स्यादाहतने भूते प्राणप्रतीने समे त्रिषु॥ अस्त्री विता

विस्वस्तः २८

व
कि २४
३६

कुर्वन् इति श्लोकी तीप्रर्तेयमुपमा अरिनिराकृतस्य कुन्ताश्रीरावस्थानमिति भावः ३४

उत्तरां ५

वीर्येति॥ वीर्याण्येव अवदानानि तेषु कृतावमर्षः॥ कृतास्कंदनः॥ पुराकृतपराक्रमो ऽद्भुतानामपि प्रभूतेलित्यर्थः॥ अवदानं कर्मवृत्तमित्यमरः॥ अतएव संप्रतीतिं प्रख्यातिं प्रतीते प्रथितख्यातवित्तविज्ञातविश्रुता इत्यमरः॥ अभूता अविद्यमानामिवेति॥ अनेनाप्यसत्वमुत्प्रेक्ष्यते॥ तन्वन् कुर्वन्॥ पुनश्च॥ अह्नो दिवसस्य शेषो ऽस्तंगतो ऽर्कत्विषामिवायतीनामुत्तरकालानां प्रयामक्षयं॥ दैर्घ्यनाशं॥ ४३॥ प्रसह्येति॥ परैः शत्रुभिः॥ अस्मासु प्रसह्य प्रयुक्तः॥ आचरितो यो निकारः परिभवः॥ केशांबराकर्षणरूपः॥ स्मर्तुं न शक्यः॥ अनुकर्तुं अनुभवितुं किमुत॥ यस्य स्मरणमपि दुःसहमनुभवस्तु दुःसह इति किमु वक्तव्यमित्यर्थः॥ स निकारस्त्वद्विना त्वया विना॥ पृथग्विनेत्या दिना पंचमी॥ आर्द्रः सन्॥ कुन्तश्चिरदभिभूतात्॥ पुराणप्रहारश्चवर्त्नद्विरदकुस्त्वासुनर्नवीकरिष्यतीत्यर्थः॥ उपशुष्यन्॥ कृत्वद्यापि शुष्कमिति भावः॥ दुःखितस्य भव

वीर्यावदानेषु कृतावमर्षस्तन्वन्नभूतामिव संप्रतीतिं॥ कुर्वन्प्रयामक्षयमायतीनामर्कत्विषामह्न इवावशेषः॥ ४३॥
प्रसह्य यो ऽस्मासु परैः प्रयुक्तः स्मर्तुं न शक्यः किमुताधिकर्तुं॥ नवीकरिष्यत्युपशुष्यदार्द्रः स त्वद्विना मे हृदयं निकारः॥ ४४॥
चतुर्भिः कलापकं॥ प्राप्तो ऽभिमानव्यसनादसह्यं दन्तीव दन्तव्यसनाद्विकारं॥ द्विषत्प्रतापान्तरितोरुतेजाः शरद्घनाकी

र्ण इवादिरह्नः॥ ४५॥

नेशेके परार्थ मे हृदयं नवीकरिष्यत्यार्द्रीकरिष्यति व्रणमिवेति भावः॥ दुःखितस्य पुनः दुःखोपचयः॥ पांत प्रायमपि दुःखहेतुं पुनरुद्घाटयतीत्यर्थः॥ अत्र विशेषणादिविशेषणा साम्यात् व्रणाद्यप्रस्तुतार्थप्रतीतेः समासोक्तिरलंकारः॥ ४४॥ प्राप्त इति॥ त्रिभिर्विशेषकं॥ पुनः प्रकारान्तरेणामर्षमुद्दीपयति॥ प्राप्त इत्यादिभिस्त्रिभिः॥ नव वत्स मारण प्रत्यभिज्ञानहेतुभिर्द्वेनंजयं विधिनष्टि॥ अभिमानव्यसनात् भ्रंशात्॥ व्यसनं विपदि भ्रंशे दोषे कामजकोपजे इत्यमरः॥ दन्तव्यसनात् दन्तभंगात् दन्तीव असह्यं विकारं वैरू प्यं प्राप्तः॥ अनेन प्रत्यभिज्ञापसे इत्यर्थः॥ एवमुत्तरत्राप्यनुसंधेयं॥ पुनश्च द्विषत्प्रभावेनान्तरितं तिरस्कृतं॥ उरुतेजः प्रतापो यस्य स तथोक्तः॥ अतएव शरद्घनाकीर्णः॥

शत्रुतेजसा १=

पुनश्च

सव्रीडेति ॥ पुनश्च निष्क्रियत्वाद्व्यर्थक्रियाभूत्यत्वात्सव्रीडमन्दैरिव सव्रीडैरत एव मंदैरपटुभिरिवस्थितैरित्युत्प्रेक्षा ॥ मूढाल्पापटुनिर्भाग्यामंदाइत्यमरः ॥ स्वतेजसा पर्णेनाव भासमानो न प्रकाशमानः ॥ एवं तु नैव मितिभावः ॥ किं तु यशःस्तयाहृतो तीक्ष्ण जलोयोर्णवस्तदाभस्तत्सदृशः ॥ त्वमन्यमाकारं प्रपन्नः प्राप्त इव स्थित इत्युत्प्रेक्षा ॥ न स्तीक्ष्णजलार्णवाभ इत्युपमासंसृष्टिः ॥ ४६ ॥ दुःशासनेनेति ॥ दुःशासनस्य कर्त्तुरमर्षणमाकर्षणं स एव रजोधूलिः मालिन्यहेतुत्वादिति भावः ॥ तेनावकीर्णैः विलिप्तैः ॥ अत एव विनाथैरिव स्थितवतां युष्माकमसत्य प्रपन्नैर्दीनाथैरिवस्थितैः ॥ इत्युत्प्रेक्षा ॥ अन्यथा कथमपि इयं दुर्दशेति भावः ॥ किं तु भाग्यनाथैः देवमात्रशरणैः ॥ अ नर्थरूपमपि लुप्येतेति भावः ॥ एभिः परिहस्यमानैः ॥ असंयमितैरिति भावः ॥ केशैः शिरोरुहैः ॥ कुत्सितं वस्तु कदर्थः ॥ अर्थाभिधेयरैवास्तुप्रयोजननिर्वृत्तिषित्यम

सव्रीडमंदैरिव निष्क्रियत्वान्नात्यर्थमस्त्रैरवभासमानः ॥ यशःस्तयान्त्रीक्ष्णजलार्णवाभस्त्वमन्यमाकारमिवाप्रपन्नः ॥ ४६ ॥
दुःशासनाकर्षरजोविकीर्णैरेभिर्विनाथैरिवभाग्यनाथैः ॥ केशैः कदर्थीकृतवीर्यसारः कच्चित्स एवासि धनंजयस्त्वं ॥
४७ ॥ तिलकं ॥ सत्त्वत्रियस्त्राणसहस्सनीयस्त्वत्कार्मुकं कर्मसु यस्य शक्तिः ॥ वहन्नपी मम्प फलेष जातेकरोत्यसंस्कारहता

रः ॥ कोकस्तत्पुरुषेचेति कुशब्दस्य कदादेशः ॥ कदर्थीकृतो गतो धीकृतो वीर्यसारो धैर्यबलं यस्य सत्त्वेयाक्तः ॥ इत्यं पूर्वलक्षणस्त्वं स एव पूर्व एव धनंजयोसिक चित् ॥ कच्चित्कर्मप्रवेदनइत्यमरः ॥ स एव चेन्नैव मस्मानुपेक्षसइतिभावः ॥ ४७ ॥ अथानुपेक्षणोदोषमाह ॥ सत्त्वत्रियइति ॥ क्षता त्रायत इति क्षत्त्रियकुलं ॥ सु पीतियोगविभागात्कप्रत्ययः ॥ पृषोदरादित्वात्सर्वपदस्याकलोपः ॥ अथवा क्षरणं क्षत्तिद्धिवंतोपपदे कप्रत्ययः ॥ एवं स्थिते वाक्यार्थः कथ्यते सता साधूनां सहतइतिपचाद्यच् ॥ त्राणस्य सहस्त्राणसहस्तेरणासमः ॥ स एव क्षत्त्रियशब्दवाच्यो भवति तथा यस्य कार्मुकस्य कर्मसु रणक्रियासु शक्तिरस्तीतिशेषः ॥ तदेव कार्मुकं कार्मुकशब्दवाच्यं ॥ अन्यैवैतोशब्दौ मुख्यार्थानामन्त्यनर्थौ ॥ एवं स्थिते द्वयी हि विधासुक्तिः ॥ ६ पः

क्षत्तेर्जातः क्षात्रियः क्षत्तात्घइतिघ प्रत्ययः कर्मणि भवतीति
कर्मणि कार्मुकं उकञ्चेतुकञ् प्रत्ययः ४४

दृष्टि॰ तेर॰ कारु ३४

तेर॰

मा॰

३७

अथ यत्त्वद्गुणापिनोज्जीवे पुरित्याह॥ वीतौजस इति॥ हे पार्थ वीतौजसो निःप्रभाः सन्निधिमात्रशेषाः॥ सन्नामात्रावशिष्टाः॥ भवत्कृतां॥ भवता करिष्यमाणां॥ आशंसायां भूतवच्चेति भूतवत्प्रत्ययः॥ भूतिमभ्युदयमपेक्षमाणास्त्वदीया गुणाः॥ समानदुःखाः समदुःखभाज इव नोस्माकं सरूपतां वीतौजस्त्वादिसाधर्म्यं भजंते प्राप्ताः॥ समानदुःखा इवेत्युत्प्रेक्षया वीतौजस्त्वादिसंभाविवयानुप्राणितेत्यनुसंधेयं॥४९॥ न चापि ममैव कोयं भार इत्यत आह॥ आक्षिप्यमाण इति॥ रिपुभिः आक्षिप्यमाणं अत एव प्रमादान्नागैर्गजैः॥ अहे भाहि गजानागा इति वैजयंती॥ आलूनसटं आक्षिप्तकेसरं॥ सटाजटाकेसरयोरित्यमरः॥ मृगेंद्रमिव स्थितं॥ त्वां इयं धूः

प्रमादात्रत्राणानित्यान्तु सौर्वत्यादिति भावः॥

वीतौजसःसन्निधिमात्रशेषाःभवत्कृतांभूतिमिवेक्षमाणाः॥समानदुःखाइवनस्त्वदीयास्सरूपतांपार्थगुणाभजंते॥४९

आक्षिप्यमाणंरिपुभिःप्रमादान्नागैरिवालूनसटंमृगेन्द्रं॥त्वांधूरियंयोग्यतयाधिरूढादीप्त्यादिनश्रीरिवतिग्मरश्मिं॥५०

करोतियोशेषजनातिरिक्तांसंभावनामर्थवतींक्रियाभिः॥संसत्सुजातेपुरुषाधिकारेनपूरणीतंसमुपैतिसंख्या॥५१॥

कार्यभारः तिग्मरश्मिं दीप्त्या दिनश्रीरिव योग्यतया निर्वाहकत्वयेत्यर्थः॥ अधिरूढा आरूढवती कर्त्तरि क्तः॥५०॥ पूर्वं निर्व्यवसायस्य तत्रियपइत्यादिना दोषउक्तः॥ संप्रति व्यवसायिनो गुणमाह॥ करोतीति॥ यः पुमानशेषजनादितरजनादतिरिक्तामधिकां सर्वातिशायिनीत्यर्थः॥ संभावितां योग्यतां क्रियाभिरर्थवतीं सफलां करोति॥ तं पुमांसं संसत्सु सभासु॥ सभासमितिसंसद इत्यमरः॥ पुरुषाधिकारे योग्यपुरुषगणनाप्रस्तावे जाते सति॥ पूर्यते अनेनेति पूरणीं संख्या द्वित्वादिका न समुपैति॥ अद्वितीयो भवतीत्यर्थः॥ तस्मादसाधारण्यार्थलाभाय त्वयापि महानुत्साह आस्थेय इति भावः॥५१॥ अथ यद्वा अभ्यं वहुलविपत्तेस्य शोषित स्य कर्त्तव्यमुपदिशति॥ श्रियेषिति॥ हे पार्थ॥ श्रियेषु वक्ष्मासु विषये उपपत्तेः कारणाद्धितेव चिंत्यमानैः॥ अकस्मादेवाशंक्यमानैः पैरथैः॥ चेतः क्रमेण

त्वदधीनेत्यर्थः॥ मि २ र २ सुलभ

द्वित्वादिसंख्यानं समुपैति न गच्छति २=

अर्जुनस्य

तस्मादस्मच्छिं तया २८

कि॰टी॰
टं॰न३

दमेति जयाय प्रयातस्य तव संबंधिनां तेषां मघानां व्यसनानां॥ दुःखैः तेषां व्यसनेषु घ्नमिति वैजयंती॥ मघवा इंद्रः॥ योस्माभिरुपास्य इति भावः॥ विघातं निवारणं क्रियात्करोतु॥ आशिषि लिङ्॥ लोटा विमाशीरर्थे लिङः॥ तदस्मच्छित्तया न चेतः॥ खेदयितव्यं॥ जमार्थिनात्त्वया अन्यथा तदसंभवादिति भावः॥ ५२॥ मा गा इति॥ असंबाधो संकटो विजन इत्यर्थः॥ संकटं नानुसंबाध इत्यमरः॥ शिवोऽबाधः द्वयोरन्यतरस्य विशेषणत्वविवक्षायां विशेषणसमासः॥ असिन्नसंबाधशिवेपि देशे चिराय चिरं॥ एकस्मा सो चरश्चेति एकचरः॥ एकाकी वसन्॥ प्रमादं दौर्बल्यं मा गाः॥ इणो गा लुङीति गादेशः॥ न च तिःस्पृहस्य मम न किंचित्करः॥ प्रमाद इति वाच्यमित्याह॥ मात्सर्येति॥ मत्सर एव मात्सर्यं द्वेषः रागः स्नेहः ताभ्यामुपहतात्मनां रागद्वेषदूषितस्वभावानां॥ मानसानि मनांसि॥ साधुष्वसज्जे

३८ — १ — नि३ — ६

प्रियेषु यैः पार्थ विनोपपत्या विचिंत्यमानैः क्लममेति चेतः॥ तव प्रयातस्य जयाय तेषां क्रियादघानां मघवा विघातं॥ ५२॥
मा गाश्चिरायैकचरः प्रमादं वसन्नसंबाधशिवेपि देशे॥ मात्सर्यरागोपहतात्मनां हि स्खलंति साधुष्वपि मानसानि॥ ५३॥
तदाशु कुर्वन्वचनं महर्षेर्मनोरथान्नः सफलीकुरुष्व॥ प्रत्यागतं त्वास्मि कृतार्थमेव भुजोपपीडं परिरब्धुकामा॥ ५४॥

नेषु विषये स्खलंति परिवर्त्तंते॥ अत्र प्रमादस्खलनयोः कार्यकारणसमर्थनरूपोऽर्थांतरन्यासोऽलंकारः॥ ५३॥ निगमयति॥ तदिति॥ तत्तस्मात्कारणात् आशु महर्षेर्वचनं कुर्वन् तपश्चरन्नित्यर्थः॥ नोस्माकं मनोरथान् सफलीकुरुष्व॥ वैरिनिर्यातनेनास्मान् प्रतिष्ठापयेत्यर्थः॥ प्रार्थनायां लोट्॥ किंच॥ कृतार्थं कृतकृत्यं प्रत्यागतं त्वा त्वां॥ त्वामौ द्वितीयाया इति त्वादेशः॥ स्तनयोरुपपीड्य स्तनोपपीडं॥ सप्तम्यां चोपपीडरुधकर्ष इति णमुल्॥ परिरब्धुकामोऽयस्याः सा परिरब्धुकामास्मि आलिंगितुमिच्छामीत्यर्थः॥ तुं काममनसोरपीति मकारलोपः॥ आकांक्षायां लिङ्॥ अथवा दादालिंगनमपि नाडी मे प्रेरोचत इति भावः॥ ५४॥

विकुर्वीति
श्रीगो १८
नमेर२२
२८
३८

इति॰ मत्त॰ २४ रि॰ ५ पासा ५

रि॰ उदीरितामिति ॥ सोऽर्जुनः ॥ इत्थमिति स्थापनेन नाश्चिरायाज्ञसेन्या द्रौपद्या उदीरितामुक्तां नवीकृतः ॥ उन्नह्य हृदयेन ॥ तथा प्रसादितः ॥ अत एवोद्ग्राहितः ॥ मनसि निधापितः ॥ विप्रकारः परिभवो यया तां

आकरपेत्पर्थ॰२ वाचं आसाद्य आक्रम्य इत्यर्थः ॥ उदीचीं काष्ठां दिशं ॥ दिशस्तु ककुभः काष्ठा आशाश्चेत्यमरः ॥ आसाद्य तिग्मरश्मिरिव भृशं दिदीपे जज्वाल चुक्रोधेत्यर्थः ॥ ५५ ॥ अथेति ॥ द्विषः शत्रून् पुरः पश्य

आम॰ ३ न्निवास्थितः ॥ तथा पुरोधसा धौम्येन आरोपिता ॥ समन्त्रमारोपिता हेतिसंहतिरायुधकलापो यस्य स तथोक्तः ॥ हेतिर्ज्वालाङ्कुरायुध इति वैजयन्ती ॥ सोऽर्जुनो रम्यः सौम्यः सन्नपि अभिचारः

परहिंसाप्रयोजनं यस्याः सा आभिचारिकी प्रयोजनमिति ठक् ॥ अथ तां क्रियां गतः ॥ अभिचारकर्मणि नियुक्तः ॥ इत्यर्थः ॥ मन्त्र इव रम्यः प्रकृत्या रमणीयः भीषयत इति भीषणं ॥ नन्द्यादि

त्वाल्ल्युः प्रत्ययः ॥ वपुः बभार प्रशान्तमन्त्रप्रयोगात् अभेदाद्दिव सोऽप्यवस्थाभेदाद्भीषणो बभूवेत्यर्थः ॥ ५६ ॥ अविलंघ्येति ॥ यशसेति ॥ अलकेति ॥ अविलंघ्येति ॥ परैः शत्रुभिः अविलंघ्य

उक्तमायुधारोपरातावि इत्येकत्रस्थानमाहत्रि पि॰ ५८

उदीरितां तामिति याज्ञसेन्या नवीकृतोद्ग्राहितविप्रकारां ॥ आसाद्य वाचं स भृशं दिदीपे काष्ठामुदीचीमिव तिग्मरश्मिः ॥ ५५ ॥ अथा

भिपश्यन्निव विद्विषः पुरः पुरोधसारोपितहेतिसंहतिः ॥ बभार रम्योऽपि वपुः स भीषणं गतः क्रियां मन्त्र इवाभिचारिकीं ॥ ५६ ॥ अवि

लंघ्यविकर्षणं परैः प्रथितज्यारवकर्म कार्मुकं ॥ अगतावरिदृष्टिगोचरं शितनिस्त्रिंशयुजौ महेषुधी ॥ ५७ ॥ यशस्वी

मनतिक्रमणीयं विकर्षणं यस्य तत् ॥ अमोघाकर्षणमित्यर्थः ॥ किंच ॥ प्रथितो ज्यारवो गुणध्वनिः ॥ कर्म च बाणमोक्षादिकं यस्य तत्कार्मुकं चोद्वहन्नित्यन्वयः ॥ तथा अरी

णां दृष्टिगोचरं ॥ दृष्टिपथमगतौ आहवे सन्निवर्जितावरस्येति भावः ॥ निर्गतस्त्रिंशतोऽङ्गुलिभ्यो निस्त्रिंशः खड्गः ॥ ड प्रत्यये संख्याया अतच्छुरुषस्योपसंख्यानात्समासान्तः ॥ तेन शिते

न निस्त्रिंशेन युक्त इति शितनिस्त्रिंशयुजौ ॥ सत्सूद्विषेत्यादिना क्विप् ॥ महेषुधी ॥ महान्निषङ्गौ इषवो धीयन्ते अनयोरिति विग्रहः ॥ कर्मण्यधिकरणे चेति कप्रत्ययः ॥ तूणोपासं

गतूणीरनिषंगा इषुधिर्द्वयोः ॥ तूण्यां खड्गे तु निस्त्रिंशचन्द्रहासासिरिष्टयः इत्यमरः ॥ ५७ ॥ यशसेति ॥ किंचगोत्रभिदायुधहन्ती ॥ वज्रप्रहारं धारिणी ॥ खाण्डवदाहसंभवादिति

इन्द्रस्यायुधहन्ती॰ १

कि. टी.
घं. नः
११.
३५

त्वा

भावः॥ महसा स्वकांत्या॥ यशसेव मूर्तेन यशकीर्त्यैव मुहुरातिरोदधत्॥ आच्छादयत्॥ सरत्नं रत्नसहितं॥ अत एव ज्वलितज्योति दीप्ततारकं॥ ज्योतिस्तारानिभा ज्वालापुत्रार्थधरास्विति वैजयंती॥ दिवोंतरं नभो मध्यमिव स्थितं॥ अंतरं परिधानीये बाह्येऽस्वीयें तरात्मनि॥ अवीवतु मध्यप्रकाशोऽ तिवैजयंती॥ कवचं चोद्वहन्॥ ५८॥ अलकेति॥ सो ऽर्जुनः॥ अलकाधिपत्येन यक्षेण दर्शित भक्तः॥ शिवं निर्बाधं॥ उर्वीधरवर्त्म हिमवन्मार्गं संप्रयात् प्रतिष्ठमानः॥ सहसा मुहाध्यहष्टां विप्रयोगदुःखां श्रुनेत्राणं॥ तपोभृतां॥ हैमवतवासिनां तपस्विनां॥ हृदयानि समाविवेश॥ स्वस्यामासेत्यर्थः॥ सुंदरी छंदः॥ ५९॥ तिलकं॥ अनुजगुरिति॥ अथाशादिशः॥ दिविभवदिव्यं दुंदुभिध्वा

पशसेव तिरोदधन्मुहुर्महसा गोत्रभिदायुधक्षती॥ कवचं च सरत्नमुद्वहन्ज्वलितज्योति रिवांतरं नभः॥ ५८॥ अलकाधिपभृत्यदर्शितं शिवमुर्वीधरवर्त्म संप्रयान्॥ हृदयानि समाविवेश स क्षणमुद्वाष्पदृशां तपोधनां॥ ५९॥ अनुजगुरथ दिव्यं दुंदुभिध्वानमाशाः सुरकुसुमनिपातैर्व्योम्नि लक्ष्मीर्वितेने॥ प्रियमिव कथयिष्यन्नालिलिंग स्फुरंतीं भुवमनिभृतवेलावीचिबाहुः पयोधिः॥ ६०॥

नमनुजगुः अनुदधनुः॥ मनोर्लिट्॥ व्योम्नि सुरकुसुमनिपातैर्लक्ष्मीः॥ वितेने॥ पुष्पवृष्टिश्चाजनिष्टेत्यर्थः॥ किंच॥ अनिभृताश्चंचला वेलायां कूले या वीचयः ता एव बाहवो यस्य सतथोक्तः॥ वेलाकूलविकारयोरिति शाश्वतः॥ पयोधिः स्फुरंती मुल्लसंती॥ हर्षात्स्पंदमानां॥ भुवं प्रियं भावतारूपं कथयिष्यन्निव कथयितुमिवेत्यर्थः॥ लृट्शेषे चेति चकारात्क्रियार्थोपक्रियायां लृट्॥ आलिलिंग चिरं देवकार्यप्रवृत्तत्वादस्येति भावः॥ अत्र विशेषणमात्रसाम्यादप्रस्तुतस्य गम्यत्वात्समासोक्तिरलंकारः॥ तत्र च॥ प्रस्तुतयोर्भूमीसमुद्रयोः प्रतीपत्न्याः भाभेदेऽभेदे लक्षणातिशयोक्त्या किरालिंगनोक्तिरुत्प्रेक्षया एव सहस मुद्भाव यतीनतदंतर्भावं भजत इत्युभयोरंगांगिभावेन संकर इति विवेचनीयं॥ मालिनी छंदः॥ इति श्रीमहामहोपाध्यायमल्लिनाथसूरिविरचितायां किरातार्जुनीयव्याख्यायां घंटापथसमाख्यायां तृतीयः सर्गः॥ ३॥ समाप्तः॥ को. ब. ८

अनुगायते
ता
नायकाभ्यां

प्राकाराम नः ३=
२६।५
सर्व
३६

40

किरातस्य चतुर्थः सर्गः पत्रसंख्या ८

५

कि॰ टी॰
स॰ ४
१

ॐ श्रीगणेशाय नमः॥ ततरीति॥ ततः प्रस्थानानंतरं॥ जनप्रियः सोर्जुनः कलहंसा मेखलेवेत्युपमितसमासः॥ अन्यत्र कलहंसा इव मेखला कलहंसमेखलेति विशेषणसमासः॥ कूजंती कलहंसमेखला यस्याः सा तां॥ सहपाकेन वर्तंत इति सपाकानि पक्वानि तैः सस्यैराहितः संपादितः॥ पांडुतैव गुणो यस्याः सा तां भुवं॥ आसादितयौवनां प्राप्तयौवनां प्रियामिव॥ उपजनं जनसमीपे॥ अन्यत्र सलीसमतं समीपार्थेऽव्ययीभावः॥ उपाससाद उपगतवान्॥ उपमालंकारः॥ वंशस्थवृत्तं॥ विनम्रशालीति॥ सोर्जुनो विनम्रशालिप्रसवौघशालिनी रवनत शालिफलस्तोमशोभिनीरपेतपंकाः निष्पंकाः सरोरुहाणि अंभांसि यासु ताः॥ तथोक्ताः॥ उपायनीभूता अर्जुनं प्रत्युपहारीभूताः॥ शरद्गुणश्रियः॥ पूर्वोक्ताः शरद्गुणसंपदो यासु ताः॥ तथोक्ताः॥ उपसीमग्रामसीमा

ततः सकूजत्कलहंसमेखलां सपाकसस्याहितपांडुतागुणां॥ उपाससादोपजनं जनप्रियः प्रियामिवासादितयौवनांभुवं॥१॥
विनम्रशालिप्रसवौघशालिनीरपेतपंकाः ससरोरुहांभसः॥ ननंद पश्यन्नुपसीमसस्थलीरुपायनीभूतशरद्गुणश्रियः॥२॥
निरीक्ष्यमाणा इव विस्मयाकुलैः पयोभिरुन्मीलितपद्मलोचनैः॥ हृतप्रियादृष्टिवि[illegible]विभ्रमा मनोस्य जह्रुः शफरीविवृत्तयः॥

समीपेऽव्ययीभावः॥ समासांतविधेरनित्यत्वात्॥ अतष्टच्प्रतिसमासांतो न भवतीति॥ केचित्तु अन्येषामपि कठिनवपुषां दुर्गमे ग्रामसीम्नीत्यादिना नपुंसकप्रयोगदर्शनात्॥ नपुंसुविभक्त्यर्थेऽव्ययीभावः॥ समासांतविधेरनित्यत्वात्॥ स्थलीरकृत्रिमा भुवः॥ जानपदकुंडेत्यादिना अकृत्रिमार्थे ङीष्॥ पश्यन्ननंद॥ शरद्गुणेषु तादात्म्येनारोप्यमाणस्योपायनस्य प्रकृतसकस्यान्तरस्यामितिविकल्पात्साधुरित्याहुः॥ ... ॥२॥ निरीक्ष्यमाणेति॥ विस्मयाकुलैः आश्चर्यरसाविष्टैः॥ अत एवोन्मीलितानि पद्मान्येव लोचनानि येषां तैः॥ पयोभिर्निरीक्ष्यमाणा ... नेत्रक्रियोपयोगित्वात्... लंकारः॥ ... हृतः प्रियादृष्टिविलासानां विभ्रमः शोभा याभिस्ताः॥ तथोक्ताः इति मनोहरणहेतूक्तिः॥ विभ्रमः संशये भ्रांतौ शोभायां चेति वैजयंती॥ शफरीविवृत्तयो मत्स्यस्फुरितान्येवस्थितः॥ ... अस्यार्जुनस्य जह्रुः॥३॥ तुतोषेति॥ सोर्जुनः॥ सवारिजवारिणि कलमस्य शालिविशेषस्य शालयः॥ शालयः कलमाद्याश्च षष्टिकाद्याश्च ब्रीहयः स्मृताः॥ रमणीयस्य भा

मनो ४

नी॰२

मेखला ।१॥

विलो ।१॥

सरोभिः २

४॰

40

किरातस्यचतुर्थः सर्गः पत्रसंख्या ८

५

अवाप्तः किंजल्कविभेदः केशरापगमो येन तं तथोक्तं। कृतः उच्चकै रुच्चकं मथा तथा विवृत्तेन उद्धितेन पाठीनेन ३५ — योग्यसमागमे ९= — गतं तर्को चरतीत्यर्थः। वितर्कं संशयं पत्तु नोद त्वचि छेद्य पाठी न परा हत्या किंजल्का पायेन जल ... तस्य स्थलपद्मनी ३७

वो रामणीयकं॥ यो यथा दुरूपो तस्मादुक्तं॥ पश्यन्नधिकं तुतोष॥ अनुरूपसंगमत्वादिति भावः॥ तथा हि॥ सुदुर्लभे अनुरूपसंगमे लब्धे सति अतिशोभः॥ प्रकर्षलक्ष्मीयोग्य समागमनिमित्ता प्रकर्षसंपदं अभिनंदितुं को नार्हति सर्वोप्यभिनंदयत्येवेत्यर्थः॥ सामान्येन विशेषसमर्थनरूपोऽर्थांतरन्यासः॥४॥ नुनोदेति॥ आविष्कृता प्रकाशिता फेनपंक्तिर्यस्य तथोक्तं॥ अनेन मत्स्यविशेषेण पराहतम् आहतं॥ सहस्रदंष्ट्रः पाठीन इत्यमरः॥ पयः कर्तृ तस्यार्जुनस्य स्थलपद्मनीशंका निरस्तेत्यर्थः॥ अत्र निश्चयोत्तरसंदेहालंकारः॥५॥ कृतोर्मिलेखमिति॥ सोऽर्जुनः शिथिलत्वं आयतागच्छता दिने दिने तयत्ते क्षीयमाणेनेत्यर्थः॥ अत एव शनैः शनैः शांतरयेण

तुतोष पश्यन्कलमस्य सोधिकं सवारिजे वारिणि रामणीयकं॥ सुदुर्लभे नार्हति कोभिनंदितुं प्रकर्षलक्ष्मीमनुरूपसंगमे॥४॥ नुनोद तस्य स्थलपद्मिनीगतं वितर्कमाविष्कृतफेनसंहति॥ अवाप्तकिंजल्कविभेदमुच्चकैर्विवृत्तपाठीनपराहतं पयः॥५॥ कृतोर्मिलेखं शिथिलत्वमायता शनैः शनैः शांतरयेण वारिणा॥ निरीक्ष्य रेमे स समुद्रयोषितां तरंगितक्षौमविपांडु सैकतं॥६॥ मनोरमं प्रापितमंतरं भ्रुवोरलंकृतं केशररेणुनाणुना॥ अलक्तताम्राधरपल्लवश्रिया समानयंतीमिव बंधुजीवकम्॥७॥

तरंगा स्येव — अन्यथोर्मिलेखानुदयादिति भावः॥ वारिणा कृता ऊर्मयः पर्वाण्येव रेखा राजयो यस्य तत्तथोक्तं॥ तरंगास्य संजाता तानि तरंगितं भंगिमत् क्षौमं दुकूलं तद्वद्विपांडुसुभ्रमित्युपमालंकारः॥ समुद्रयोषितां नदीनां सिकतास्या संतीति सैकतं पुलिनं॥ सिकताशर्कराभ्यां चेत्यण् प्रत्ययः॥ तोयोत्थितं तत्पुलिनं सैकतं सिकतामयं इत्यमरः॥ निरीक्ष्य रेमे तुतोष॥६॥ ततस्त्रिभिः शालिगोपीवर्णयति॥ मनोरममिति॥ अणुना सूक्ष्मेण केसरेषु किंजल्केषु यो रेणुः परागस्तेनालंकृतं॥ अत एव मनोरमयतीति मनोरमं कर्मण्यण् प्रत्ययः॥ भ्रुवोरंतरं प्रापितं भ्रूमध्ये निवेशितमित्यर्थः॥ बंधुजीवकं बंधूकपुष्पं॥ बंधूको बंधुजीवक इत्यमरः॥ अलक्तताम्रस्य लाक्षारागरसरक्तस्य अध

त तरस्य संजातामिति इत्यमरः ४४

निःहितं २२

नवेति॥ महानिवेशः स्थानं पयोस्तो महानिवेशो पीवरो विस्तर्णः॥ पयोधरौ परितः समंतादित्यर्थः॥ अभितःपरितःसमयानिकषाहाप्रतियोगेऽपि इति द्वितीया॥ मुहुराहितं नवाम्रपाल्लोहितं बालातपताम्रमरविंदजं रजः परागं॥ सर्पता प्रसरता परिश्रमांभः पुलकेन स्वेदोद्गमेन चकासयंती शोभयंती॥ चकासतेर्णिजंताच्छतरि ङीप्॥ अलंकरणमप्यलंकुर्वती तत्रापि विकृतत्वेनेति भावः॥ ८॥ कपोलेति॥ पुनः कपोलसंश्लेषि यद्वतंसकर्णोत्पलं विलोचनत्विषां विभूषयंती माभरणस्याप्याभरणमिति भावः॥ कमलस्य गोपाययतीति गोपिका॥ पाति गोपाशी एवुल्प्रत्ययः॥ ताम् निरीक्ष्य पांडोः सुतेन अर्जुनेन शरदः॥ कृतार्थता याभावः कृतार्थतासाफल्यं॥ ततलोर्गुणवचनस्य पुंवद्भावो वक्तव्यः॥ मेने अपि मन्यते कर्मणि लिट्॥ शरदः स्वगुणसंपदस्सिद्धिनियोगलाभादिति भावः॥ ९॥ तिलकं॥ उपारताइ

नवाम्रपाल्लोहितमाहितं मुहुर्महानिवेशौ परितः पयोधरौ॥ चकासयंतीमरविन्दजं रजः परिश्रमांभःपुलकेन सर्पता॥ ८॥

कपोलसंश्लेषि विलोचनत्विषा विभूषयंतीमवतंसकोत्पलं॥ सुतेन पांडोः कमलस्य गोपिकां निरीक्ष्य मेने शरदः कृतार्थता॥ ९॥

उपारताः पश्चिमरात्रिगोचरादपारयंतः पतितुं जवेन गां॥ तमुत्सुकाश्चक्रुरवेक्षणोत्सुकं गवां गणाः प्रस्नुतपीवरोधसः॥ १०॥

ति॥ पश्चिमा चासौ रात्रिश्चेति विशेषणसमासः॥ अपररात्र इत्यर्थः॥ पूर्वा दिक् पश्चिमं नभः इत्यादिवत्॥ एकदेशो शब्दस्यैकदेशशब्दसामानाधिकरण्यादेकदेशे पर्यवसानं ननु पश्चिमं रात्रेरित्येकदेशिसमासः॥ तद्धितार्थे के पूर्वापरादिसूत्रे पश्चिमशब्दग्रहणात्॥ अत एवाह॥ पूर्वैकदेशेत्यादिना॥ समासांतोऽपि तस्यापि पूर्वापरादिसूत्रोक्तसमासविषयत्वादिति प्रकाशावर्षस्त्वेकदेशिसमासमेवाश्रित्य समासांतमाह तन्मृग्यं॥ गावश्चरंत्यत्रेति गोचरो गवां जाग्धि स्थानं पश्चिमारात्रौ यो गोचरस्तस्मादुपारताः॥ सन्निवृत्ताः॥ जवेन गां भुवं पतितुं धावितुं अपारयंतः॥ अशक्नुवंतः॥ प्रस्नुतपीवरोधसो वत्सस्मरणात् स्रवत्क्षीरा पीनं ऊधस्तत्क्षीरमापीनमित्यमरः॥ ऊधसानङ् इति स्त्रीग्रहणं कर्तव्यं इति नियमात्॥ नानङादेशः॥ उत्सुका वत्सेषु उत्कंठिता गवां गणास्तमर्जुनमीक्षणोत्सुकं

पुलकेन २४

वत्सं ३

नि

तुं

काम्ये देहः क्लीवपुंसोः शारीरं वर्ष्म विग्रह इत्यमरः ॥

दर्शनलालसं चक्रुः ॥ स्वर्गेषु पशुवाग्वज्रदिङ्नेत्रघृणिभूजले ॥ लक्ष्यदृष्ट्या स्त्रियां पुंसि गौरित्युभयत्राप्यमरः ॥ अत्र स्वभावाख्योऽलंकारः ॥ स्वभावोक्तिरलंकारो यथावद्वस्तुवर्णनं परीतामि
तिलक्षणात् ॥ १० ॥ परीतेति ॥ उत्तावजये उत्क्रांतरभंगे सति जयश्रिया परीतं व्याप्तं उच्चैर्नदंतं तटसिंधुरोधसं रु णासरित्तटं शारदीभवां शारदीं ॥ पुष्टिं अवयवोपचयं दधतं गवा
मधिपं महोक्षं सविग्रहं मूर्त्तिमंतं दर्पमिवाश्चर्येणाद्राक्षीत् ॥ ११ ॥ विमुच्यमानैरिति ॥ हिमानिविशदैः हिमसंघातशुभ्रैः ॥ हिमानी हिमसंहतिरित्यमरः ॥ इद्धवरूणेत्या
दिना ङीष् ॥ हेतुसन्निपोगादानुगागमश्च ॥ गवां कदंबकैः ॥ कर्त्तृभिः मंथरं मंदं मुच्यमानैरितिभावः ॥ शारन्नदीनां संबंधिभिः ॥ शारद्ग्रहणं आह्लादनित्यत्वं इत्यर्थः ॥ तत्र पुलिनादिति भावः ॥ पु

परीतमुक्षावजये जयश्रिया नदंतमुच्चैः (दंत) क्षततसिंधुरोधसं ॥ ददर्श पुष्टिं दधतं सशारदीं सविग्रहं दर्पमिवाधिपं गवाम् ॥ ११ ॥ विमुच्य
मानैरपि तस्य मंथरं गवां हिमानीविशदैः कदंबकैः ॥ शारन्नदीनां पुलिनैः कुतूहलं गलद्दुकूलैर्जघनैरिवादधे ॥ १२ ॥ गतान्प
शूनां सहजन्मबंधुतां गृहाश्रयं प्रेम वनेषु बिभ्रतः ॥ ददर्श गोपानुपधेनु पांडवः कृतानुकारानिव गोभिरार्जवे ॥ १३ ॥

पुलिनैः कर्तृभिः ॥ गलद्दुकूलैर्जघनैरिव तस्यार्जुनस्य कुतूहलमाददे (कौतुकं) ॥ आहितं कौतूहलं कौतुकं च कुतूहलमित्यमरः ॥ १२ ॥ गतानिति ॥ पांड
वोऽर्जुनः पशूनां गवां सहजन्म येषां ते सहजन्मानः ॥ सोदरास्त एव बंधवस्तेषां भावस्तत्तां गतान् पशुषु सोदराभिमानवत इत्यर्थः ॥ गृहा
श्रयं गृहविषयं प्रेम वनेषु बिभ्रतः ॥ वनेषु गृहाभिमानिन इत्यर्थः ॥ आर्जवे विधेयत्वे गोभिः कृतानुकारान् ॥ अनुकृतानिव स्थितान् उत्प्रे
क्षा ॥ ततो विधेयानित्यर्थः ॥ गाः पातीति गोपाः गोपालकाः ॥ आतोऽनुपसर्गे क इति कप्रत्ययः ॥ तान् उपधेनु धेनुसमीपे समीपार्थेऽव्ययीभावः

कि. टी. चं. २ ५२

हा २४

अथ चतुर्भिर्वीनर्त्तकीसाम्येन वर्णयति॥ परिभ्रमदिति॥ मूर्द्धजाः षट्पदा इवेत्युपमितसमासः॥ सरोजवारुभिरित्युपसमासोऽनुसाराव॥ परिभ्रमद्भि बलाद्भिः
र्मूर्द्धजैः षट्पदैर्दीर्घैराकुलितानि तैः॥ दंताः केशरा इवेत्युपमितसमासः॥ स्मितोदयेन आदर्शिताः ईषत्प्रकाशिता दंताः केसरा येषां तैस्तथा कैः॥ चल
त्कुंडलरश्मिरंजितैः॥ चंचलकनकवर्णविष्टनप्रभालिप्तैः॥ अत एव नवातपामृष्टं बालातपस्पृष्टं यत्सरोजं तद्वच्चारुभिर्मुखैरुपलक्षिताः॥२४॥
निबद्धेति॥ निबद्धेन अनुरुद्धेन निःश्वासेन विकंपिता अधरा यासां ता लतास्तथा॥ अत एव प्रस्फुरितैकपल्लवाः॥ प्रचलितैकपल्लवा॥ उपमार्थः॥ कचि

परिभ्रमन्मूर्द्धजषट्पदाकुलैः स्मितोदयादर्शितदंतकेसरैः॥ मुखैश्चलत्कुंडलरश्मिरंजितैर्नवातपामृष्टसरोजचा
रुभिः॥२४॥ निबद्धनिश्वासविकंपिताधराः लता इव प्रस्फुरितैकपल्लवाः॥ व्यपोढपार्श्वैरपवर्तितत्रिका विकर्षणोत्थापाणि वि
हारहारिभिः॥२५॥ छलानि रेजुर्सुरनारदादिकीः स्मितदंडिना मुत्सदयन्तु मायिनः॥

हा २५

त्सख्याश्लेषस्य हास्नि विषये वीसार्थत्वं सत्त्वपूर्णादिवदिति कैयटः॥ लता इव स्थिता रेवादेकवल्लवस्फुरणस्यापि लोके संभवात्। उपमेदेयं नोत्प्रेक्षा
किंचिद्व्यपोढानि विपरीतानि पार्श्वानि येषु तैः॥ पाणिविक्षेपमनोहरैः॥ पाणिविहारहारिभिश्च॥ प्राणिार्चितमनोहरैः॥ अंगहारांगविक्षेप इत्यमरः॥
विकर्षणैः मंथगुणाकर्षणैः॥ अपवर्त्तितत्रिकाः॥ संचलितनितंबाः॥ यद्यपि॥ पृष्ठवंशाधरे त्रिकमित्यमरः॥ तथापि नितंबो लक्षते॥ २५॥

नन्वेकत्वादितिभावः २५

४२

विवर्तनैः परिश्रमणैः मुहुः प्रणुन्नेषु कम्पितेषु इति स्वभावोक्तिः ४
ईषन्नदत्सु स्वनवत्सु ४

अभिप्रनृत्ता नृत्यन्ती गत्यर्थाकर्मकेत्यादिना कर्तरि क्तः गतिबुद्धिप्रत्यवसानार्थेत्यत्र चकारात् मानार्थत्वं ॥ वारयोषितो वेश्या इव वारस्त्री गणिका वेश्या इत्यमरः ४

व्रजेति ॥ व्रजाजिरेषु गोष्ठप्रांगणेषु अधिकरणे सप्तमीयं ॥ व्रजो गोष्ठाध्ववृन्देष्विति विश्वः ॥ अंबुदनादशंकिनीर्गर्जितभ्रमवतीरिति भ्रांतिमदलंकारः ॥ शिखंडिनां योषितो मयूरीः ॥ योषिद्ग्रहणं भोगातिशयात् ॥ उन्मदयत्सु उन्मदाः कुर्वत्सु ॥ तत्करोतीति णिच् ततः शतृप्रत्ययः ॥ मथां मंथनदंडानां ॥ वैशाखमंथमंथानमंथानो मंथे केत्यमरः ॥ कुंभेषु कलशेषु मृदंगवत् मंथरं मंद्रं स्वनदत्स्विति वाक्यसाम्योक्तिः ॥ भावलक्षणे सप्तमीयं ॥ १६ ॥ स मंथरेति ॥ मंथरं मंद्रं आवल्गिताः प्रेंखिताः पीवराः स्तना यासां ता स्तनपीवराः ॥ बल्लवीः ॥ गोपीः ॥ गोपे गोपाल गोसंख्य गोधुगाभीरबल्लवा इत्यमरः ॥ सोऽर्जुनो निरीक्षितुं नोपरराम ॥ न विरमति स्म ॥ उपा

परिश्रमेणाक्रांतानि ग्लानि विलोचनोत्पलानि यासां तास्तथोक्ताः ४

व्रजाजिरेष्वंबुदनादशंकिनीः शिखंडिनामुन्मदयत्सु योषितः ॥ मुहुः प्रणुन्नेषु मथां विवर्तनैर्नदत्सु कुंभेषु मृदंगमंथरं ॥ १६ ॥
स मंथरावल्गितपीवरस्तनीः परिश्रमक्लांतविलोचनोत्पलाः ॥ निरीक्षितुं नोपरराम बल्लवीरभिप्रनृत्ता इव वारयोषितः ॥ १७ ॥

कलापकं
कुलकं ॥ पपात पूर्वां जहतो विजिह्मतां वृषोपभुक्तांतिकसस्यसंपदः ॥ रथांगसीमंतितसांद्रकर्दमान्प्रसक्तसंपातपृथक्कृतान्

च विभाषाकर्मकादिति परस्मैपदं लट्प्रत्यये शतृनुमन् ॥ अत्र चतुःश्लोक्यामुपमास्वभावोक्त्योः संसृष्टिः ॥ १७ ॥ पपातेति ॥ सोऽर्जुनः पूर्वां प्राक्तनीं विजिह्मतां वक्रतां जहतस्त्यजतः ॥ शारदिनि पंकत्वेन समरेखयैव सुगमत्वादिति भावः ॥ जहातेः शतृप्रत्ययः ॥ वृषोपभुक्तांतिकशस्यसंपदः ॥ वृषभचर्वितप्रांतसस्यसमृद्धीन् सुकृते वृषभे वृष इत्यमरः ॥ सीमंता इव सीमंताश्चक्रांगगतयः पद्धतयः सीमंतवंतः कृताः सीमंतिताः ॥ मत्वंतात्करोतीति णिच् क्तः ॥ णाविष्ठवद्भावान्मतुपो लुक् ॥ रथांगैश्चक्रैः ॥ सीमंतिताः सांद्रकर्दमाः घनीभूताः पंका येषु तान् ॥ प्रसक्तसंपातेन संततसंचारेण पृथक्कृतान् ॥ पथो मार्गान् ॥ पपात जगाम इति स्वभावो

१६

कि॰टी॰
४

जनैरिति॥ सोर्जुनः उपग्रामं ग्रामेषु विभक्त्यर्थेव्ययीभावः॥ अनिंद्यकर्मभिः अनिषिद्धवृत्तिभिः॥ वृत्तिश्चैकत्र कृष्यादिरन्यत्र शीलोञ्छादिः॥ विभक्ताभ्यकाग्राणि भावाभिप्रायः॥ इंगितं चेष्टा भूषणमलंकारश्चैतेषां तैस्तथोक्तैर्जनैर्वृतां अधिष्ठिता इत्यर्थः॥ अत एवाश्रमेषु मुनिस्थानेषु ये मंडपास्तदुपमाः॥ मंडपोपमाः॥ मंडपो स्त्रीजनाश्रय इत्यमरः॥ सपुष्पहासाः पुष्पविकाशमहिताः॥ तेन सहेत्यादिना बहुव्रीहिः॥ निवेशवीरुधो गृहगुल्मिन्यः॥ वीरुधो वलिगुल्मिन्याविति वैजयंती॥ भृशं सादरं ददर्श उपमालंकारः॥१९॥ तत इति॥ ततः स पूर्वोक्तो यक्षः॥ शरद्गुणश्रियं संप्रेक्ष्य दर्शनीयां कमनीयां चेत्यर्थः॥ शरद्गुण

जनैरुपग्राममनिंद्यकर्मभिर्विविक्तभावेंगितभूषणैर्वृतां॥ भृशं ददर्शाश्रममंडपोपमाः सपुष्पहासाः सनिवेशवीरुधः॥१९॥

ततः स संप्रेक्ष्य शरद्गुणश्रियं शरद्गुणालोकनलोलचक्षुषं॥ उवाच यक्षस्तमचोदितोपि गां न हींगितज्ञोवसरेवसीदति॥

॥२०॥ इयं शिवाय नियतेरिवायतिः कृतार्थयंती जगतः फलैः क्रियाः॥ जयश्रियं पार्थ पृथूकरोतु ते शरत्प्रसन्नाम्बुरनं

लोकनलोलचक्षुषं सतृष्णदृष्टिं॥ लोलं चलसतृष्णयोरित्यमरः॥ तमर्जुनमचोदितोपि अपृष्टोपि गां उवाच॥ तथाहीति॥ इंगितज्ञो भावज्ञः॥ इंगितज्ञो भावज्ञः॥ इंगितं हृद्गतो भाव इत्यमरः॥ सः अवसरे उक्तियोग्यकाले नावसीदति न वाक्प्रसंगं त्यजतीति नाष्टष्टः॥ कस्यचिद्ब्रूयादिति निषेधस्तु मनाकांक्षितोक्तिविषय इति भावः॥ सामान्येन विशेषसमर्थनरूपोर्थांतरन्यासः॥२०॥ इयमिति॥ हे पार्थ शिवाय नियतेः कल्याणकारिण्या नियतेः॥ शुभावहदैवस्य॥ आयतिः फलदानकालः॥ सेव जगतः क्रियाः कृष्यादिकर्माणि फलैः लाभैः॥ लाभनिष्पत्तियोगेषु जीवेभावे धनेफलमिति वैजयंती॥ ४३

उपैनी ति॥ स संश्रीयादिकं॥ परिणामेन परिपाकेन यारम्यतामुपैति॥ नदीः॥ अनौद्धत्यं गम्यरूपत्वमुपैति महीमपंकतां निष्पंकत्वमुपैति॥ तथाहि॥ संप्रति न
वै गुणैः पूर्वोक्तैः॥ शरद्गुणैः॥ संस्तवेन परिचयेन स्थिरं दृढमपि घनागमश्रियः प्रावृट्लक्ष्म्याः संबंधि तद्विषयमित्यर्थः॥ प्रेम तिरोहितं निरवधिकं कृतमित्यर्थः॥
गुणनं त्राः प्रमाणेन न परिचयं त्राः इति भावः॥ वास्तवालंकारः॥ पतंतीति॥ अस्मिन्नभसि विशदाः पतत्रिणो बलाका न पतंति न प्रसरंति॥ एतेनेदं चा
पाः पयोदपंक्तयश्च न पतंति तथापि श्रीकारणाभावेपि नभः परां श्रियं शोभां पुष्णाति॥ तथाहि रम्यं स्वभावसुंदरं वस्तु आहार्यमारोप्यमाणं गुणं नापे

उपैति स संपरिणामरम्यतां नदीरनौद्धत्यमपंकतां महीम्॥ न वै गुणैः साम्प्रति संस्तवस्थिरं तिरोहितं प्रेम घनागमश्रियः॥ २४॥
पतंति नास्मिन्विशदाः पतत्रिणो धृतेंद्रचापा न पयोदपंक्तयः॥ तथापि पुष्णाति नभः परां श्रियं न रम्यमाहार्यमपेक्षते गुणं
॥२५॥ विपाण्डुभिर्ग्लानतया पयोधरैश्च्युताचिराभागुणहेमदामभिः॥ इयं कदंबानिलभर्तुरत्यये न दिग्वधूनां कृशता न

तते॥ तत्र स्वभावस्यैव समर्थत्वादिति भावः॥ अर्थान्तरन्यासः॥ २५॥ विपांडुभिरिति॥ कदंबानिलशब्देन वर्षर्तुरुपलक्ष्यते सएव भर्ता तस्यात्यये वि
रहे ग्लानतया निर्जलतया दुर्बलतया च विपांडुभिः॥ च्युतानि अचिराभा विद्युत्ता एव हेमदामानि सुवर्णस्रगाभरणानि च येभ्यस्तैः पयोधरैः अंभो
भोधरैः अन्यत्र स्तनैरुपलक्षितानां॥ स्तनानां मेघानां पयोधराविति वैजयंती॥ दिश एव वधूः तासां कृशता न राजते इति न किंतु राजत एव वियुक्तानाम
आनीर्त्तमुदितहृष्टत्वाभावे न मालिनाकृशतानिस्मरणादिति भावः॥ सामान्यतः प्रसक्तमर्थं जसंकोचकेन नञ्नेनू धदितीयानापि निषेधति॥ यथाहवो

धृपनस्पै

कि॰स॰का॰
खं॰ ५
५५

विहायेति॥ मदात्यया मदस्त्ययाद्रक्तकंठस्याप्यरक्तस्वरस्य कंठशब्दैर्नंदतः स्वरोल्लसने॥ शिखंडिनः संबंधिनि उदिते उच्चैस्तरे रुते कूजिते वांछां विहाय मुक्त्वा श्रो
त्रेष्कृतिः स्त्री श्रवणं श्रवः इत्यमरः॥ उन्मदहंसनिःस्वनं मत्तमरालकूजितं श्रयति रंजति॥ नन्वकांडे कथं परिचितहारेणापरिचित्ते प्रीत्युदय इत्याशंक्याह अन्त
रंगस्यति॥ गुणा इति॥ प्रीणातीति प्रियः॥ इगुपधज्ञाप्रीकिरः कः इति कः प्रत्ययः॥ प्रियत्वे प्रीतिकरत्वे गुणाः अधिकृता नियुक्ताः॥ संस्तवः परिचयो नाधिकृताः
न समर्थाः इत्यर्थः॥ प्रेमाधाने गुणवत्त्वं प्रयोजकं न परिचय इत्यर्थः॥ २५॥ अमीति॥ अमी पृथून् स्तंबान् गुच्छान् बिभ्रतीति पृथुस्तंबभृतः॥ स्तंबो गुच्छस्तृणादि

विहायवांछामुदिते मदात्ययादरक्तकंठस्य रुते शिखंडिनः॥ श्रुतिः श्रयत्युन्मदहंसनिःस्वनं गुणाः प्रियत्वेऽधिकृता
न संस्तवः॥ २५ अमीपृथुस्तंबभृतः पिशंगतां गता विपाकेन फलस्य शालयः॥ विकासि वप्राम्भसि गंधसूचितं
ति नमंनिघ्रातुमिवासितोत्पलम्॥ २६॥

नः इत्यमरः॥ फलस्य प्रसवस्य विपाकेन परिणामेन पिशंगतां गताः॥ शालयो व्रीहिविशेषाः॥ वप्राम्भसि केदारोदके॥ पुंनपुंसकयोर्वप्रः केदारः क्षेत्रम
स्य तु इत्यमरः॥ विकासि विकचं गंधेन सूचितं ज्ञापितं॥ असितोत्पलं निघ्रातुमाघ्रातुमिव॥ निध्यातुमिवेति पाठे द्रष्टुमिवेत्यर्थः॥ निर्वर्णयितुमिवे
त्यर्थः॥ निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणम् इत्यमरः॥ अत्र फलभारान्नमितस्य नमनस्य निघ्राणफलमुत्प्रेक्ष्यत इति फलोत्प्रेक्षा॥ २६॥
अथ चतुर्भिः कलापकमाह॥ मृणालिनीनामिति॥ २७॥ विपांडुरिति॥ २८॥ अदीपितमिति॥ २९॥ मृणालिनीनामिति॥ मृणालिनीनां पद्मल

नमंति

सि १४

४४

तानं॥ त्विषा हरितवर्णेन अनुरंजितं तद्वर्णयत्ताम्मापादितमित्यर्थः॥ तथा अंभोज पलाश शोभया पद्मपत्र कांत्या आरूपेणेत्यर्थः॥ विभिन्नं मिश्रितं तथा स्फु
रत्कालिशिखा पिशंगितं स्फुरद्भिः कमलाग्रैः पिशंगीकृतं पिंगलं कृतं॥ नानावर्णत्वात् द्युतं विलापितं॥ अहिविद्विषः इन्द्रशत्रोः॥ सर्पे वित्रासुरेप्यहिरि
ति वैजयंती॥ धनुःखंडमिव स्थितं॥ नित्यसमासेऽनुत्तरपदस्थस्येति विसर्जनीयस्य सत्वं षत्वं॥ पयोवशाभः अपादिश्यपधावतां इत्यंगांगिना संबंधः॥
अत्र धनुःखंडस्य द्युतस्य लोके प्रसिद्धत्वाद् दुष्टं हेतयंनोपमा॥ २७॥ विपांडुरिति॥ विपांडुम् अभ्रम् अनिलोद्धतं अनिलेनोन्नतं क्षिप्तं॥ सप्त सप्तपलाशानि

मृणालिनीनामनुरंजितं त्विषा विभिन्नमम्भोजपलाशशोभया॥ पयःस्फुरच्छालिशिखापिशंगितं द्युतं धनुःखं
डमिवाहिविद्विषः॥२७॥ विपांडु संव्यानमिवानिलोद्धतं निरुंधतीः सप्तपलाशजं रजः॥ अनाविलोन्मीलितबाणचक्ष
ुषः सपुष्पहासा वनराजियोषितः॥२८॥

येषां ते हस्ताः सप्तपलाशाः॥ क्वचित् संख्याशब्दस्य हत्रिविषये वीप्सार्थत्व सप्तपर्णा
शजं रजादेव दित्युक्तं तेषां पुष्पाणि सप्तपलाशानि येषां ते हस्ताः सप्तपलाशाः हीनं प्रसवे सर्वमित्यमरः॥ फलेलुगिति अणो लुक्॥ तेषु जा
तं सप्तपलाशजं रजः॥ रागं संव्यानमुत्तरीयमिव॥ संव्यानमुत्तरीयं चेत्यमरः॥ निरुंधतीः निर्वारयंतीः॥ अनाविलानि अकलुषाणि उन्मीलितानि
च बाणानि नीलसैरेयकाणि चक्षूंषि यासां ताः तथोक्ताः॥ नीलस्त्वर्थगलो दासी बाणः आर्त्तगपाकपीति धन्वंतरिः॥ पुष्पहासेन पुष्पाणि हासा इव

कि॰ का॰
स॰ च॰
६

४५

अदीपितमिति॥ वैद्युतजातवेदसा वैद्युताग्निना॥ अदीपितं अप्रकाशितं॥ विद्युत्प्रकाशासहदृष्टिप्रतिघातकत्वात् अद्राहित्यं गुण इतिभावः॥ सितांबुदानां छेदैः खंडै स्तिरोहितातपं न दृष्टिबाधानाप्यतः पबाध इतिभावः॥ सांतरवारिशीकरैः विरलांबुकणैः तताततं व्याप्तमध्यं सरोजवायुभिः॥ शिवं रम्यं नभोवर्त्म चापृदिशणस भावोक्तिरलंकारः॥२९॥ सितेति॥ अपदिश्यपधावतामितिपूर्वश्लोकत्रयोक्तपयःप्रभृतिकमुपदिश्य धावतामममीषां सितछदानां पतत्रिणां हंसानां हंसा स्तु श्वेतगरुतश्चक्रांगामानसौकस इत्यमरः॥ रुतैः शब्दैः॥ ग्रथितानि दृढाः॥ ग्रथितं गुंफितं गाढमित्यमरः॥ वारिदरोधनिर्गता मेघापराधनिर्मुक्ताः॥ अतएव

अदीपितं वैद्युतजातवेदसा सितांबुदछेदतिरोहितातपं॥ ततांतरं सांतरवारिशीकरैः शिवं नभोवर्त्म सरोजवायुभिः॥२९॥ सि
तछदानामपदिश्य धावतां रुतैरमीषां ग्रथिताः पतत्रिणां॥ प्रकुर्वते वारिदरोधनिर्गताः परस्परालापमिवामला दिशः॥३०॥ कलापकं
विहारभूमेरभिघोषमुत्सुकाः शरीरजेभ्यश्च्युतयूथपंक्तयः॥ असक्तमूधांसि पयः क्षरंत्यमूरुपायनीव नयंति धेनवः॥३१॥ ना ४५

वत्वमलाः प्रसन्ना दिशः परस्परालापं प्रकुर्वते इव इत्युत्प्रेक्षा मेघापरोधनिर्मुक्ताः॥ चिरादुछसिता इति हंसकूजितव्याजेन परस्परमालपंतीत्युत्प्रेक्षार्थः॥३०॥ कुलकं
विहारेति॥ विहारभूमेः अपरराज्ञे गोचरादित्यर्थः॥ आगच्छंत्य इतिशेषः॥ अभिघोषं उत्सुकाः व्रजं प्रत्युत्कंठिता इतिभावः॥ वत्सप्रेम्णा इतिभावः॥ घोष आ भीर पल्ली स्यादित्यमरः॥ च्युताः भ्रष्टाः यूथेभ्यः पंक्तयो यासां ताः॥ अमूर्धेनवः असक्तमप्रतिबंधं पयः क्षरंति स्रवंति वत्सश्रवणात् प्रस्नुवंतीत्यर्थः॥
क्षरंतेः शतृप्रत्ययः॥ ऊधांसि शरीरजेभ्यः अपत्येभ्यः उपायनानीव अतिनोषकारिणीविप्युत्प्रेक्षा॥ नीरं नयंति प्रापयंति यथालोके कुतश्चित्प्रवासादा
गत्य मातरः किंचिन खाद्यमानयंति तद्वदित्यर्थः॥३१॥ श्रीरामजी सहायं करोतु॥

स्मरणात् ५५

युता भ्रष्टा यूथानां कुलानां पंक्तिः श्रेणीर्यासां ताः॥ सजातीयैः कुलं यूथमित्यमरः

रूपे = १

जगदिति ॥ जगत्त्रयस्तुतिर्जगत्कारणं ॥ आज्यादिहविर्ग्रहणेनेति भावः ॥ जगतामेकपाविनी मुखबोधिनी व्रजोपकंठं गोष्ठांतिकं ॥ इणांति कार्यमध्याद्वितीया
वेति द्वितीया ॥ उपकंठांतिकाभ्यर्णाभ्यग्रा अप्यभितोऽव्ययमित्यमरः ॥ ननये वर्त्मने रूपेयुषी संगता उपेयिवाननाश्वाननूचानश्चेति क्वसु प्रत्ययांतो निपातः ॥ उगि
तश्चेति ङीप् ॥ असो गवां सममिति संस्मरति ॥ मंत्रैः ऋग्यजुःषादिभिः ॥ मंत्रो ऋगादिषु शुक्लिरिति वैजयंती ॥ संहिताया जिता आहुतिरिव समग्रां द्युतिमुपेयुषी ॥ उपेति २
आहुतिरपि जगत्त्रयस्तुतिर्जगदेकपाविनी च ॥ अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ॥ आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति स्मरणात् इति भावः ॥ ३२ ॥

जगत्त्रयस्तुतिर्जगदेकपाविनी व्रजोपकंठं तनये [illegible]मीयुषी ॥ द्युतिं समग्रां समितिर्गवामसावुपेति मंत्रैरिव संहिताहुतिः ॥ ३२
कृता[illegible]धानं जितबर्हिणध्वनौ सुरक्तगोपीजनगीतनिःस्वने ॥ इदं जिघत्सामपहाय भूयसीं न सस्यमभ्येति मृगीकदंबकं ॥ ३३

कृतेति ॥ जितबर्हिणध्वनौ केकानुसारिणीत्यर्थः ॥ एतेन षड्जस्वरं आश्रित्य गायंतीति गम्यते ॥ यथाह मातंगः ॥ षड्जं मयूरो वदतीति ॥ गाः पांतीति गोपाः
तेषां भार्या गोप्यः ॥ आतोनुपसर्गे कः इति कः प्रत्ययः ॥ पुंयोगादाख्यायामिति ङीप् ॥ तास्वजनः ॥ सुरक्तो मधुरकंठो गोपीजनः वल्लवीजनः त
स्य गीतनिःस्वने कृतावधानमेकाग्रचित्तं इदं पुरोवर्ति मृगीकदंबकं भूयसीमतिमहतीं जिघत्सामत्तुमिच्छां ॥ अदेः सनंताद् उः प्रत्ययः ॥ लु
ङ्सनोर्घस्लृ इति च सादेशः ॥ अपहाय हित्वा सस्यं नाभ्येति नोपैति ॥ गीतामृतपानतृप्ता धाममपि न गणयंतीत्यर्थः ॥ ३३ ॥ रामजी सहायजी ॥

कि॰को॰

टी॰च॰

७

४६

असाविति॥शिरसाअग्रेणनम्रीभवन्नमन् प्रणमन्॥अपिअनास्थापरया अनादरपरयासरोरुहिण्याऽवधीरितोवज्ञातः॥अंभसासहचैनेतिभावः॥ स्मृते २

शुष्यन्नसौकलमःशालिविशेषोमनोभुवानप्तइव कामार्त्तइवाभिपांडुतामुपैति॥अत्रानास्थापरयेतिप्रकृतसरोरुहिणीविशेषणसामर्थ्यादप्रस्तु रा॰२

तनायिकाप्रतीतेःसमासोक्तिरुत्तिष्ठमानायाःसरोरुहिण्याःप्रतीयमानयानायिकयाशुद्धभेदे अभेदलक्षणातिशयोक्तिमहिम्ना अवधार

णाक्रियासंबंधनिर्वहंतीमनोभुवातप्तइवेत्युत्प्रेक्षा॥निर्वाहिकेत्यतिशयोक्त्यनुप्राणितासमासोक्तिःउपमेयोपमेयांगांगिभावेनसंकरः॥३४॥छ

असावनस्थापरयावधीरितःसरोरुहिण्याशिरसानमन्नपि॥उपैतिशुष्यन्कलमःसहांभसामनोभुवातप्तइ

वातिपांडुतां॥३४॥अमीसमुद्धूतसरोजरेणुनाहृताहृतासारकणेनवायुना॥उपागमेदुश्चरिताइवापदांगतिं

ननिश्चेतुमलंशिलीमुखाः॥३५॥

अमीइति॥समुद्धूतसरोजरेणुनेतिसौरभ्योक्तिः॥हृतासारकणेन उपात्तांबुकणेनेतिशैत्योक्तिः॥धारासंपात आसार इत्यमरः॥वायुना

हृताआकृष्टा अमीशिलीमुखाःभृंगाः॥आपदामुपागमेराजादिभयागमेदुश्चरिता दुष्टकर्माणश्चौरादय इव गम्यतइतिगतिं गंतव्यं

देशं॥देशोपायगमेगतिरितिवैजयंती॥निश्चेतुंनालं नसमर्थाः॥एकत्रवायोःसार्वत्रिकत्वेनौन्निश्चयादन्यत्रभयांधत्वादितिभावः॥३५॥ पादानाद २

मुखैरिति॥विद्रुमभंगलोहितैः॥मुखैःपिशंगीःकलमस्यशिखाः॥शाल्यग्राणिबिभ्रतीअतः शिरीषकोमला॥विकसितशिरीषसवर्णा ४६

पिशंगवर्णा १०

द्वयोरन्यतरस्य विशेषणत्वाविवक्षायां विशेषणसमासः तेषां विगलितजलभार शुक्लभासामभ्राणां ३४

नगर्थस्य

इंद्रस्य

नर्थः॥ असौ मुक्तावली गोत्रभिदो धनुषः श्रियमनुगच्छति॥ अनुकरोति नानावर्णत्वादिंद्रधनुष इयभातीत्युपमालंकारः॥३३॥ इतीति॥ अथ तत्र तस्मिन्सर्वोन्नेपते इति इत्यं कथयति सति नातिदूरादनतिदूरादीषद्दूरस्मर्थः॥ नञ्शब्दस्य सुप्सुपेति समासः॥ पिहितोसरश्मि बिंबस्तिरोहितार्क मंडलस्तथोक्तिः॥ नगाधिराजो हिमाद्रिं विगलितो जलभारो येषां तेन तथोक्ता॥ अत एव शुक्लभासः मेघमुचां निचय इव मेघवृन्दमिव दृशां दृष्टः॥३४॥ तमितीति॥ औपछंदसिकं वृत्तं॥ जिष्णुरर्जुनः॥ अतनुभिर्महतीभिः वनराजिभिः श्यामितः श्यामलः उपत्यकांतात्यास

सुरैरसौ विद्रुमभंगलोहितैः शिखाः पिशंगीः कलमस्य बिभ्रती॥ शुकावली व्यक्तशिरीषकोमला धनुःश्रियं गोत्रभि

दोनुगच्छति॥३३॥ इति कथयति तत्र नातिदूरादथ दृदृशे पिहितोष्णरश्मिबिंबः॥ विगलितजलभारशुक्लभासां नि

चय इवांबुमुचां नगाधिराजः॥३४॥ तमतनुवनराजीश्यामितोपत्यकांतं नगमुपरि हिमानीगौरमासाद्य जिष्णुः॥

नभूमिप्रदेशा यस्य तं तथोक्तं॥ उपाधिभ्यां त्यकन्नासन्नारूढयोरिति त्यकन्प्रत्ययः॥ उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यकेत्यमरः॥ उपरि हि मानीभिर्हिमसंहतिभिः गौरं शुभ्रं तं नगं हिमाद्रिमासाद्य॥ अपगतो निरस्तो मदरागो यस्य तस्य असितं नीलमंबरं वासोंतरीयमित्यर्थः॥ अं तरीयोपसंव्यानपरिधानान्यधोंशुके इत्यमरः॥ बिभ्रतं सीरं हलं पाणौ यस्य तस्य सीरपाणेर्हलायुधस्य॥ सत्तमुपमापूर्वपदस्य बहुव्रीहिः॥

हलायुधः नीलांबरो रौहिणेयस्तालांको मुसली हली संकर्षणः सीरपाणिरित्यमरः १५

स्मृतवान

प्रहसनार्थेभ्यः परे निष्ठासप्तम्योभवत इति सप्तम्याः परनिपातः॥ लक्ष्मीशोभां अनुसस्मार॥ अत्र सदृशदर्शनेन सदृशान्तरस्मरणात्स्मर
णालंकारः॥ सदृशं सदृशानुभवाद्यत्स्मर्यते तत्स्मरणमिति विद्याधरः॥ ३८॥ इति श्रीपदवाक्यप्रमाणपारीणमहामहोपाध्यायको

व्यपगतमदराग

उपरतमदरागस्यानुसस्मार लक्ष्मीमसितमधरवासो बिभ्रतः सीरपाणेः॥ ३८॥ इति श्री किरातार्जु
नीये महाकाव्ये लक्ष्म्यंके चतुर्थः सर्गः॥ ४॥

शरद्वर्णनं नाम ४

लाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयव्याख्यायां घंटापथसमाख्यायां चतुर्थः सर्गः॥ ४॥ रामजी रामजी
संवत १८४७ वैशाखवदी तृतीयायां समाप्तः लिखितं गिरधारीराम शुभमस्तु॥ रामजी राम

किरातस्य पंचमः सर्गः पत्रसंख्या ४

५

कि॰का॰री॰
वं॰पं॰
१
५८

ॐ श्रीगणेशाय नमः॥ अथ हिमवद्वर्णनमारभमाणेन तत्र पंचदशभिः कुलकमाह॥ अथेति॥१॥ नयनेति॥२॥ स्निनीति॥३॥ भुजगेति॥४॥ मरीचीति॥५॥ अविरतेति॥६॥ स्थगितमिति॥७॥ नवेति॥८॥ प्रविधीति॥९॥ रहितेति॥१०॥ अपितेति॥११॥ समुरेति॥१२॥ विकचेति॥१३॥ अरेति॥१४॥ वितनेति॥१५॥ आदिकुलकम्॥ अथेति॥ अथ सोऽर्जुनो मेरुमहीभृतो हेमाद्रेर्जयाय नु जयार्थं वा नु शब्दो वितर्के॥ नु पृच्छायां वितर्के चेत्यमरः॥ रभसो वेगः॥ रभसो वेगहर्षयोरिति वैजयंती॥ विश्वप्रकाशः॥ न हत्या रभसया वेगोत्कटतयेति यावत्॥ अर्शादिभ्योऽच्प्रत्ययः॥ दिगंतानां दिहृक्षया द्रष्टुमिच्छया वा॥ नभोंऽतरिक्षं विलंघयितुं॥

अथ जयाय नु मेरुमहीभृतो रभसया नु दिगंतदिदृक्षया॥ अभिययौ स हिमाचलमुच्छ्रितं समुदितं नु विलं-
घयितुं नभः॥१॥ नयनमंडलदीपितमेकतः सततनैशनमोवृत्तमन्यतः॥ हसितभिन्नतमिस्रचयं पुरः शिवमिवानुगतं गजचर्मणा॥२॥

व्यतिक्रमितुं वा समुदितं समुत्पतितुमिवावस्थितमित्यर्थः॥ कुतः उच्छ्रितं उन्नतं हिमस्य अचलं अधिययौ॥ अत्र निर्द्धारितानेकफलश्चोत्प्रेक्षात्पगुणनिमित्ताः उत्तानक्रियात्वे हासा च मंजकाश्र...योगात्वनीयमानेपि संदेहः॥ द्रुतविलंबितवृत्तं॥ द्रुतविलंबितमाह नभौभरौ विति लक्षणात्॥ नयनेति॥ एकतः एकस्मिन्भागे॥ सार्वविभक्तिकस्तसिः॥ नयनमंडलेन दीपितं प्रकाशितं॥ अन्यतः अन्यस्मिन्भागे सततेन निषिद्धेन नैशेन निशिभवेन तमसा वृत्तं॥ एकत्राह्नारात्मा चान्यत्र संग

हिमाचलं

विशिष्टा २१

४८

तदा पूर्वपदस्येति वक्तव्यात् प्रथमैकवचनं ॥ सुद्

तमित्यर्थः ॥ अत एव पुरोऽग्रे हसितेनाट्टहासेन विभिन्नतमिस्रचयं निरस्ततमस्तोमं ॥ तथा गजचर्मणानुगतं पश्चाद्व्याप्तं ॥ पश्चात्सादृशयोरन्वित्यमरः ॥ शि- (स्प २८)
वमिव स्थितं ॥ नयनतेजःप्रसारोऽप्यस्य कारणमिव कुत्राचित्तर्हि समाप्यत इति महत्त्वातिशयोक्तिः ॥ २ ॥ क्षितीति ॥ परस्परैरन्योन्यैः कर्मव्यतिहारे द्विर्भवत (सर्वनाम्नो २५)
(त्यो ३५) इति वक्तव्यात् परशब्दस्य द्विर्भावः ॥ समासवच्च बहुलं यदा समासवत्तदा प्रथमैकवचनं कस्कादित्वाद्विसर्जनीयस्य सत्वं बहुवचनं च ॥ अन्योन्यशब्दवद्यथा
माघे ॥ अन्योन्येषां पुष्करैरामृशन्त इति ॥ अदृष्टाः परस्परैर्येस्ते अदृष्टपरस्परास्तैस्तथोक्तैः ॥ क्षितौ नभसि सुरलोके च निवसन्तीति तैस्तथोक्तैर्भूर्भुवःस्वर्लो-

क्षितिनभःसुरलोकनिवासिभिः कृतनिकेतमदृष्टपरस्परैः ॥ प्रथयितुं विभुतामभिनिर्मितं प्रतिनिधिं ज-
गतामिव शंभुना ॥ ४ ॥ भुजगराजसितेन नभःश्रिता कनकराजिविराजितसानुना ॥

कवासिभिरित्यर्थः ॥ कृतनिकेतनं कृतास्पदं अत एव शंभुना विभुतां स्वसामर्थ्यं प्रथयितुं अभिनिर्मितं जगतां प्रतिनिधिं प्रतिकृतिमिव स्थि-
तमित्युत्प्रेक्षा ॥ प्रतिकृतिः स्त्रियां पुंसि प्रतिनिधिरुपमोपमानं स्यादित्यमरः ॥ त्रैलोक्यस्याप्यायमपरिच्छेद्य इति भावः ॥ ४ ॥ भुजगेति ॥ पुनश्च
(दि २५) भुजगराजसितेन शेषधवलेन ॥ नभःश्रिता गगनस्पृशा ॥ कनकस्य राजिभिः विराजिताः सानवो यस्य तेन तथोक्तेन ॥ अत एव तडिद्वतो (रेखाभिः २)
(६) शारदाम्बुसंततिं लघयता लघुकुर्वता तत्तुल्येनेत्यर्थः ॥ अत एवोपमालंकारः ॥ निचयेन शिखरस्य समूहेन समुदितं समुन्नतं ॥ निचयेन

कि॰ टी॰
वृं॰ षं॰
२

ति यद्यपि निचयशब्दः ॥ शिखरस्यावाचकस्तथापि पर्वतवर्णनप्रकारोक्त्या तत्सान्निध्यात् निचयशृंगवाचीमविनु मर्हतीति ॥ यथा कूटो स्त्री शिखरं शृंगमिति कूटशब्दः समूहापरपर्यायः ॥ अत एव तत्र श्रयणीयः ॥ अत एव वाच्यवचनं न दोषः ॥ ४ ॥ मणीति ॥ पुनः मणिमयूखचयाः ॥ अंशुकानीव पटानीव तैर्भासुराः ॥ सुरवधूभिः परिभुक्ता लतागृहा उव यासु ता लतयाक्ताः ॥ उच्चशिलांतराणि गोपुराणीव शिलांतराणि शिलामध्यानि पुरद्वाराणि यासु ताः लतयाक्ताः ॥ उदितानि उर्जितानि पुष्पाणां घनानि यासु ताः ॥ अत एव पुरइवेस्थिताः भुवो दधतं ॥ ५ ॥ अविरतेति ॥ पुनश्च अविरतम विच्छिन्नं उक्ति

समुदितं निचयेन तडित्वतीं लघयता शरदंबुसंहतिं ॥ ४ ॥ मणिमयूखचयांशुकभासुराः सुरवधूपरिभुक्तलतागृहाः ॥ दधत मुच्चशिलांतरगोपुराः पुर इवोदितपुष्पवना भुवः ॥ ५ ॥ अविरतोज्झितवारिविपांडुभिर्विरहितैरचिरद्युतितेजसा ॥ उदितपक्षमिवारतनिःस्वनैः पृथुनितंबविलंबिभिरंबुदैः ॥ ६ ॥

तं वा १ यैले अविरतोज्झि नवारयोत्सृष्टं तं त्यक्तमर्थः ॥ अत एव विपांडवः ॥ तैरविनोज्झितवारिविपांडुभिः ॥ अत एव हिमवत्यद्भुतत्वं संभवतीति भावः ॥ अचिरद्युतितेजसा विरहितैर्विद्युत्तेजोरहितैः ॥ आरतनिःस्वनैः ॥ प्रशांतगर्जितैः अन्यथापक्षत्वहानिः स्यादिति भावः ॥ पृथुनितंबविलंबिभिर्महाकटकसंश्रितैः ॥ कटकोऽस्त्री नितंबोऽद्रेरित्यमरः ॥ अंबुदैः उदितपक्षं संजातपक्षमिव स्थितं ॥ प्राक्छिन्नपक्षस्यापि हिमाद्रेः ॥ धवलांबुदसं

४९

नु=

दधतमिति॥ पुनश्च आकरः खनिरेषामस्तीति यो निर्वेनेत्याकरिभिराकरजैः॥ खनिस्त्रियामाकारः स्यादित्यमरः॥ करीभिर्गजैः॥ कर्चूभिः॥ क्षतैः रुग्णैः समवतारेषु तीर्थेषु॥ समैः विषमैः॥ असमैः असदृशैः अनुपमैरित्यर्थः॥ तटैरूपधहिता स्तथा महितांभसः॥ श्लाघ्योदका॥ अत एव विविधेभ्यः कामेभ्योऽवगाहाद्युपभोगेभ्यो हिताः अनुकूलाः॥ तादर्थ्ये चतुर्थी॥ तदर्थेनेत्यादिना समासः॥ स्फुटानि विकासीनि सरोजवनानि यासुताः॥ अनुकूलाः॥ तादर्थ्ये चतुर्थी तदर्थेनेत्यादिना समासः॥ जवना वेगवती॥ युचंक्रमेत्यादिनायुच्॥ नदीर्दधतं॥ यमक[illegible] हृतानुसारभेदत्वात्स्वयमेवालंकारः॥ अर्थालंकार

दधतमाकरिभिः करिभिः क्षतैः समवतारसमैरसमैस्तटैः॥ विविधकामहिता महितांभसः स्फुटसरोजवना जवना नदीः॥ ७॥ नवविनिद्रजपाकुसुमत्विषां द्युतिमतां निचयेन महाश्मनां॥ निहितसांध्यमयूषमिव [illegible] क्वचिन्निचितकांचनभित्तिषु सानुषु॥ ८॥

स्त्वभ्युच्चय स्तस्यानितु छन्त्वाद्रसदोषानाद्रियते॥ नवुत्कं॥ प्रायसो यमकश्लेषचि त्रेरसवृद्धिर्न स्यते॥ ७॥ नवेति॥ पुनश्च नवानि विनिद्राणि चयानि जपाकुसुमानि तेषां त्विष इव त्विषो येषां तेषां॥ ओड्रपुष्पं जपावज्रपुष्पं पुष्पं तिलस्य यत्तदित्यमरः॥ द्युतिमतां महाश्मनां मरतीनां पद्मरागाणामित्यर्थः॥ विशेषणसामर्थ्यात्॥ निकरेण समूहेन हेतुना क्वचिन्निचिताः संघटिताः कांचनभित्तयो येषु तेषु सानुषु विहिताः हिन्नाः॥ संध्यायां भवांभमयूषा यस्मिन्नामिवस्थितं॥ कांचनभित्तिषु पद्मरागप्रसादादुदितसंध्या

सिता २४

त्रिम

अ रो:

ओड्रपुष्पं जपापुष्पं रूपिकातास्त्रपुष्पिका चेति वाग्भटः॥ २=

कि॰ काटी॰
ग्रं पं ३
नीपकुमस्तकैःस्त

50 न

हृष्यति ॥ पुनश्च ॥ हृष्युभिः कदंबकदंबकैर्नीप[illegible]बकैर्विराजतं कदंबमाहुः ॥ सिद्धार्थे नीपे च निकुरंबकं स्तुमयत्रापि विश्वः ॥ ग्रथितमालैः ॥
बद्धपंक्तिभिः ॥ तमालवनैस्तापिच्छवनैराकुलमाकीर्णं ॥ कालस्कंधस्तमालस्यात्तापिच्छोप्यथ सिंधुकेत्यमरः ॥ लघुतुषारमल्पशीकरं यत्तुषारज
लं हिमोदकं तत्स्रावति वर्षतीति तत्तथा तं ॥ तुषारौ हिमशीकराविति शाश्वतः ॥ अन्ये त्वाविद्वश्यत इति क्लिष्टं ॥ सदानाः समदाः ॥ सदाननाः ॥ शोभ
नाननाश्च ये दंतिनस्तैर्धृतमाप्तं तत्तथा तं ॥ रहितेति ॥ पुनश्च ॥ रहितरत्नचयान् रहितः परित्यक्तः रत्नचयो यैस्तान् रत्नराशिरहितान् शिलो

हृष्युकदंबकदंबकराजितं ग्रथितमालतमाल (वना) लताकुलं ॥ लघुतुषारतुषारजलश्च्युतं धृतसदानसदाननदंतिनं ॥ ९ ॥ रहितरत्नचयान्नशिलोच्चयानपलताभवनानदरीभुवः ॥ विपुलिनाम्बुरुहान्नसरिद्वधूरकुसुमान्दधतं नमहीरुहः ॥ १० ॥

च्चयान् शिखराणि च न दधतं ॥ अपलताभुवनां लतागृहरहितां दरीभुवो गुहाप्रदेशान्न दधतं ॥
दरी तु कंदरो वा स्त्री देवखातबिले गुहा इत्यमरः ॥ वि[illegible]नानि पुलिनान्यंबुरुहाणि च यासां ताः ॥ सरितो वध्व इव ताः सरिद्वधूर्न दधतं
यत्र सरितो वध्वौपम्यात्पुलिनानामंबुरुहाणां वदनजघनवदौपम्यं गम्यते ॥ अकुसुमान्महीरुहो वृक्षान्न दधतं ॥ किंतु रत्ना
दिसंपन्नानेव शिलोच्चयादीन् दधतमित्यर्थः ॥ महाविभाषया नात्र नञ्समासः ॥ १० ॥ रामजी सहायं करोतु ॥ ॐ ॥

५०

शनैर्मर्दमंद

ग्रथितेति॥ पुनश्च॥ अनीरसनैरनिर्मेखलैः सरसनैरित्यर्थः॥ घनैः निबिडैः॥ अमरलोकवधूजघनैर्ग्रथितसिंधुं तो भिन्नतदीकं॥ अयमपरस्वर्गं इति भा-
वः॥ यैरम्यलताश्च बकुलाः केसराश्च तैर्दयितैः। प्रियाः येषां तैस्तथोक्तैः॥ विशारदो मधुगंधो बकुलः सर्वकेशरास्तु निवेद्यके॥ फलभृतां कुलैरभिन्न-
ततं व्याप्तं तथापि विततं विस्तृतं॥ २१॥ ससुरेति॥ अनेकावि विचित्रा मणिप्रभा येषां तैस्तथोक्तैः॥ हिमेन पांडुभिः शिखरैः कृत्वा ससुरचापं सेंद्र-
चापं॥ अपपयो निर्जलोऽत एव तमपपयो विशदं॥ अविचलं॥ दैवान्निश्चलं॥ अत एव शिखरसंकाशमित्यर्थः॥ किंतु ध्वनितेन गर्जितेन

विशदश्च — अस्या ४

ग्रथितसिंधुमनीरसनैः शनै रमरलोकवधूजघनैर्घनैः॥ फणभृतामभितो विततं ततं दयितरम्यलताबकुलैः कु-
लैः॥ २१॥ ससुरचापमनेकमणिप्रभैरपपयोविशदं हिमपांडुभिः॥ अविचलं शिखरैरुपबिभ्रतं ध्वनितसूचितमंबुमुचां
चयं॥ २२॥ विकचवारिरुहं दधतं सरः सकलहंसगणं शुचिमानसं॥ शिवमगात्मजया च कृतेर्ष्यया सकलहंसगणं

सूचितं ज्ञापितं॥ अंबुमुचां चयं॥ आविरतमुपबिभ्रतं॥ अत्र कविकल्पितसादृश्यात् शिखरैर्मेघसंदेहो मेघनिश्चयात्॥ संदेहालंकारः॥ २२॥ विकचे-
ति॥ पुनश्च॥ विकचवारिरुहं निःक्रमविकसितारविंदमित्यर्थः॥ ह्यत्र सामर्थ्यात्कलहंसगणैः सहवर्त्तते इति सकलहंसगणं॥ कादंबः कल-
हंसस्यादित्यमरः॥ यद्वा॥ सकलाः सर्वे हंसगणाः यस्मिन् तं तथोक्तं॥ शुचि नित्यनिर्मलं एवंविधं मानसं मानसाख्यं सरः दधतं॥ किंचित्

कि॰ का॰ टी॰
ग्रं सं॰ ५
४

51

कृतेष्यया कुतश्चिन्निमित्तात्कुपितयेत्यर्थः॥ अगात्मजया पार्वत्या सकलहं सविवादं सगरां ससम्भ्रमं यं॥ गराणां प्रथमसंख्यो घाशनि वैजयंती॥ अत्र विमानसं
अविद्यानिर्मुक्तं चित्तं शिवं चरधत्तं॥ एतेन सकलशैलवैलक्षण्यमेतस्योक्तम्॥ ग्रहेति॥ दिवमभितो दिवोभितः अभितः परित इत्यादिना द्वितीया॥
ग्रहा अत्र सूर्यादयो विमानानि व्योमयानानि च॥ व्योमयानं विमानोस्त्री त्यमरः॥ तेषां गणान्॥ ज्वलयता प्रदीपयता॥ मित्तां ह्रस्वः॥ औषधिजेन चरणा वि
शेषजन्येन॥ कृशानुना वह्निना कृत्वा॥ अनुपदं प्रतिपदं वीप्सायां अव्ययीभावः॥ उमापति सेविनः प्रमथादीन्॥ गतिबुद्धीत्यादिना द्विकर्मकत्वं

ग्रहविमानगणानभितो दिवं ज्वलयतौषधिजेन कृशानुना॥ मुहुरनुस्मरयंतमनुत्तपं त्रिपुरदाहमुमापतिसेवि
नः॥१४॥ विततशीकरराशिभिरुच्छ्रितैरुपलरोधविवर्तिभिरंबुभिः॥ दधतमुन्नतसानुसमुद्धतां धृतसितव्यजना

त्रयाणां पुराणां समाहारस्त्रिपुरं॥ तद्धितार्थेत्यादिना समासांतः॥ पात्रादिभ्यः प्रतिषेधो वक्तव्यः॥ इति स्त्रीलिंगप्र मिव जाह्नवीम्॥१५॥
तिषेधः॥ तस्य दाहं त्रिपुरदाहं॥ मुहुरनुस्मरयंतं॥ नन्वधिगमार्थेत्यादिना दाहमित्यत्र षष्ठी किन्न स्यान्न स्यात् शेषार्थविधानात्॥ शेषत्वस्याविवक्षित
त्वाच्चेति॥ अत्र कविसंमतसादृश्यत्वात्॥ स्मृतीति स्मरणालंकारः॥१४॥ विततेति॥ विततशीकरराशिभिर्विस्तृतशीकरपुंजैः॥ उच्छ्रितैः॥ कुतः उप
लरोधेन विवर्तिभिः उच्छलितैरंबुभिर्धृतसितव्यजनामिव॥ गृहीतामलचामरामिव स्थितामित्युत्प्रेक्षा॥ उन्नतसानुषु समुद्धतां महंतीं जाह्नवीं

किराता॰ टी॰ ...
क्षि॰ टी॰ २५
५१

पत्रेण

अनुचरेणेति॥ अथानंतरं मंगलानंतरारंभप्रश्नकार्त्स्न्येष्वथो अथेत्यमरः॥ धनाधिपतेरनुचरेण नगविलोकनविस्मितमानसः॥ सोऽर्जुनः॥ आदरात्प्रि
यं वचनं जगदे गदितः॥ गदस्तु गत्यर्थस्य दुहादिस्वधानेकर्मणि लिट्॥ अस्पष्टभाषणादोषं परिहरति॥ मुखरेति॥ मुखरता वाचालत्वं अस्पष्टभाषितापीति
यावत्॥ अवसरे आतुराकाङ्क्षावसरे विराजते हि॥ आकांक्षित मस्पष्टमपि श्रूयादिति भावः॥१४॥ अलमिति॥ हिमेन गौरैः शुभ्रैः शिरोभिः शिखरैः॥ घन
वर्त्म सह स्थैर्यं कुर्वन् विपाटयन्निवेत्युत्प्रेक्षा॥ एषोऽचलाधिपो हिमवान् विलोकितो दृष्टमात्र एव प्रजानामेनसां संततिं पापसंघातं महसा विहं

समये २८

५ न

चे

अनुचरेण धनाधिपतेरथो नगविलोकनविस्मितमानसः॥ स जगदे वचनं प्रियमादरान्मुखरतावसरे हि विराजते॥१४॥
अलमेष विलोकितः प्रजानां सहसा संहतिमंहसां विहंतुं॥ घनवर्त्म सहस्रधेव कुर्वन्हिमगौरैरचलाधिपः शिरोभिः॥१५॥
रहदुरधिगमैः किंचिदेवागमैः सततमसुतरं वर्णयन्त्यंतरं॥ अमुमतिविपिनं वेद दिग्व्यापिनं पुरुषमिव परं पद्मयोनिः परं॥१६॥

तत्वं २१

तुं अलं समर्थः॥ पर्याप्तवचनेष्वलमर्थेष्विति तुमुन्॥ औपछंदसिकं वृत्तं॥ तथैव शेषं चौपछंदसिकं सुधीभिरुक्तमिति लक्षणाच्च॥१५॥
रहेति॥ रहसि निर्वर्तते सुतरां न भवतीति असुतरं दुस्तरमित्यर्थः॥ किंतु अतिविपिनं अतिगहनं दिग्व्यापिनं॥ अमुं गिरिं पुरुषं परमात्मानं इव केवलं परममव्य
यमिवांतिके वलरतिविश्वः॥ पद्मयोनिर्ब्रह्मणो ववेदनान्य इत्यर्थः॥ विरोलटो वाति॥ लोदेशः॥ अत्रोपमोपमेययोः संसृष्टिः॥ हमाहृत्तं॥ तुरग स्य
रागमेकैस्तैरन्यत्र पुराणादिभिः॥ पुराणाप्यागमाद्दृष्ट दर्शनि हद्दृ॥ किंचिदेव सततमसुतरं वर्णयन्ति॥ अमुं अतिविपिनं ... यथैवानुमशास्त्रादिति भावः॥१६॥

अंतरं मध्यभागं पुरु
षेत्वंतरं दुरधिगमैः
दुरगृहैरन्यत्र दुर्गहै
रागमैस्तैरन्यत्र पुराणादिभिः

तद्गुह्यकाः १६०

कि॰ का॰ टी॰
श्रं॰ पं॰
५

रुचिरेति॥ असौ गिरिः॥ रुचिराणि पल्लवानि पुष्पाणि च येषां तानि तथाभूतानि पालना॥ [illegible] गृहा येषु तैस्तथोक्तैः॥ उत्पलसज्जलजैः॥ वासितकमलैः॥ जलराशिभिः॥ करेणोरुपकांतं कांतसमीपे धृतमतीः॥ धैर्यमती॥ समीपस्थान् प्रियान् नेत्रगणयन्तीर्मानिनीरित्यर्थः॥ स्त्रियः संततमुत्सुकतां नयति नासां मानग्रंथिं शिथिलयंतीत्यर्थः॥ अथवा उपकांतं धृता सुष्ठीमती रसुरतत्रप्ता अपि पुनरुत्सुकतां नयतीत्यर्थः॥ उभयत्राप्युद्दीपकत्वादतिशयोक्तिः॥ २८॥ सुलभैरिति॥ नयवता नीतिवता॥ अयवता भाग्यवता च सुलभैर्नान्यैरित्यर्थः॥ अयः शुभावहो विधिरित्यमरः॥ निधीनां पद्मादी

रुचिरपल्लवपुष्पलताकुलैरुत्पलसज्जलजैर्जलराशिभिः॥ नयति संततमुत्सुकतामयं धृतिमतीरुपकांतमपि स्त्रियः॥ २८॥ सुलभैः सदा नयवतायवता निधिगुह्यकाधिपरमैः परमैः॥ अमुना धनैः क्षितिभृतातिभृता समतीत्य भाति जगती जगती॥ २९॥

नां॥ महापद्मश्च पद्मश्च शंखो मकरकच्छपौ॥ [illegible] मुकुंदकुंदनीलाश्च खर्वश्च निधयो नवेति॥ गुह्यकानां चाधिपं कुबेरं रमयंतीति तथोक्तैः॥ कर्मण्यण्॥ परमैरुत्कृष्टैर्धनैः॥ करणे॥ अमुना क्षितिभृता हिमाद्रिणातिभृता पूर्णा संती जगती मही जगतीं स्वर्गपाताललोकावतीत्य भाति॥ अमानुषैरपि दुर्लभाः संपदोऽत्र भवंतीति भावः॥ अत्र धनाधिभृतेति पदार्थस्य विशेषणगत्या जगदतिक्रमणहेतुत्वोक्त्या काव्यलिंगस्य यमकेन संसृष्टिः॥ प्रमिताक्षरावृत्तम्॥ २९॥ प्रमिताक्षरा [illegible] जौ जयावितिलक्षणात्॥ रामजी सहायं करोतु॥ श्रीः॥

हेतुना [illegible]

अखिलमिति॥ वीतजन्मजरसः॥ अमुष्य गौरीगुरोर्हिमवतः इदम् अखिलं अयाणां भुवनानां समाहारस्त्रिभुवनं अपि॥ तद्धितार्थेत्यादिना समासः॥ पा
त्रादित्वात्स्त्रीत्वप्रतिषेधः॥ तुल्यसाम्येनेति इति मन्यते॥ यद्यतो जनैरविदितविभवो ज्ञातमहिमा भवानीपतिः॥ सदा एनं गिरिं अधिवसति आस्मिन्वस

अतोयंधर्मतेत्रमिति भाव: २४

तीत्यर्थः॥ उपान्वध्याङ्वस इति कर्म॥ त्वं॥ गाथ्या रूपं गौरीवृत्तमिदं॥ गौरी नौ रा विति लक्षणात्॥ २२॥ वीतेति॥ वीते निवृत्ते जन्मजरसी यस्य तद्वीतज
न्मजरसं तस्य वीतजन्मजरसः॥ जराया जरसन्यतरस्यामिति जरादेशः॥ अत्र तदंतविधेरिष्टत्वात्परत्वेन स्यादेशबाधकत्वाच्च॥ न याहि॥ टाङसि

वीतजन्मजरसं परं शुचिब्रह्मणः पदमुपैतुमिच्छतां॥ आगमादिव विवत्तमोपहादितः संभवंति मतयो भवच्छिदः॥ २२॥
अखिलमिदममुष्य गौरीगुरोस्त्रिभुवनमपिनेतिमन्यतां॥ अधिवसति सदा यदेनं जनैरविदितविभवो भवानीपतिः॥ २३॥

ङसामिनात्स्या इति स्यादेशबाधनात्परत्वाज्जरसादेशं वभाषे भाष्यकृत्स्वयं॥ तत्रकारमते यत्तु त्वापकात्परत्वबाधनं भवेत्तदपि टाङसोर्न्त
पुनर्ङसि ससंभावितमत्र द्व्येपि तत्तुल्यं ङसि यत्पूर्वबाधनम्॥ परत्वाज्जरसादेशस्तस्मात् स्यादेशबाधनाज्ज्ञापकं यच्च टाङसोर्या वादेशो वि

रूप

नाविति इकारदीर्घयोस्तत्र वैयर्थ्यं न तु तौ विना एत्वे सवर्णदीर्घे च सूत्रे ति द्विर्भविष्यतः॥ अर्थस्तत्राहार त्यागाद्गतो न ज्ञापकं परी॥ स्वातंत्र्या

न

ज्जरसादेशं जयात्पूर्वस्य बाधनात्॥ समर्थनं च पंचस्तु भाष्यकैटयोस्फुटं॥ एवं च यदत्र जरस इति केषांचित्पाठांतरकल्पनं तदज्ञानविजृं

कि·का·टी·
ग्रं·पे
६

53

भिन्नमेव॥ ब्रह्मणः परमात्मनः॥ संबोधिपरमुक्तछेभुविनिः कलंकेपद्युत इति पदस्यानंतादान्त्यलक्षणं मुक्तिरित्यर्थः॥ उपेतुं प्राप्तुमिष्टां मु
मूलक्षणां आगमात्॥ शास्त्रादिवत मोपहंतीति तमोपहा दुर्विद्यानिवर्तकात्॥ अपेतक्लेशात मोरितिडप्रत्ययः॥ दूतो स्माद्धिरेभवछिदं तीति
भवच्छिदः संसारनिवर्तका॥ सत्सूद्विषेत्यादिना क्विप्॥ मतयस्तत्त्वज्ञानानि भवंति॥ तत्र विशेषस्यापेक्षानोपपीकत्वाहितिभावः॥ नकेव
लमयं भोगभूमिः॥ किंतु मुक्तिक्षेत्रमपीति तात्पर्यम्॥ २२॥ दिव्येति॥ अस्मिन्गिरौ चरणलाक्षारागैः सहवर्तनेतास
थोक्ताः॥ धेनुकेपुरुषायितादिबंधेषु स्त्रीपादतलस्पर्शोद्रागांकिता इत्यर्थः॥ निपतिताः आनतकरणे स्त्रीणामधोमुखत्वादुष्टाः॥ पु

दिव्यस्त्रीणां सचरणलाक्षारागा रागायाते निपतितपुष्पापीडाः॥ पीडाभाजः कुसुमचिताः साशंसं शंसन्त्यस्मिन्सु
रतविशेषं शय्याः॥ २३॥

ष्पापीडाः कुसुमशेखरा यासु तास्तथोक्ताः॥ शिरस्वापीडशेखरावित्यर्थः॥ पीडाभाजो विमर्दभाजो भग्नाम
त्यर्थः॥ भ्रमरखेवालितत्वादेसर्वतः॥ कदाचिभ्रमणासंभवादितिभावः॥ कुसुमैश्चिताः कुसुमचिताः कुसुमव्याप्ताः॥ रक्ष्मार्जनादिकर
णेषु स्तनभुजाद्यवयवानां शय्यातलस्थायित्वान्मार्दवाय कुसुमचिता इत्यर्थः॥ दिव्यस्त्रीणां संबंधिन्यः शेरते॥ अस्यामिति शय्यास्तल्पा
नि॥ संज्ञायां समजनिषदेत्यादिना क्यप्॥ रागापाते रागोद्रेके सति यस्मात् शंसः सत्त्वम्॥ सुरतविशेषं जातावेकवचनं॥ सुरतविशेषं संधान

परि
कुसुमास्तृता

१९
निरर्थकं: शंसंतीति सत्वं यंतीत्यर्थः
अत्रतत्कालागादिपदार्थानां सुरतविशेष

५२

ममधौमः स्याज्जलधरमालेति लक्ष्मराग ९—

लंकारः १४ प्रतिविशेषागन्त्योर्हेतुत्वोक्त्याकाव्यलिंगमेवं यमकेन संसृज्यते ॥ जलधरमालाख्यं वृत्तं ॥ धेनुकादिवंधलक्षणं तुरगैरहसैः ॥ न्मलहसत्युगलानि जेपदेयो विदेतिक

२ टिमूहवल्लभा ॥ अपत्तायादिशनैरधोमुखी धेनुकंबुयवदुन्नते श्रिये ॥ ३ ॥ स्वच्छयात्मतिवल्लभे गियायोषिदाचरति वल्लभापि ते ॥ ध्यानं तं रतमिदं यदि श्रिया

स्यादधोमुखवतुष्यसाकृतिः ॥ ४ ॥ तत्कटिसमाधिकृत्यवल्लभः स्याद्दृषादिपमुखंवंयसंस्थितः ॥ चक्रवद्धमतिकुंचितत्रिकाभ्रामरं निजंघने समुज्जगे ॥ ३ ॥ स निगदितं समुद्भतं २—

२ र्वतः कटिपरिभ्रमोयादि शंवपूर्वमिदमुक्तमालितं ॥ भूगतस्तनभुजास्यमस्तकाभ्युन्नतास्वयमथोमुखीस्त्रियं ॥ ६ ॥ भ्रामतिस्वकरपृष्टमेहनेवल्लभे कमिर

तं तदुच्यते ॥ प्रसारितेपार्श्णिपादेशपास्पर्शमुखारतिः ॥ उन्नतायाः स्त्रियः कट्यां मार्जारकरणं विदुरितिग्रन्थान्तरे ॥ ५ ॥ २३ ॥ गुणेति ॥ जगतां महि

गुणसम्पदा समधिगम्य परं महिमानमत्र महिते जगतां ॥ नयशालिनि श्रिय इवाधिपतौ विरमंति नो ज्वलितुमोषधयः ॥ २४ ॥

ते ॥ जगद्भिः [illegible] पूजिते पूज्यमाने ॥ मतिबुद्धीत्यादिना वर्त्तमाने क्तः ॥ क्तस्य च वर्त्तमाने इति षष्ठी ॥ अत्र हिमवति ओषधयः तृणज्योतींषि

नयशालिन्यधिपतौ नीतिसंपन्ने राज्ञि श्रियः संपद इव ॥ गुणसंपदा तत्र गुणसंपत्त्या ॥ अन्यत्र संध्यादिगुणसंपदा परं महिमानमुभ

यत्रापि प्रकाशसामर्थ्यं ॥ समधिगम्य ज्वलितुं प्रकाशयितुं न विरमंति ॥ अविरतं निरंतरं ज्वलयंतीत्यर्थः ॥ अत्र रात्रावेवेति भावः ॥ २४ ॥

कुररीति ॥ इहाद्रौ कुररीगणः ॥ उत्क्रोशसंघः ॥ उत्क्रोशकुररौ समावित्यमरः ॥ कृतरवः कृतारवः ॥ नरवः ॥ कुसुमैरानताः ॥ कमलं ॥ सक

कि॰ का॰ टी॰
पं॰ पं॰
७

सिंधवः

मलं ॥ सपद्मं ॥ सकमलं जलं ॥ कमलं जलपद्मयोरिति विश्वः ॥ यद्वा कं जलं ॥ अलमत्यर्थं ॥ सपद्मं वर्त्तते ॥ कंजलेशिरसि चेत्यमरः ॥ किंच वरणाः द्रुमाः आवरणं यासां ताः वरणावरणाः ॥ वरुणो वरणः सेतुस्तिक्तशाकः कुमारकः इत्यमरः ॥ सनलदाः ॥ सोशीराः ॥ मूलेस्यो शीरमस्त्रियामित्यमरः ॥ अभयं नलदं सेव्यमित्यमरः ॥ अनलं संतापं द्यंतिखंडयंति शमयंतीत्यनलदाः ॥ सनलदाश्चता अनलदाश्च सिंधवः ॥ करिणां मुदे भवंतीति शेषः ॥ न कुत्राप्युक्तवैपरीत्यमिति भावः ॥ २५ सादृश्यमिति ॥ एकस्मिन्नैव अपनिद्रचूतगंधैः सादृश्यं गतं ॥ फुल्लाम्रपुष्पसदृशं मजलसेकजं ॥ आमोदं परि

६४

कुररीगणः कृतरवस्तरवः कुसुमानताः सकमलं कमलं ॥ इह सिंधवश्च वरणावरणाः करिणां मुदे सनलदा नलदाः ॥
२५ ॥ सादृश्यं गतमपनिद्रचूतगंधैरामोदं मदजलसेकजं दधानः ॥ एतस्मिन्मदयति कोकिलानकाले लीनालिः सुरकरिणां कपोलकाषः ॥ २६ ॥

मलं दधानो बिभ्राणः ॥ अत एव लीनालिः ॥ संपन्नभ्रमरः ॥ सुरकरिणां काष्यते ऽनेनेति काषः ॥ कषणस्थानं ॥ द्रुमस्कंधादि ॥ अकाले वसंतातिरिक्ते काले ॥ कोकिलान्मदयति ॥ मिताहृल्यः ॥ अत्र वसंतरूपकारणाभावे मदाख्यकार्योत्पत्तिकथनाद्विभावनालंकारः ॥ तदुक्तं ॥ कारणेन विना कार्योत्पत्तिः स्याद्विभावनेति ॥ सा च चूतगंधैः सादृश्यमित्युपमया वा आमोदं दधान इति पदार्थहेतुककाव्यलिंगेन चांगांगिभावेन संकीर्य्यते ॥ किंच कोकिलानां मदगंधे चूतगंधभ्रांत्या भ्रांतिमदलंकारो व्यज्यते ॥ प्रहर्षिणी वृत्तम् ॥ २६ ॥

कपोलकाषः ॥

५४

सना केति ॥ पुनश्च सनाकवनितं सामरसं ॥ नितैः ॥ कटकैः ॥ सुचिरं ॥ मुनिनदैः ॥ अभ्रघोषैः ॥ नदैः प्रवाहैः ॥ नन्नमसुं ॥ अनुभिन्निाणविन्यर्थः ॥ उपान्व ध्याङ्वस इति कर्मत्वं ॥ अवत ॥ अधोलोकरत्नकस्य ॥ फणावतो नागराजस्य ॥ मत्ता दृष्टा ॥ गतिबुद्धीत्यादिनावर्त्तमाने क्तः ॥ नंधमातस्ती ॥ रसेन परा उत्कृष्टा ॥ परास्तवसुधा नत्र भूर्लोका ॥ सुधा अमृतं चिरं अधिवसति ॥ अतोऽन्यत्र भूमंडले कुत्रापि सुधा नास्तीत्यर्थः ॥ मेरुश्च भुवायं गिरिरिति भावः ॥ अत्र प्रस्तुतविशेषणसामर्थ्यादप्रस्तुतमेरुप्रतीतेः ॥ समासोक्तिरलंकारः ॥ सत्तमकेन संसृज्यते ॥ जलोद्धतगतिर्वृत्तम् ॥ २७ ॥ श्रीम

रसौरसाविति लक्षणात्
८=

सनाकवनितं नितंबरुचिरं चिरं सुनिनदैर्नदैर्वृतममुं ॥ मत्ता फणावतोऽवतो रसपरा परास्तवसुधा वसुधाधिवसति ॥

२७ ॥ श्रीमल्लता भवन मोषधयः प्रदीपाः शय्या नवानि हरिचंदनपल्लवानि ॥ अस्मिन्रतिश्रमनुदश्च सरोजवाताः स्म

र्तुं दिशंति न दिवस्सुरसुंदरीभ्यः ॥ २८ ॥

समृद्धिम १४

मल्लतेति ॥ अस्मिन्नद्रौ श्रीमल्लता एव भवन मोषधयस्तृणज्योतिषी एव प्रदीपाः ॥ नवानि हरिचंदनपल्लवानि सुरतरुकिसलयान्येव शय्याः ॥ हरिचंदनमाम्नातं गोशीर्षे देवपादपे इति विश्वः ॥ रतिश्रमनुदः सुरतश्रमहारिणः ॥ सरोजवाताश्च ॥ सुरसुंदरीभ्यः ॥ क्रियाग्रहणाच्चतुर्थी ॥ दिवो दिवं ॥ अधिगत्येत्यादिना कर्मणि षष्ठी ॥ स्मर्तुं न दिशंति विस्मारयंतीत्यर्थः ॥ स्वर्गादप्यतिरिच्यते सा स्थितिभावः ॥ अत्र हर्षादीनां रूपकत्रयं स्फुटमेव ॥ २ ॥

कि॰ का॰ टी॰
५॰ पं॰
८

55

ईशार्थेति॥ ईशाय ईशार्थं॥ यथानपेति क्रियाविशेषणं॥ अर्थेन नित्यः समासः सर्वलिंगता च वक्तव्या॥ चिराय चिरमंभसि तपश्चरंत्या॥ अत एव
यादोविलंघनविलोलविलोचनायाः॥ जलजंतुविघट्टितचकितेक्षणायाः॥ तपसापि अधिकं हृष्टो चैनया विलोभयंत्या इति भावः॥ यादांसि ज-
लजंतव इत्यमरः॥ भवान्याः॥ भवपत्न्याः॥ प्रयोगकालापेक्षायां निर्देशः॥ इंद्रवरुणभवेत्यादिना ङीष्॥ आनुगागमश्च॥ करे कर इत्यापि कर-
त्वादग्रं चासौ करश्चेति समानाधिकरणसमासः॥ अत एव वामनः॥ हस्ताग्राग्रहस्तादयो गुणगुणिनोर्भेदाविति॥ तमग्रकरं भवः श्च्योतन्निदाघस-

ईशार्थमंभसि चिराय तपश्चरंत्या यादोविलंघनविलोलविलोचनायाः॥ आलंबताग्रकरमत्र भवो भवान्याः श्चो-
तन्निदाघसलिलांगुलिना करेण॥२८

लिलांगुलिना स्रवत्स्वेदांगुलिनेति सात्विकोदयोक्तिः॥ करेणात्र गिरावालंबत गृहीतवान्॥ अत्राद्भुतातीतवृत्तांतस्य प्रत्यक्षवदभि-
धानाद्भाविकालंकारः॥ अतीतानागते यत्र प्रत्यक्षवद्लक्षिते॥ अत्यद्भुतार्थकार्यत्वाद्भाविकं तदुदाहृतमिति लक्षणात्॥ वसंतति-
लकावृत्तम्॥ उक्ता वसंततिलका तभजा जगौ ग इति लक्षणात्॥ २९॥ येनेति॥ देवाश्च असुराश्च ते देवासुरैः॥ येषां च विरोधो शाश्वति-
क इति नैकवद्भावः॥ अत एषां कार्येन एव विरोधो न गोव्याघ्रादिवत् शाश्वतिक इत्याहुः॥ येन मंदराद्रिणा मंथदंडीकृतेनेति भावः॥ अ-

५५

श्रा का प्रो

पविद्धसलिलः ॥ अपविद्धं जलं ॥ अत एव स्फुटं नागसद्म पातालं यस्मिन् सोंबुनिधिरमृतं ममंथे मथितः ॥ मन्थाते र्द्विकर्मकत्वाद्दुहादित्वादप्रधाने क
र्मणि लिट् ॥ अहिपते र्भुजगराजस्य वासुकेरित्यर्थः ॥ मंथानं मंदरं कृत्वा नेत्रं कृत्वा तु वासुकिमित्यादि भारतवचनात् ॥ व्यावर्त्तनै र्वेष्टनैराहि
तांकः ॥ कृतचिह्नः ॥ सोयं मंदराद्रिः ॥ खं व्यालिखन्व्यापारयन्निव ॥ विभाति ॥ अत्र वोन्नत्यानुपादानेनैव लेखनेनोत्प्रेक्षणादनुपात्तगुणनिमित्ता कि
या स्वरूपोत्प्रेक्षा ॥ १४ ॥ नीतेति ॥ इहाद्रौ शिशिररश्मेरुत्संगमारूढैर्मयूखैः ॥ संक्रांतैरिति भावः ॥ उच्छ्रायं नीता विस्तारितेत्यर्थः ॥ तथा व्यानीला

नै १४

नीतो च्छ्रायं १५

लः १४ येनापविद्धसलिलः स्फुटनागसद्मा देवासुरैरमृतमंबुनिधिर्ममंथे ॥ व्यावर्त्तनैरहिपतेरयमाहितांकः खं व्यालिखन्निव विभा
ति स मंदराद्रिः ॥ १४ ॥ नीतोच्छ्रायं मुहुरशिशिररश्मेरुस्रैरानीलाभैर्विरचितपरभागा रत्नैः ॥ ज्योत्स्नाशंकामिह वितरति हं
सश्रेणी मध्येप्यह्नः स्फटिकरजतभित्तिच्छाया ॥ १५ ॥

भैरसितप्रभैः रत्नैः इंद्रनीलैर्विरचितपरभागा तत्सान्निध्याना
ल्लब्धोत्कर्षेत्यर्थः ॥ हंस इव श्वेपनी श्वेतवर्णा विशदः श्वेतपांडुरा इत्यमरः ॥ वर्णादनुदात्तान्तोपधात्तो नः इति श्वेप्त शब्दान्ङीपू ॥ त
कारस्य नकारः ॥ स्फटिकानां रजतानां भित्तयस्तासां छाया कांतिः ॥ अह्नामध्येपि मध्याह्नेपीत्यर्थः ॥ ज्योत्स्नाभ्रमं जनयतीति भ्रांति
मदलंकारः ॥ हंसश्येनी वृत्तम् ॥ म्भोन्यो गौ चेज्जलधिरसैर्हंसश्येनी वृत्तम् ॥ १५ ॥ श्रीरामजी सहायकरोतु ॥

ज्योत्स्नाकृते भ्रांति जनयतीति १५

कि॰ कारी॰
घं॰ पं॰
६
56

रथत इति॥ इहाद्रौ मृदु पतता मंदमागच्छता पवनेन कंपितानि पंकजानि॥ ललितविलासिनीजनस्य भ्रूगतिवत् कुटिलेषु ईषत्तरंगितेष्वित्यर्थः॥
पयःसु वीचिशालिनृत्तरथत इव सा विलासं नृत्यंतीत्युत्प्रेक्षा॥ पुष्पिताग्रा वृत्तं॥ ७२॥ अस्मिन्निति॥ अस्मिन् हिमाद्रौ पिनाकभृता शिवेनाधीरलो-
चनायाश्चकितदृष्टेः॥ उरगस्पर्शनादिति भावः॥ ईश्वरायाः गौर्याः॥ स्य स भासेत्पादिना वरच्प्रत्ययः॥ पुंयोगविवक्षायां ङीप्॥ आवद्धवेपथुः॥
आसन्नकंप इति सात्विकोक्तिः॥ द्वितोऽथुजिति अथुच्प्रत्ययः॥ विन्यस्तं मंगलमहौषधिर्यवांकुरादिर्यस्मिन्सपाणिः॥ स्रस्तो गलितः॥ प्रतिसरः॥ उरग एव — प्रतिसरः ४

रथन इव विलासशालिनृत्तं मृदु वहता पवनेन कंपितानि॥ इह सलिलविलासिनीजनभ्रूगतिकुटिलेषु पयःसु पंक-
जानि॥ ७२॥ अस्मिन्नगृह्यत पिनाकभृता सलीलमावद्धवेपथुरधीरविलोचनायाः॥ विन्यस्तमंगलमहौषधिरी-
श्वरायाः स्रस्तोरगप्रतिसरेण करेण पाणिः॥ ७३॥ कामं द्विधनपदवीमनेकवर्णैस्तेजोभिः शुचिमणिजन्मभिर्विभि-

कौतुकसूत्रं यस्य तेन॥ आहुः प्रतिसरं हस्तसूत्रे मूले च मंडन इति विश्वः॥ करेण सलीलमगृह्यतेति देवस्य पाणिग्रहः॥ पार्वतीपरिणयनवर्ण-
नं॥ ईशार्थमित्यत्र तु अन्तु ग्रहमात्रो नित्यपौनरुक्त्यं भाविकमेवालंकारः॥ ७३॥ कामं द्विरिति॥ वनपदवीमाकाशं कामं द्विर्याः भुवानैरनेकसं- — इहाद्रौ २५
ख्यैः॥ परःसहस्रैरित्यर्थः॥ क्वचिदनेकवर्णैरिति प्रामादिकः पाठ इति वेपुर्ण्यात्॥ व्याख्यातो चेति॥ शुचिमणिभ्यः स्फटिकेभ्यः जन्म येषां तैः॥ ज-
न्माद्युत्तरपदाद्बहुव्रीहिः॥ अधिकरणमपीत्युक्तं इति विमानतेजोभिः विभिन्नो विमिश्रः॥ अत एव पर्यस्यन्॥ प्रसर्पन्॥ सन्नसन्नेः सवितुः॥

उस्राणां किरणानां निचयो निकरः ॥ सहस्रमिति संख्या सहस्रसंख्या स्वनिपताभिति शेषः ॥ अभिचरति अतिक्रामतीवेत्युत्प्रेक्षा ॥ ३८ ॥ अधन्नेति ॥ यस्मिन्कै
लासे धनाधिपः ॥ [illegible] कुबेरः ॥ पुरां विजेतुः शिवस्य धनये संतोषाय ॥ उच्चगोपुरं ॥ उन्नतपुरद्वारं ॥ पुरद्वारं तु गोपुरमित्यमरः ॥
पुरमलकाख्यां पुरीं व्यधत्त निर्मितवान् ॥ तस्य तत्त्व विन्यादिति भावः ॥ स एव कैलासः उपांतसर्पिणः ॥ प्रांतचारिणो विवस्वतः ॥ अकाले प्रसिद्धेतर
काले अस्तमयं करोतीवेत्युत्प्रेक्षा ॥ वस्तुतस्तु तत्कारणाभावाद्व्यंजकाप्रयोगाद्गम्योत्प्रेक्षा सा चोपांतवर्त्तितया असंबंधे संबंध लक्षणाति शयोक्त्युत्

उस्राणामभिचरतीव सप्तसप्तेः पर्यस्यन्ति हि तच्चयः सहस्रसंख्याम् ॥ ३८ ॥ अधत्त यस्मिन्पुरमुच्चगोपुरं पुरां विजे
तुर्धनये धनाधिपः ॥ स एव कैलासः उपान्तसर्पिणः करोत्यकालास्तमयं विवस्वतः ॥ ३९ ॥ नानारत्नज्योतिषां स
न्निपातैः छन्नेष्वन्तः सानुवप्रान्तरेषु ॥ बद्धां बद्धां भित्तिशंकाममुष्मिन् नावानावा मातरिश्वा निहन्ति ॥ ४० ॥

त्यापितेति विवेकः ॥ अस्तमिति मकारांतमव्ययं तस्य पचाद्यजंतेनास्तमयशब्देन षष्ठीसमासः ॥ वंशस्थवृत्तम् ॥ ३९ ॥ नानारत्नेति ॥ अमुष्मिन्
कैलासे ॥ अंतः सानु सानुष्विति सप्तम्यर्थे ॥ विभक्त्यर्थेऽव्ययीभावः ॥ नानारत्नज्योतिषां सन्निपातैः ॥ व्यतिकरैः ॥ छन्नेषु छादितेषु ॥ बाहांत शांते त्यादिना निपातः ॥ ब
प्रांतरेषु कटकांतरेषु बद्धां बद्धां अभीक्ष्णं बद्धां ॥ द्वे स्यादिना द्वित्वमित्यर्थः ॥ नित्यं वीप्सयोरिति संदेह भावा नावा नावा नभीक्ष्णमागतेन ॥ आङ्पूर्वाद्गमेः श

नित्यवीप्सयोः ... नित्यमभीक्ष्ण इति काशिकायां एकपदं चैतत्
भित्तिशंकामिति रिति १४

कि.का.टी.
सं.पं.
९

ना किंतु

रम्येति॥ अस्मिन्नद्रौ शाद्वलेभ्यः शष्पाणि संत्येष्विति शाड्वलानि तेभ्यः॥ शाड्वलं शादहरित इत्यमरः॥ नडशादाड्ड्वलच्॥ रम्या नवद्युतिर्नापैतीति नित्येत्यर्थः॥ नलिनीव
नान्यनुदिनं सर्वदा श्यामीभवंति न कदाचित्पांडुरीभवंतीत्यर्थः॥ विचित्रकुसुमस्तबकैराचितानां आम्रानां शाखाभृतां तरूणां पल्लवानि न परिण
मंति न जीर्णानि भवंतीत्यर्थः॥ सर्वदा नूतनमेव सर्वं वर्तत इत्यर्थः॥ अत्र प्रस्तुतस्य वनस्य गुणतर्कैः स्थैर्यरूपकार्यस्य वर्णनात्॥ प्रस्तुतमिव
कारणं कश्चिदसाधारणः केनस्य महिमा वगम्यत इति पर्यायोक्तिरलंकारः॥ तदुक्तं॥ कारणं गम्यते यत्र प्रस्तुतात्कार्यवर्णनात्॥ प्रस्तुत

रम्यानवद्युतिरपैति न शाड्वलेभ्यः श्यामीभवंत्यनुदिनं नलिनीवनानि॥ अस्मिन्विचित्रकुसुमस्तबकाचितानां शा
खाभृतां परिणमंति न पल्लवानि॥ २७॥ परिसरविषयेषु लीढमुक्ताः प्रथमतृणोद्गमशंकया मृगीभिः॥ इह नव
शुककोमला मणीनां रविकरसंवलिताः फलंति भासः॥ २८॥

तेन संवर्धत इति पर्यायोक्तमुच्यत इति॥ २७॥ परिसरेति॥ इ
हाद्रौ परिसरविषयेषु पर्यन्तदेशेषु॥ विषया देशा इति निपातः॥ मृगीभिः प्रथमतृणोद्गमशंकया बालतृणांकुरभ्रान्त्येति भ्रान्तिमदलंकारः॥
लीढाः पूर्वमास्वादिताः पश्चान्मुक्ताः॥ लीढमुक्ता दग्धप्ररूढ इत्यादिवत् पूर्वकाले इत्यादिना धिकरणसमासः॥ नवशुककोमलाः॥
शुकसवर्णा इत्यर्थः॥ मणीनां मरकतमणीनां भासः रविकरैः संवलिताः मिश्रिताः संत्यः फलंति॥ संमूर्छंति वर्धंत इति यावत्॥ २८॥

हरित ३=

श८३

उत्फुल्लेति॥ वात्याभिः वातसमूहैः॥ वाता दिभ्यो यदिति यन्त्रत्ययः॥ अमुष्मात् उत्फुल्लस्थलनलिनीवनात्॥ जलपतितस्य परागस्योत्थानासंभ
वात्स्थलग्रहणं॥ उत्फुल्ल ... संफुल्लयोरुभयोरप्यसंख्यानात्प्रसिद्धानवत्वं उद्भूतस्तत्पाणिर्वियतीसमंताद्विवर्त्तितः॥ परिमंडलितः॥ अंतराले कुंडलाय
मानएवेतिभावः॥ सरसिजसंभवः॥ पद्मोद्भवः परागः॥ रूढाभिप्रायेणात्र सरसिजशब्दप्रयोगाद्दुष्टत्वम्॥ कनकमयातपत्रलक्ष्मीमातनोत्यनुकरो
ति॥ अत्र परागस्यातपत्रलक्ष्मीसंबंधेन निदर्शनालंकारः॥ तदुक्तं॥ असंभवद्वस्तुसंबंधो योगादुपमानोपमेययोः प्रतिबिंबक्रियागम्या यत्र सा निदर्शना

उत्फुल्लस्थलनलिनीवनादमुष्मादुद्धूतः सरसिजसंभवः परागः॥ वात्याभिर्वियति विवर्त्तितः समंतादाधत्ते कनक
मयातपत्रलक्ष्मीम्॥ ३९॥ इह सनियमयोः सुरापगायामुषसि सयावकसव्यपादरेखा॥ कथयति शिवयोः शरीरयो
गं विषमपदा पदवी विवर्त्तनेषु॥ ४०॥ निदर्शनेति॥ ३९॥ इहेति॥ इहाद्रावुषसि प्रभाते सुरापगायां लक्षणया तत्कूले सयावकसं

स

व्यपादरेखा वामचरणमुद्रा यस्यां सा॥ यावोऽलक्तोद्रुमामयः इति अमरः॥ तथा विषमाणि महदल्पानि पदानि यस्यां सा विवर्त्तनेषु प्रदक्षिण
क्रियासु॥ पदवी मार्गः शिवयोः शरीरयोगमर्धनारीश्वरत्वं कथयति॥ सनियमयोः सध्यानयोर्नियमयुक्तयोः॥ शिवा च शिवश्च तयोः शिवयोः उमाशंकरयोः॥ पुमान्स्त्रि
येत्येकशेषः॥ शरीरयोगमर्धांगसंबद्धता रूपं कथयति सनियमयोरिति नियमे हरहरिती शिवाविति भावः॥ अत्र पदवीविशेषणपदार्थयोः कथनं

नियमविषयेमिविरहासहाविहविहरतः शिवाविति भावः

सालङ्का १०

कि॰का॰टी
ह॰पं॰
१२
५४

भावा

मंडलानि २=

संमूर्छतामिति॥ इहाद्रौ रजतभित्तिमयूषजालैः संमूर्छतां बहुलीभवतां॥ आलोलानां पादपलतानां तरुशाखानामंतरेषु निर्गतानां प्रसृतानां॥ घर्मद्युतेः सूर्यस्य धाम्नां तेजसामादर्शमंडलनिभानि दर्पणमंडलसदृशानि स्वपमालं कारः॥ पटलानि मुहुः समुल्लसंति मुहुर्मुहुः स्फुरंति नतु सातत्येन लतानामालोलत्वाच्च नानामत्रमृत्पाषाणादिप्रायेण संभवतीति भावः॥ ४१॥ शुक्लैरिति॥ शुक्लैः सितैः मयूखनिचयैः तेजःपुंजैः॥ परिवीतमूर्तिः आलिंगितदेहः॥ वप्राभिघातेन वप्रक्रीडया परिमंडलितो वर्तुलीकृतः॥ उरुर्देहो येन स तथोक्तः

रंध्रेषु १

वारंवारं २

इहस्फुरितो ४=

संमूर्छतां रजतभित्तिमयूखजालैरालोलपादपलतांतरनिर्गतानां॥ घर्मद्युतेरिह मुहुः पटलानि धाम्नामादर्शमंडलनिभानि समुल्लसंति॥ ४१॥ शुक्लैर्मयूखनिचयैः परिवीतमूर्तिर्वप्राभिघातपरिमंडलितोरुदेहः॥ शृंगाण्यमुष्य भजते गणभर्तुरुक्षा कुर्वन्वधूजनमनस्सु शशांकशंकाम्॥ ४२॥

पादप

गणभर्तुः॥ प्रमथनाथस्य उक्षा वृषभः॥ उक्षा भद्रो बलीवर्द ऋषभो वृषभो वृष इत्यमरः॥ वधूजनमनःसु शशांकशंकां कुर्वन् तेषां मोहं ददातीति भावः॥ अमुष्याद्रेः शृंगाणि भजते॥ अत्र शशांकशब्दस्य संदेहार्थत्वे संदेहालंकारः॥ यथेच्छसि तथास्तु न चात्र विशेषपरिणामस्य लिंगे नांगांगिभावेन संकीर्यते॥ ४२॥ संपनीति॥ इहाद्रौ विविधानां नानावर्णानां शिखरप्रमाणरूपमंतरं प्रति शरदीत्यर्थः॥ लघुन्यगुरूणि कुतः क्षीराण्यपयसि अत एव

चंद्रभ्रांतिं कुर्वन् १=

५८

डितं १

भिद्रां भेदं ॥ खिद्विराद्रिभ्यो ऽङ् प्रत्ययः ॥ उपयुषि गते जलधरपटले मेघमंडले कथमपि शनकैः ॥ जलं जन्मजातमित्यर्थः ॥ अत एव खंडितविग्रहं विछिन्नस्व

रूपं वलभिद इंद्रस्य धनुः स्थापयितुं विभक्तं समर्थाः भवंति ॥ अथेंद्रधनुषा मणिरुचीनां संबंधे संबंधकल्पनादतिशयोक्तिरलंकारः ॥ वंशपत्रपतितं ह

त्रं ॥ दिग्गुर्विंवंशपत्रपतितं भ्रनभनलगैः इति लक्षणात् ॥ ४३ ॥ स्नपितेति ॥ इहाद्रौ शंभुरिंदुलेखया स्नपितानि सिक्तानि नवानि लेनानां तरूणां प्रवा

संप्रति लब्धजन्मशनकैः कथमपि लघुनि तीराणपयस्यपेयुषि भिद्रां ॥ जलधरपटलेखंडितं विग्रहं धनुरिहं वलभिदः

विविधाः स्थापयितुं भवंति विभवः शिखरमणिरुचः ॥ ४३ ॥ स्नपितनवलतातरुप्रवालेरमृतलवस्रुतिशालिभि

र्मयूखैः ॥ सततमसितयामिनीषु शंभोरमलयतीह वनांतमिन्दुलेखा ॥ ४४ ॥ त्विपतियोत्र वनांवितता हृह

हूहतिकामिवरोचनिकीं रुचं ॥ अपमनेकहिरण्मयकंदरस्तवपितुर्दयितो जगतीधरः ॥ ४५ ॥ रामजेर ॥

लवस्रुताभ्रन १४ लानि यैस्तैरमृतस्य विन्दुनिष्पंदेन शालंते तैर्मयूखैः सततं सर्वकालमसितयामिनीषु कृष्णपक्षरात्रिषु अपि वनांतं ॥ अमलयति धव

लयति ॥ अत्र चैनेनदत्तीति व्यतिरेको व्यज्यते ॥ ४४ ॥ त्विपतीति ॥ योऽद्रिरत्र वनं विततां रोचनिकीं रुचं सौवर्णीमित्यर्थः ॥ रोचनया

रक्तां रोचनिकी ॥ लाक्षारोचनाशकलकर्दमाष्ठक् ॥ टिड्ढाणञ्जित्यादिना ङीप् ॥ हूहहूहतेः कामहोत्तरासंगमिव ॥ द्योर्ग्वारोत्तरासं

उत्तरेतते १५

गोसमोऽम्बुहृतिकान्तयेमरः॥ क्षिपति प्रसारयति॥ अनेकाहिरण्मयाः कंदरापस्पसः॥ हिरण्मयश्चासौ दरं डिनायनेत्यादिनिपातनात्साधुः॥ अयं पुरो वर्त्ति
गिरिस्तव पितुरिंदुरस्य पितुः प्रियः॥ जगत्याधरो जगतीधरः॥ यत्तेगंतव्य इंद्रकीलाख्य इत्यर्थः॥४५॥ भ्रान्तिमिति॥ अमुत्र अमुष्मिन्नद्रौ॥ अनिले
जवात्॥ जरितिलतानां॥ शक्तिमन्योन्यसंगमपनयतिसति॥ सहसा हठात्॥ वैरोचनैः॥ सावित्रैः मयूखैर्द्विगुणाः हिरण्मयत्वात् कृता इति द्विगुणि
ताः॥ गुणत्वाच्छ्रत्विशब्दादे रश्मैंद्रियामुरव्यनंतुष्ठितिवैजयंती॥ हिरण्मयीनां हिरण्यविकाराणां दरं डिनायनेत्यादिनिपातनात्साधुः॥

शक्तिं जवादपनयत्यनिले लतानां वैरोचनैर्द्विगुणिताः सहसा मयूखैः॥ रोधोभुवां मुहुरमुत्र हिरण्मयीनां भास
स्तडिद्विलसितानि विडंबयंति॥४६॥ कषणकंपनिरस्तमहाहिभिः क्षणविमत्तमतंगजवर्जितैः॥ इह मदस्न
पितैरनुमीयते सुरगजस्य गतं हरिचंदनैः॥४७॥

रोधोभुवां तटभुवां भासः मुहुस्तडिद्विलसितानि विडंबयंति अनु
कुर्वंतीत्यर्थः॥ उपमालंकारः॥४६॥ कषणेति॥ इहाद्रौ कषणेन कंडूयनेन कंपस्तेन निरस्ता महाहयः महासर्पा यैस्तैः॥ क्ष
णं विमत्तमतंगजवर्जितैः मत्तमतंगजरहितैः॥ कुतः मदस्नपितैरैरावतमदासिक्तैरित्यर्थः॥ मितं द्रुस्त्वः॥ हरिचंदनैः चन्दनद्रु
मैः॥ सुरगजस्य ऐरावतस्य प्राप्तिरनुमीयते॥ हरिचंदनविशेषणैः॥ काव्यलिङ्गमनुमेयम्॥४७॥ श्रीसाम्बजी सहायं करोतु॥

गतं

इहाद्रौ ४

जलदेति ॥ जलदजालघनैर्मेघवृन्दैः सांद्रैः ॥ असिताश्मनामिंद्रनीलानां मरीचिभिः किरणैः ॥ भानुः करो मरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रि-
यामित्यमरः ॥ उपहतप्रचया विघ्नहितसंघाता ॥ अत एवादीपितकंदरा ॥ प्रकाशितगह्वराः ॥ विवस्वतो दीप्तिस्तिमिरैः संवलिता सहिता मि- म
श्रितेव भवतीत्युत्प्रेक्षा ॥ ४८ ॥ भव्य इति ॥ इहाद्रौ ॥ भव्यः शांतो भवन्नपि मुनेर्व्यासस्य ॥ शासनेनेंद्राराधनरूपेण तात्रे पथि स्थितो

जलदजालघनैरसिताश्मनामुपहतप्रचयेह मरीचिभिः ॥ भवति दीप्तिरदीपितकंदरा तिमिरसंवलितेव विव-
स्वतः ॥ ४८ ॥ भव्यो भवन्नपि मुनेरिह शासनेन क्षात्रे स्थितः पथि तपस्य हतप्रमादः ॥ प्रायेण सत्यपि हितार्थक-
रे विधौ हि श्रेयांसि लब्धुमसुखानि विनांतरायैः ॥ ४९ ॥ मा भूवन्नपथहृतस्तवेंद्रियाश्वाः संतापे दिशतु शिवः शि-

स्पर्धः ॥ गृहीतशस्त्र एवेंहतप्रमादः प्रमत्तः सन् ॥ तपस्य ॥ तपश्चर्यां कुरु ॥ तपसेति कर्मणो रोमंथतपोभ्यां वर्त्तिचरोरिति क्यङ् ॥ तदंताद्धा-
तोर्लोट् ॥ न च सर्वभूतहितकारिणो मे किं प्रमादः करिष्यतीति ॥ विश्वसितव्यमित्यर्थांतरन्यासेनाह ॥ प्रायेणेति ॥ हि यस्मात् प्रायेण बाहु-
प्रायो वयस्यनशने मृतौ वा ल्येन ॥ प्रायो वयसि बाहुल्य इत्यमरः ॥ हि तमर्थं करोतीति हितार्थकरे विधौ व्यापारे सत्यपि नरो यैर्विघ्नैर्विना श्रेयांसि लब्धुमसुखानि अ-
तुल्यतुल्ययोरिति हेमचंद्रः २८ शक्यानीत्यर्थः ॥ अत एव शकधृषेत्यादिना समानकर्तृके पि तुमुन् ॥ अकारणवैरिणः ॥ सर्वत्र सर्वस्यापि संतीति भावः ॥ ४९ ॥ रामजी ॥

अकारणा

किं प्रकृति २४

कि॰ का॰ टी॰
सं॰ पं॰
२३
60
वचनमितिशेषः॥४८

माभूदन्निति॥ नवरंद्रियाण्येव अश्वास्ते अपथेन हरंतीति॥ अपथहरा माभूवन्नित्यर्थः॥ अपेथानं॥ माननीयुरित्यर्थः॥ माङि लुङ् इत्याशीरर्थे लुङ्॥ संतापेत तपः क्लेशो सतति॥ शिवः शिवदा साध्वीयसी अप्रसमुत्साहे शिरातु॥ किं चेति चार्थः॥ लोकपाला इंद्रादयः॥ नपसि विषये बलं शक्तिं रत्नेनः॥ वर्द्धयंतु लोकपाला॥ संतः कल्याणी साध्वी॥ क्रियामनुष्ठानमधिकफलां क्रियासु कुर्वंतु॥ करोतेराशीषि लिङ्॥ ५०॥ इत्युक्तेति॥ प्रियार्हे राजराजभृत्ये॥ इति पूर्वोक्तमुक्त्वा हितं प्रियं चोक्त्वा॥ सपदि स्वस्य स्वकीयं धाम स्थानं गतवति सति॥ पृथासुतोऽर्जुनः सो

रत्नं नस्तपसि बलं च लोकपालाः कल्याणीमधिकफलां क्रियां क्रियासु॥ ५०॥ इत्युक्त्वा सपदि वचः प्रियं प्रियार्हे धाम स्वं गतवति राजराजभृत्ये॥ सोत्कंठं किमपि पृथासुतः प्रदध्यौ संधत्ते भृशमरतिं हि सद्वियोगः॥ ॥५१॥ नमनतिशयनीयैः सर्वतः सारयोगाद्विरहितमनेके नाकभाजां फलेन॥

कंठं [illegible] सोत्कुकं किमपि प्रदध्यौ चिंतयामास॥ तथा हि सद्वियोगः सुजनवियोगः॥ भृशं अरतिं अपायो संधत्ते॥ करोतीत्यर्थः॥ अर्थांतरन्यासः॥ ५१॥ नमनतीति॥ अकुशाः पूर्णाः लक्ष्म्यः शोभा यस्य असौ अकुशलक्ष्मीरिति बहुवचनाश्रयो बहुव्रीहिः॥ एवं च उरःप्रभृतिभ्यश्चेति कः प्रत्ययो न वकाशः॥ तथा लक्ष्मी

६०

॥ किरातोपन्यवनः ॥

कि॰ का॰ टी॰
पं॰ पं॰
६४

61

शब्दस्यैकवचनांतस्य पाठन्यापिनद्युतश्चैनस्यावकाशः॥ उरः प्रभृति पाठसामर्थ्यादेव शैषिकस्तु वैभाषिक इत्यविरोधः॥ सोऽर्जुनः॥
सर्वतः सर्वत्र सारयोगादुत्कृष्टवस्तुप्रयोगात्॥ सारो बले स्थिरांशे च न्याय्ये क्लीबे वरे त्रिषु॥ इत्युभयत्राप्यमरः॥ अनतिशयनीयं॥ अ
नतिक्रमणीयं॥ अनेकेन बहुना अंकभाजा समीपगतेन शीघ्रभाविनेति यावत्॥ फलेन कार्य्यसिध्या अविरहितं मनून्नंका

अकृशमकृशलक्ष्मीश्चेतसाशंसितं स स्वमिव पुरुषकारं शैलमभ्याससाद॥५२॥
इति श्री महोपाध्याय मल्लिनाथ सूरि विरचितायां किरातार्जुनीय

इति महोपाध्यायश्रीभारवीकृतौ किरातार्जु
नीये महाकाव्ये हिमवद्दर्शनं नाम पंचमः सर्गः॥५॥

र्थसिद्धेरवश्यंसाधकमित्यर्थः॥ अकृशमतनुं चेतसा आशंसितं प्राप्तुमिष्टं पौरुषमिवाभ्याससाद॥ मालनी वृत्तम्॥५२॥
इति श्री पदवाक्यप्रमाणपारावारीण महोपाध्याय कोलाचल मल्लिनाथ सूरि विरचितायां किरातार्जुनीय व्याख्यायां
घंटापथसमाख्यायां हिमवद्वर्णनं पंचमः सर्गः समाप्तिमगमत्॥५॥
संवत् १९२७ वैशाख कृष्ण एकादश्यां समाप्तिमगमगमत्॥ लिपितं गिरधारीणा॥

शैलमिंद्रकीलं स्वं आत्मीयं पुरुषस्य कारः कर्म तं पुरुषकारमुत्कृष्टविशेषणाद्विशिष्टं २५

६१

धूतानामिति॥ अभिमुखपातिभिः समीरैः प्रतिकूलवायुभिः

किरातस्य षष्ठः सर्गः पत्रसंख्या [illegible] दश १०

६

कि॰ का॰ टी॰
वं॰ घ॰ ६
२ वसंति २५
वहुव्रिहीः
62

ॐश्रीगणेशायनमः॥रुचिरेति॥अथोआसादनानंतरं रुचिराकृतिः सौम्यः विग्रहः॥धृतसत्पथोवलंवितसन्मार्गः॥आकारानुगुणावानित्य
र्थः॥यत्राकृतिस्तत्रगुणाइति सामुद्रिकाः॥उपमानेसमानमेनत्॥सपुरुहूतसुतो ऽर्जुनः कनकस्यविकाराः सानवोयस्यतंकनकसा
नुं॥गरुडसावर्ण्यार्थंविशेषणंसमुदायविकारषष्ठ्याश्चोत्तरपदलोपश्च॥नमिन्दुकील्ले परमः पुमान्विष्णुः॥पततां पतत्रिणांपतिं
गरुडमिव॥त्रिभिःपथिभिर्गच्छतीति त्रिपथगा भागीरथी॥अन्येष्वपिदृश्यत इतिडःप्रत्ययः॥उपपदसमासः॥उत्तरपदसमासश्च॥

रुचिराकृतिः कनकसानुमथो परमः पुमानिव पतिं पततां॥धृतसत्पथस्त्रिपथगामभितः सतमारुरोह
पुरुहूतसुतः॥१॥तमनिंद्यवंदिन इवेंद्रसुतं विहिताालिनिक्वणजयध्वनयः॥पवनेरिताकुलविजिह्म
शिखा जगतीरुहोऽवचकरुः कुसुमैः॥२॥ तामभितोभिमुखमारुरोह॥समीपाभयतः॥शीघ्रसाकल्याभिमुखेभिनत्य
मरः॥अभितात्परवत्तं॥अभितात्समजसमंतेरुद्देतेविलक्षणान्॥२॥तमिति॥अलिनिक्वणजयध्वनयइवनेविहितायैस्तत
थोक्ताः॥पवनेरिता वायुनानुन्नाः॥नतनन्वास्तानि क्षुन्ताविद्धहिनेरितासमास्त्यमरः॥अतएवाकुलालोलाविजिह्माव
क्राश्च शिखाअग्राणियेषांतेतथोक्ताः॥शिखाज्वालाकेकिमौल्योः॥शिखाशाखाग्रमौलिष्विति वैजयंती॥जगतीरुहोभू

(margin, lower) ...तिमिताति स्तवयन्मार्गवर्णयति २५

(right margin) रुप२८
(right margin) विहिता
(left margin) ररु१=

दृह:॥ कउव॥ अनिंद्या॥ अनवद्या येवंदिनं स्तुतिपाठकाइव:॥ नमिद्रुसुतमर्जुनं कुसुमैरववकरुः॥ अभिवर्षुरित्यर्थः॥ अरपृष्टतामिति गुणः॥ अत्राकिरतेर्दृष्टत्वात्कुसुमानां करणत्वविवक्षायांतृतीया। अपादानत्वविवक्षायांपंचमी। यथाकटाहात्तान्वामातीकिरतीतिदृष्यपतेच॥ धातूनामनेकार्थभेदात्कर्मकमत्ययः॥ यथासिंचतेस्तरणार्थीकरणयोरर्थयोर्द्वयमपिकर्मत्वकरणत्वे यथामेघामृतं सिंचातिगोः पयश्च सिंचतिवा॥ अमृतैर्वर्षुरीति॥ अत्रवाकोसमागतग्रहणेरूपमेयपयो: साध्यसाधनाभावादंगांगिभावेनसंकरः॥३॥ अवधूतेति॥ अवधूता:॥ पंकजपरागकणायैस्तेतथोक्ताः॥ इतिसौरभ्योक्ति:॥ तनुर्जाह्नवीसलिल

मेघा

व्या:

अवधूतपंकजपरागकणास्तनुजाह्नवीसलिलवीचिभिदः॥ परिरेभिरेऽभिमुखमेत्यसुखाः सुहृदः सखायमिवतं मरुतः॥४॥ उदितोपलस्खलनसंवलिताःस्फुटहंससारसविरावयुजः॥ मुदमस्यमांगलिकतूर्यकृतां ध्वनयःप्रतेनुरनुवप्र मपां

वीचीर्भिंदंतीति॥ तथोक्ताइति॥ शैत्योक्तिः॥ सुखयंतीतिसुखाः पचाद्यच्॥ सुखस्पर्शाइतिमांद्योक्तिः॥ मरुतोवाताः॥ तमर्जुनं॥ सुहृदः सखायमिवाभिमुखमेत्यपरिरेभिरे॥ आलिंगितवंतः॥४॥ उदितेति॥ उदितोपलेषुउन्नतपाषाणेषुस्खलनेनप्रतिघातेनसंवलिताः मूर्छिताः॥ अन्तएवतूर्यघोषइवधुमधुमायमानाइत्यर्थः॥ स्फुटैःहंसानांसारसानांचविरावैर्युजंतइतितथोक्ताः॥ क्विप्॥ अनुवप्रमपामंतः॥ पतंतीनामितिशेषः॥ ध्वनयोस्यार्जुनस्य॥ मंगलंप्रयोजनमेषांतेमांगलिकाः॥ प्रयोजनमितिठक्॥ तैस्तूर्यैःकृतांमुदंहर्षंप्रतेनुः॥ अत्रान्यस्यान्यकार्यकारणासंभवात्तूर्यकृतमुत्सहर्षमिवमुदमितिप्रतिबिंबेनाक्षेपान्निदर्शनालंकारः॥५॥

गम

स

ल

जं

कि॰ का॰ टी॰
वं॰ प॰ ६
२

63

अवरुग्णेति॥ सोऽर्जुनः पुरोग्रेऽवरुग्णा तुंगसुरदारुतरो॥ भग्नोन्नतदेवदारुद्रुमे॥ वलयसि वलवत्तरे॥ मत्वं नादीयसूनिमग्नोलुकः॥ सु
रसरित्पयसां निचये पूरे विषये वेतसवनेन वानीरखनेनाचरितां॥ अथ वेतसे॥ रथाभ्रपुष्पविदुलशीतवानीरवंजुलाइत्यमरः॥ स
मृद्धिकरीं श्रेयस्करीं लोके यथा दृष्टामित्यर्थः॥ प्रणतिं ददर्श यासर्वलोकदृष्टांतभूतेति भावः॥५॥ विवभवेति॥ सोऽर्जुनः परि
तः सरोजरजसा अरुणितं उत्तरीयं च कुसुमादिना॥ अरुणितं संहतिमंनीरंध्रं तरंगभंगवारितरंगघोषाभिर्वा सरित उत्तरीयंस्त

अवरुग्णतुंगसुरदारुतरौ निचये पुरः सुरसरित्पयसां॥ स ददर्श वेतसवनाचरितां प्रणतिं वलीयसि विवृद्धि-
करीं॥५॥ विवभूव नालमवलोकयितुं परितः सरोजरजसारुणितं॥ सरिदुत्तरीयमिव संहतिमत्सतरंगरागि कल
हंसकुलम्॥६॥

नांशुकमिव स्थितं॥ कलहंसकुलं अवलोकयितुं॥ अलमित्यर्थ नाविवभूव न शशाक तत्सौंदर्यस्योद्वेलत्वादिति भावः॥ ६॥ दधनीति
ततीः ततानि दधाति॥ कुतः परिणतद्विरदे॥ परिणता स्तिर्यग्दंतप्रहारिणो द्विरदा यस्मिन्॥ तिर्यग्दंतप्रहारस्तु गजः परिणतो मत इति ह
लायुधः॥ मदस्रुतिभिः॥ मुदितालियोषिति॥ रोधसि सोऽर्जुनोऽधिकां धृतिं प्रीतिं ववंध निश्चलीकृतवानित्यर्थः॥ तथा हि॥ महार्हे

जनः

६३

गजा४

जन्यपीडयन् अपि महते गुणायोत्कर्षाय भवति ॥ महत्कृतापीडापि सुभावहैवेत्यर्थः ॥ तदुक्तं ॥ महद्गणस्यापि रोधसः प्रीतिकरत्वमिति भावः ॥७॥
अन्विति ॥ सोऽर्जुनो नुहेमवप्रं कनकसानुसमीपे ॥ समीपार्थेऽव्ययीभावः ॥ अरुणैः ॥ कनककान्त्युपरंजनादिति भावः ॥ पृथुभिरूर्मिभिः ॥
समन्तात्तुल्यरूपतां गतं सादृश्याद्दुर्विवेचनीयमित्यर्थः ॥ सहभूतं सहचरं प्रियं ॥ सहशब्दस्य पचाद्यजंतेन चरशब्देन समासः करुणैर्दीनै रुतैः
64 य
कूजितैरनुबध्नती मान्वेष्यंती रथांगनामवनितां चक्रवाकीमभिननंद ॥ प्रकृष्टप्रेमदर्शनात्तस्यानंद इति भावः ॥ अत्रतावद्धर्मीर्णा । ना

दधतिक्षतीः परिणतद्विरदे मुदितालियोषिति मदस्रुतिभिः ॥ अधिकां स रोधसि बबंध धृतिं महते रुजन्नपि
गुणाय महान् ॥७॥ अनुहेमवप्रमरुणैः समतां गतमूर्मिभिः सहचरं पृथुभिः ॥ स रथांगनामवनितां करुणै
रनुबध्नतीमभिननन्द रुतैः ॥८॥ सितवाजिने निजगदू रुचयश्चलवीचिरागरचनापटवः ॥ मणिजालमंभसि
निमग्नमपि स्फुरितं मनोगतमिवाकृतयः ॥९॥

स्वभावस्य त्यागेनारूपस्वीकारात्तद्गुणालंकारः ॥ तदुक्तं ॥ तद्गुणः ॥ स्वगु
णत्यागादन्योत्कृष्टगुणग्रहः इति लक्षणात् ॥ तन्मूलाचेयं चक्रवाकयोः स्वकांतेतरंगभ्रांतिरिति तद्गुणभ्रांतिः ॥ अतो गांगिभावेन संश
करः ॥८॥ सितेति ॥ चलवीचीनां रागो रंजनं वर्णांतरापादनात् ॥ तस्य रचना क्रिया तत्र पटवः रुचयः प्रभा ॥ अंभसि निमग्नं अपि मणि
जालं स्वाश्रयभूतमिति भावः ॥ मनोगतं स्फुरितं रोषादिविकारमाकृतयो भ्रूभंगादिबाह्यविकाराइव सितवाजिनेऽर्जुनाय निजगदुः ॥ आ

समर्था:२४

64

उपलेति॥ उपलैराहताः ऋत एवोद्धताश्चये तरंगास्तैरुद्धतं॥ जविना वेगवता वायुना विधुतं विततं च केतकस्य शिखा गुंतत्ववदिशदं मपांफेनं॥ डिंडीरं॥ डिंडीरोब्धिकफः फेन इत्यमरः॥ सरितः॥ प्रहासमट्टहासमिवेत्युत्प्रेक्षा सोऽर्जुनो ददर्श॥८॥ वह्विति॥ बर्हिचंद्रकनिभं मयूरमेचक सदृशं॥ समौ चंद्रकमेचकावित्यमरः॥ बहु अनेकधा दानपयसां पटलं॥ जाता मेकवचनं॥ बहवो मदांबुबिंदव इत्यर्थः॥ अवगाढमंतः प्रविष्टं॥ गाहे कर्त्तरि

उपलाहतोद्धततरंगभृतं जविना विधुतविततं मरुता॥ स ददर्श केतकशिखाविशदं सरितः प्रहासमिव

फेनमपां॥८॥ बहु बर्हिचंद्रकनिभं विदधे धृतिमस्य दानपयसां पटलं॥ अवगाढमीक्षितुमिवेभपतिं

विकसद्विलोचनशतं सरितः॥९॥ प्रतिबोधजृंभणविभिन्नमुखी पुलिने सरोरुहदृशा ददृशे॥ पत

दच्छमौक्तिकमणिप्रकरा गलदश्रुबिंदुरिव शुक्तिवधूः॥१०॥ क्तः॥ इभपतिमीक्षितुं विकसद्उन्मिषत्सरितो विलो

चनशतमिवेत्युत्प्रेक्षा॥ अस्यार्जुनस्य धृतिं प्रीतिं विदधे॥९॥ प्रतिबोधेति॥ प्रतिबोधः स्फुटनं॥ निद्रापगमश्च तत्र यज्जृंभणं मुखव्यादान

ता जृंभा च तेन विभिन्नमुखी विशिष्टाग्रा विहतास्या चात एव॥ पतन् प्रसरन् अच्छो मौक्तिकमणीनां प्रकरः स्तोमो यस्याः सा तन

योक्तार्त एव गलदश्रुबिंदुरिव स्थितेत्युत्प्रेक्षा॥ शुक्तिवधूरिव शुक्तिवधूः पुलिने शयनीये च॥ सरोरुहदृशा अर्जुनेन ददृशे हृ

गाथ इति श्रोष:१०

पा

शुचिरिति ॥ अप्सु शुचिः ॥ स्वच्छः ॥ तनुना सांद्रेण फेनस्य लवेन संवलितः संगतः ॥ विद्रुमलता विटपः ॥ पल्लवः ॥ विटपः पल्लवे स्कंधे विस्तारे स्तंबशाखयोरिति विश्वः ॥ स्म
रदायिनः ॥ कामोद्दीपकस्य दशनांशुभृतो दंतिकांतिकलितस्य दयिताधरस्य ॥ अधिगर्थेत्यादिना षष्ठी ॥ भृशं स्मरयति स्म ॥ लट् स्मेति भूतार्थे लिट् ॥ भित्तांदू
स्वः ॥ स्मरणालंकारः ॥ १३ ॥ उपलभ्येति ॥ सोऽर्जुनश्चंचलतरंगैः ॥ धृतं तत्संक्रांतमित्यर्थः ॥ मदगंधमुपलभ्याघ्राय पयसः ॥ उत्थितवतां रोषादिति शेषः ॥ कार्या

शुचिरप्सु विद्रुमलताविटपस्तनुसांद्रफेनलवसंवलितः ॥ स्मरदायिनः स्मरयति स्म भृशं दयिताधरस्य दशनांशुभृतः
॥ १३ ॥ उपलभ्य चंचलतरंगहृतं मदगंधमुत्थितवतां पयसः ॥ प्रतिदंतिनामिव स संबुबुधे करियादसामभिमु
खान्करिणः ॥ १४ ॥ स जगाम विस्मयमुदीक्ष्य पुरः सहसा समुत्पतितया फणिनः ॥ प्रहितं दिवि प्रजविभिः श्वसितैः
शरदभ्रविभ्रममपां पटलम् ॥ १५ ॥

करिणां यादसां शाकपार्थिवादिषु द्रष्टव्यः ॥ प्रतिदंतिनामिवाभिमुखानभियातानि
त्यर्थः ॥ करिणः संबुबुधे ददर्शेत्यर्थः ॥ १४ ॥ स जगामेति ॥ सोऽर्जुनः पुरोऽग्रे सहसा समुत्पतितया ॥ समुत्पातिनुमिद्धेः ॥ पतेस्तनंतात् दुःश्रुत्य
यः ॥ नातिपति दरिद्रादिभ्यः स नस्य ईर्वक्तव्यः इति विकल्पादिडागमः ॥ फणिनः ॥ प्रजविभिरतिवेगवद्भिः श्वसितैः फूत्कारैर्दिव्याकाशे प्रहितं प्रे
रितं ॥ शरदभ्रस्य विभ्रमः स्वविभ्रमः सोऽस्यास्तीत्यतः ॥ शुभ्रं व्यापकं चेत्यर्थः ॥ अपां पटलं पूरमुदीक्ष्य विस्मयं जगाम ॥ अत्रोपमानुप्राणिता
स्वभावोक्तिरलंकारः ॥ १५ ॥

मत्र १५

मृत्स्नीतं

समृति॥ सोऽर्जुनः॥ सैकतवती॥ पुलिनवती॥ अभितः॥ शफरीणां परिस्फुरितैरेव चारवोऽहशो यासां ताः॥ सुरनिम्नगां गंगां॥ उपयती॥ भजंती॥
स्तनितपाल रूणमानुं द्वीपु॥ अत एव बृहज्जघनाः॥ ललिताः॥ सखीरिवास्थितास्ताः॥ सरितस्ता अतिचक्राम॥ २६॥ अधिरुह्येति॥ सोऽर्जुन अधिरुह्य अद्रि
रिमिति शेषः॥ पुष्पभरेण नम्रशिरोभिर्नताग्रैस्तरुभिः परितः परिवृततलां भूषितस्वरूपां॥ अथः स्वरूपे पार् ह्रीतलमित्यमरः॥ सपर्युपेभ्यः करोते
र्भूषणेऽसुडिति सुडागमः॥ शुचिं शुद्धां॥ अत एव मनसः॥ प्रसत्तिमिव मूर्त्तां॥ मनःप्रसादमिव स्थितां॥ न हूतो तद्भावो येषां॥ गिरिमूर्द्धि वनांतभुवं

सततारसैकतवतीरभितःशफरीपरिस्फुरितचारुदृशः॥ ललिताःसखीरिवबृहज्जघनाःसुरनिम्नगामुपयतीः
सरितः॥२६॥ अधिरुह्यपुष्पभरनम्रशिरोभिःपरितःपरिष्कृततलांतरुभिः॥ मनसःप्रसत्तिमिवमूर्द्धिगिरेःशुचि
माससादसवनांतभुवं॥२७॥ अनुसानुपुष्पितलतावितत्तिःफलितैर्भूरुहैर्विविक्तवनः॥ धृतिमाततान
तनयस्यहरेस्तपसेधिवस्तुमचलामचलः॥२८॥ राम

आससाद॥ अंतशब्दः स्वरूपवाचकः॥ अंतोऽत्यवसिते मृत्यो स्वरू
पे निश्चयेंऽतिके इति वैजयंती॥ २७॥ अन्विति॥ अनुसानु प्रतिसानु॥ वीप्सार्थेऽव्ययीभावः॥ पुष्पिताः संजातपुष्पाः लताविततयो यस्मि
न्सः॥ फलिता उरवो भूरुहा येषु तानि विविक्तानि रहितानि वनानि यस्मिन्नसम तस्योक्तोऽचल इंद्रकीलः॥ हरेस्तनयस्यार्जुनस्य तपसे तप
अर्थ्यार्थं॥ अधिवस्तुं अधिष्ठातुं॥ [इति] क्रियापेक्षयोः समानकर्तृकात्तुमुन्॥ अचलां धृतिमुत्साहमाततान॥ तत्राचलाविशेषणपदार्थस

विविक्तौ पूतविजनौ विविक्तौ ..... विजनातिप्यमरः ५

कि॰ का॰ टी॰ ॥ ६५

65

प्रणिधायेति ॥ अथ तत्रादौ विधिना योगशास्त्रानुसारेण ॥ धियं चित्तवृत्तिं ॥ प्रणिधाय ध्येयविषये धियं नियम्य ॥ नैसर्गिकेत्यादिनाणत्वं ॥ मुनितां दधतस्तपस्यत इत्यर्थः ॥ पुरातनमुनेरर्जुनस्य ॥ असुकरं दुष्करं तपः ॥ श्रमं नादधौ न चकार ॥ तथाहि ॥ आत्मवतां मनस्विनां ॥ अवसादकरं अपगतनिजत्वकं किमिव न किंचिदित्यर्थः ॥ २२ ॥ ॥ शमयन्निति ॥ धृतं इन्द्रियशमो विषयव्यावृत्तिरेवैकं मुख्यं सुखं येन सततथोक्तः ॥ आत्मारामइत्यर्थः ॥ अन्यत्र धृतं कृतं इन्द्रियाणां शमः संतापनिवर्त्तनमेकमद्वितीयं सुखमाह्लादश्च येन स तथोक्तः ॥ शुचिभिर्निर्मलैर्गुणैर्मैत्र्यादिभिश्च ॥ अन्यत्र कान्त्यादिभिश्च ॥ अघमयं पापरूपं तमः

प्रणिधाय तत्र विधिनाथ धियं दधतः पुरातनमुनेर्मुनितां ॥ श्रममादधावसुकरं न तपः किमिवावसादकरमात्मवतां ॥ १९ ॥ शमयन्धृतेन्द्रियशमैकसुखः शुचिभिर्गुणैरघमयं स तमः ॥ प्रतिवासरं सुकृतिभिर्ववृधे विमलः कलाभिरिव शीतरुचिः ॥ २० ॥ अधरीचकार च विवेकगुणादगुणेषु तस्य धियमस्तवतः ॥ प्रतिघातिनीं विषयसंगरतिं निरुपप्लवः शमसुखानुभवः ॥ २१ ॥

अज्ञानमन्यत्रांधकारं च ॥ शमयन् निवर्त्तयन् ॥ विमलः ॥ अमलिनः शुभ्रोऽन्यत्र सोऽर्जुनः प्रतिवासरं सुकृतिभिः ॥ सुकृतैस्तपो भिरित्यर्थः ॥ स्त्रियां क्तिन् ॥ कलाभिः शीतरुचिश्चन्द्र इव ववृधे ॥ २० ॥ अधरीति ॥ किं चेति चार्थः ॥ विवेकस्तत्त्वावधारणं स एव गुणः तस्मात्तेन हेतुनेत्यर्थः ॥ विभाषा गुणे स्त्रियामिति पंचमी ॥ अगुणेषु कामक्रोधादिषु दोषेषु विषये ॥ नाद्विरोधेन नञ्समासः ॥ धियं चित्तवृत्तिं अस्तवतो निवारितवतस्तस्यार्जुनस्य निरुपप्लवो निर्बाधः ॥ शमसुखानुभवः ॥ प्रतिघातिनीं सोपद्रवां ॥ विषयसंगरतिं शब्दाद्युपभोगरुचिमधरीचकार ॥ विषयनिस्पृहां चकारेत्यर्थः ॥ उत्कृष्टसुखलाभस्य प्रकृष्टवैराग्यहेतुत्वादिति भावः ॥ २१ ॥

राम राम ॥

Marginalia: खेदं | खं | 66 | शांतानंदानुभवः ५

शाम्यते ऽनेनेति शमः २५

महसेति ॥ प्रयतो हिंसादि निरतः ॥ मनसा ध्यानेन जपैर्विशिष्टमंत्राभ्यासैः प्रणतिभिर्नमस्कारैः ॥ एवं मनोवाक्कायकर्मभिर्दिवोधिपतिमिंद्रं ॥ उपेयिवा
न् उपसेदिवान् ॥ सोर्जुनः सहजेतरौ नैसर्गिकागंतुकौ ॥ जीयते ऽनेनेति जयो वीररसः ॥ एरचू ॥ जयशमौ वीरशांतौ दधती महसी तेजसी युगपद्बि
भरांबभूव बभार ॥ भीह्रीभृहुवां श्लुवच्चेति विकल्पादाम्प्रत्ययः ॥ अत्र युगपद्वीरशांताधिकरणाभिधानाच्च ॥ अस्य लोकाद्भुतमाहिमत्वमुक्तं
ते ॥ २२ ॥ शिरसेति ॥ हरिन्मणिनिभो मरकतमणिश्यामो ऽभिषवेन स्नानेन कृतजन्मनो जनिताः अंतः पिंगा इति भावः ॥ जटाः शिरसा वहन्

मनसा जपैः प्रणतिभिः प्रयतः समुपेयिवानधिपतिं स दिवः ॥ सहजेतरैर्जयशमोदधती विभरांबभूव युगप
न्महसी ॥ २२ ॥ शिरसा हरिन्मणिनिभः सवहन्कृतजन्मनोभिषवणेन जटाः ॥ उपमां ययावरुणदीधितिभिः प
रिमृष्टमूर्द्धनि तमालतरोः ॥ २३ ॥ धृतहेतिरप्यधृतजिह्ममतिश्चरितैर्मुनीनधरयन्शुचिभिः ॥ रजयांचकार विर

तमाल ५ सोऽर्जुनः ॥ अरुणस्य सूर्यस्य दीधितिभिः परिमृष्टमूर्द्धनि व्याप्तशिरसि तमालतरोः उपमां तरोः जाः स मृगान्कमिवेशते रमयितुं न गुणाः
तो ५ सादृश्यं ययौ ॥ इत्यार्थीयमुपमालंकारो पम्याधिकरणत्वात्तद्रूपतया सप्तमी ॥ २३ ॥ धृतेति ॥ धृतहेतिर्धृतायुधोपि ॥ अधृता जिह्मा अतिकुटिलबुद्धि
ध र्येन सः ॥ शुचिभिश्चरितैर्मुनीन् ॥ अधरयन् ॥ वेषेणैव भीषणो न तु कर्मणेति भावः ॥ कुतो विरजाः रजोगुणरहितः ॥ सोर्जुनः मृगान् रंजयांच
कार ॥ रंजयामास ॥ रंजेर्णौ मृगरमणेति वक्तव्यादुपधानासिकलोपः ॥ तथाहि ॥ गुणाः दयादयः कमिव रमयितुं नेशते ॥ वशीकर्त्तुं न शक्नुवंतीति

तिरस्कुर्वन् २५ कंवा १५

अथास्य त्रिभिस्तपःसिद्धिमाह ॥१

ताप्राप्तिहेतुत्वोक्त्या अलिंगेनावदके स्वादनादीनामनेकधर्माणानेकस्मिन्नेव सर्वकर्मणासंवंधान्यराणापि भेदस्त्र नयोस्त्र संसृष्टयोरनेकरसत्वाहुन्नेर्त्यजत्वान्नया
महांगांगिभावेन संकरः॥५५॥ भ्रूविलासेति॥ भ्रूविलासैः सुभगान् वधूलयनानां विभ्रमाननुकर्तुं तेरात्मानं समीकर्तुमिवेति फलोत्प्रेक्षा॥ मृदुविलोलपलाशेरी
षञ्चलदलैरुत्पलैरम्भःकेषु याधीचयोमरुमयः तापुकंपः॥ आददे स्वीकृतः॥ ननु स्वपंकतस्य विलोलविशेषणे नैर्वोक्तत्वात्स्वीकारस्त्र नयोगः स्वपूर्वं नेत्रमात्रसाम्य

भ्रूविलाससुभगाननकर्तुं विभ्रमानिव वधूनयनानां॥ आददे मृदुविलोलपलाशैरुत्पलैरम्भः कषवीचिषु कंपः॥५६॥ ओष्ठ
पल्लवविदंशरुचीनां हृद्यतामुपययौ रमणीनां॥ फुल्ललोचनविनीलसरोजैरंगनास्यचषकैर्मधुवारः॥५७॥

भाजां उत्पलानां कंपमानवीचियोगात्तस्भ्रूविलानेत्रसाम्यं जातमित्यर्थः॥५६॥ ओष्ठेति॥ ओष्ठ एव पल्लवस्तस्य विदंशो दंशनेरुचिरभिलाषो येषां मुखं तु
रापाननिमेषणाधरं पिपासतामित्यर्थः॥ रमणीनां फुल्लामेव नीलसरोजानि येषु तैरंगनास्यचषकानि पानपात्राणि॥ चषकोस्त्रीपानपात्रमित्य
मरः॥ तैर्मधुवारो मधुपानहृतिः॥ हृद्यतां हृदयस्य प्रियत्वमुपययौ॥ हृदयस्य प्रेम इति यत्प्रत्ययः॥ हृदयस्य लेखयदण्विलासेष्विति हृद्भावः॥ रम
णाविशेषणार्थहेतुककाव्यलिंगसंकीर्णरूपकालंकारः॥५७॥ प्राप्यनइति॥ गुणवतापाश्रयवशेन गुणानां विशेषः॥ प्रकर्षः॥ प्राप्यतेव्य
क्तं नतत्पायदुक्तं नतत्तथैवेत्यर्थः॥ हियस्मादपितया आत्मनेदत्तं मधुरसातिशयेन स्वादुप्रकर्षरागप्यानशेष्याज्ञे॥ विशेषणास्सामान्यसमर्थ

कि॰ टि॰
घं॰ सर्ग
२१
१०२

नरूपोर्थान्तरन्यासः॥५८॥ वीक्ष्येति॥ रत्नचषकेषु स्फटिकादिमणिपात्रेषु अतिरिक्तां यावकापगमात् सूर्याप्यधिकां तस्य यद्दन्तपदं तदेव मंडनं तस्य मंडनं तस्य लक्ष्मीं शोभां प्रतिविंवनामितिशेषः॥ वीक्ष्य ओष्ठयावकनुदः॥ अधरलाक्षारागहारिणो मधुवाराः॥ मधुपानाभ्यासाः प्रमदानां बहुमता अभिमताः॥ वर्त्तमानोक्त न घोगात्षष्ठी॥ जज्ञिरे जातास्तेषां प्रियानुरागचिह्नप्रकाशकत्वादितिभावः॥५९॥ लोचनेति॥ मधुपानाद्धि लोचनेषु रागोत्पत्तिरधरेभ्यश्च लाक्षारागनिवृत्तिर्मध्वा न तयोश्चान्योन्यगंधसंक्रांतिस्थिते सत्युत्प्रेक्षते॥ लोचने च अधरे च लोचनाधरं॥ समुद्राभ्रात् यश इति अभिचारः॥ ज्ञापकोन्मात्राधरशब्दस्य पूर्वनिपातः॥ कृतश्चासावाहृतश्चेति विशेषणसमासः॥ लोचनाधरयोः कृताहृतो रागो यया सा तथोक्ता॥ लोचनयोः कृतः रागः अधरादाहृतरागे चेत्य

प्राप्यते गुणवतापि गुणानां व्यक्तमाश्रयवशेन विशेषः॥ तत्तथाहि दयिताननदत्तं व्यानशे मधु रसातिशयेन॥५८॥
वीक्ष्य रत्नचषकेष्वतिरिक्तां कांतदंतपदमंडनलक्ष्मीं॥ जज्ञिरे बहुमताः प्रमदानामोष्ठयावकनुदो मधुवाराः॥५९॥
लोचनाधरकृताहृतरागा वासिताननविशेषितगंधा॥ वारुणी परगुणात्मगुणानां व्यत्ययं विनिमयं नु वितेने॥६०॥

र्थः॥ पक्षाश्चार्थसंवंधात्सामान्ययोगपविशेषणपर्य्यवसाननियमेनाधिकरणपादनार्थयोरास्तेपात्॥ तथा चाधरस्य लोचनगुणयो रागतद्विरहयोः स्थानविपरीतत्वं कृतवतीत्यर्थः॥ तथा वासितेन स्वगंधसंक्रांतिसुरभितेनाननेन विशेषितो तिशयितः गंधो यस्याः सा॥ यद्वा॥ वासितानना च अर्थात् दानेन विशेषितगंधा चेति कृतवहुव्रीहिविशेषणसमासः॥ उभयथाप्याननसंक्रांतस्वगंधा स्वसंक्रांताननगंधा चेत्यर्थः॥ एवंभूता वारुणी मदिरा परगुणात्मगुणानां व्यत्ययं नु विनिमयं नु वितेने॥ वितेन प्रमादिकी वस्तुपरिवृत्तिर्व्यत्ययः॥ बुद्धिपूर्वा तु विनिमयः॥ अत्र तंत्रोक्तरिनस्य परगुणशब्दस्य वृत्त्या परगुणेन च पर

गुरुणात्मगुरुणो वेति विग्रहः ॥ कथंचिद्गतत्पासोऽव्ययः ॥ उपमानपूर्वपदबहुव्रीहिवत् ॥ तथायमर्थः ॥ परगुरुणयोरधरलोचनयोः गुरुणयो रागतान्दिरहयोः व्यत्ययं नु विनि
मयं नु वितेने ॥ तथा परगुरुणात्मगुरुणयोः ॥ आननगंधात्मगंधयोश्च व्यत्ययं विनिमयं नु वितेने ॥ अन्यथा कथमन्यस्मिन्नन्यधर्मोपलंभसंभव इति भावः ॥ अत्र लो
चनाधररागयोः तदाभावयोः भेदेऽप्यभेदाध्यवसायादेकत्ववाचोयुक्तिः तन्मूलातिशयोक्त्यनुप्राणितात्वेयं ॥ व्यत्ययविनिमययोरन्यतरकरणोत्प्रेक्षेति संदे
पः ॥ सा च प्रतीयमाना व्यंजकाप्रयोगात् नुशब्दस्तु संशये ॥ ६० ॥ रागेति ॥ वनितानां सर्वगापि सर्वांगगतापि ॥ अंतात्यंतेत्यादिना ङ्चु ॥ मदश्रीरागेण कांताननि
यनानि येषु तेषु विद्रुमवदरुणानि कपोलतलानि येषु तेषु मुखेषु दर्पणेष्विव नितांतं ददृशे ॥ तेषां नयनादीनां निर्मल्येन रागाभिव्यक्तिसंभवादिति नियमादिति भावः ॥

राग कांतनयनेषु नितांतं विद्रुमारुणकपोलतलेषु ॥ सर्वगापि ददृशे वनितानां दर्पणेष्विव मुखेषु मदश्रीः ॥ ६१ ॥

वक्त्रकोपविकृतीरपि रामाश्चारुता अभिमततामुपनिन्ये ॥ वश्यतां मधुमदोद्दपितानामात्मवर्गमिच्छति सर्वः ॥ ६२ ॥

अत्र मदश्रीः सर्वगतापि मुखेषु ददृशे इति रोधः ॥ तस्य मुखविशेषणेन समाधानानुकामलिंगानुप्राणितविरोधाभासः रामा सोऽलंकारः ॥ ६१ ॥
वक्त्रेति ॥ वक्त्रकोपेन विकृतिर्याभिस्तास्तथाभूता अभिरामाः ॥ कर्म चारुतासां सौदर्य्यवक्त्री ॥ अभिमततां प्रियवाल्भ्यमुपनिन्ये ॥ सौदर्य्यविकृतिमपि रो
चयंत इति भावः ॥ मधुमदोद्दपितानां वश्यतां विधेयत्वं उपनिन्ये ॥ तथा हि ॥ सर्वश्चात्मवर्गहितमिच्छति ॥ अतश्चारुता स्त्रीत्वात्स्त्रीणामुपचकार ॥ मधुमद
स्तु पुंस्त्वात्पुंसामिति युक्तमित्यर्थः ॥ अत्र विकृतान्यभिमताः ॥ कुपितास्त्रियपि वश्या इति विरोधस्य चारुतामदाभ्यां साधनात् ॥ उभयथापि विरोधाभासो भवन् ॥

कि·टी·
से·स·९
२२
103

वाससामिति॥ उपनामिनाभिसमीपे वाससां शिथिलत्वं॥ ह्रीनिरासं लज्जात्यागं अपदे कुपितानि॥ अस्थानकोपो ऽत्र गुणापले गुणाकोटौ विरुधती निवेशयंती॥ दोषान् प्यत्तान गुणीकुर्वीत्यर्थः॥ मदिरायो षितांवचनीयं॥ नतानिंदनीयं येहतिति॥ शास्त्रनिषिद्धाचरणांनिंदा निर्ममार्जे तथा दोषाणामपि वस्त्रशैथल्यानां तदानीं गुणात्वा न्नकथितव्यवनीयावकाशइत्यर्थः॥६५॥ भर्तर्यिति॥ उपसारि सखीसमक्षं समीपार्थेव्ययीभावः॥ आक्षेपोनयेनानुमितिविकल्पानुभावः॥ कुतः मधुमदेनोद्य मितानां प्रेरितानां न नु स्वेच्छयेतिभावः॥ वनितानामनुरक्तस्त्रीणां वनितानजनितात्यर्थानुरागायांचयोषिती विग्रहः॥ हृदयेषु विफलया अनुचिता चरणा

वाससांशिथिलतामुपनाभिह्रीनिरासमपदे कुपितानि॥ योषितांदधतीगुणपक्षे निर्ममार्जमदिरावचनीयम्॥६६॥ भर्तृषूपसखिनिक्षिपतीनामात्मनोमधुमदोद्यमितानां॥ व्रीडयाविफलयावनितानांनास्थितंनविगतंहृदयेषु॥६७॥ रुंधतीनयनवाक्यविकाशंसादितोभयकरापरिरंभे॥ व्रीडितस्यललितंयुवतीनांक्षीबताबहुगुणैरनुजह्रे॥६८॥

रितिभावः॥ व्रीडयानस्थितं न विगतं॥ वैफल्यात्तत्सम्मदोपाधिकत्वाद्वितिभावः॥ अतएवनोभयनिषेधविरोधः॥६६॥ रुंधतीति॥ नयनानांवाक्यानां च विकाशंप्राकट्यंरुंधती प्रतिवध्नती तथापरिरंभे॥ आलिंगनेसादितौ स्तंभितावुभौकरौ ययासा युवतीनांसंबंधिनी क्षीवता॥ बहुगुणवचनस्य पुंव द्भावो वक्तव्यात्॥ बहुगुणैर्दृष्टिसंकोचादिभिर्व्रीडितस्य व्रीडयाभावेक्तः॥ ललितं विलासं अनुजह्रे अनुचकार॥ कर्तरिलिट्॥ व्रीडाका र्यकारकत्वात्॥ व्रीडानुकरणमिति उपमालंकारः॥६७॥ योषिदिति॥ उद्धतः उत्कटो मनोभवेन यायोरागः सः यस्याः॥ सा योषित्मानवत्प

२२३

पिदयितस्यांकयोः॥ यतोमानाद्रागोवलीयानितिभावः॥ लाघवदोषंपरिहरति॥ कारयतीति॥ अनिभृताचपलानकार्य्यकारिणीत्यर्थः॥ वारु
णीमदिरागुणेषु दोषेषुचविषये सर्वोद्वद्वाविभाषयेवपष्टद्भवति॥ रहस्यविभेदं रहस्यभंगंकारयती खलुवलान्निगूहतावपि गुणदोषौप्रकाश
यतीत्यर्थः॥ यतोनिगूहरागप्रगटनं प्रगटमानन्यागश्च मतायानलाघवमाहरति॥ अवुद्धपूर्वकत्वादितिभावः॥६८॥ आहितेति॥ मधुना मद्येन
चेष्टितस्यव्यापारस्यमधुरत्वेआहितेनु॥ प्रागसत्येव मनोहरत्वे संपत्युत्पादितेव विकाशंगमितेनु प्रागसत्येवमाधुर्य्यप्रकर्षप्रापितेव॥ उद्भूत

योषिदुद्भूतमनोभवरागामानवतापिययोदयितांकं॥ कारयत्यनिभृतागुणदोषवारुणीखलुरहस्यविभेदं॥६८॥
आहितेनमधुनामधुरत्वेचेष्टितस्यगमितेनुविकाशं॥ आवभौनवइवोद्भतरागःकामिनीष्ववसरःकुसुमेषोः॥६९॥
मागमन्मदविमूढधियोनःप्रोह्यरंतुमितिशंकितनाथाः॥ योषितानमदिराशशामीयुःप्रेमपश्यतिभयान्यपदेपि

रागउत्कटरागः॥ अतएवकुसुमेषोः॥ कामिनीष्ववसरः प्रवेशानवइवबभौ नित्यसन्निहितोपिमदनः॥ कामिनीषुमदकृताकालिकचेष्टामा
धुर्य्यात्॥ रागाद्रेकेसत्यपूर्वो उद्दीपनमितिभावः॥ संधायोनुप्राणितेयमुत्प्रेक्षा॥६९॥ मागमन्निति॥ शंकितनाथा अविश्वस्तपुरुषाः योषितोम
देन मदिरांममसमीयु विमूढधियः॥ ध्वस्तबुद्धीर्नोस्मान्प्रोह्य विसृज्य॥ प्रपूर्वादुज्झतेःसमासेनञ्पूर्वेकोल्यप्॥ रंतुंमागमन् नगच्छतीति मनीष

कि॰टी॰
वं॰ स॰ ९
२२
104

चित्तेति॥ चित्तस्य निर्दृत्तिविधायि सुखं विविक्तं रहः॥ विविक्तं रहसि स्मृतमित्यमरः॥ मन्मथो मधुमदो मद्यमदः शशिभासः॥ चन्द्रकिरणाः॥ संदयितेः॥ सं
गमाश्च सहधा ध्रनेति निपातनात्॥ सहभावस्य प्रयोगेपि सहार्थे तृतीया॥ एतानि प्रमदानां प्रेमवियोगासहत्वावस्थासंभोगं कामपि भुवं कां च दशां नयं
ति स्म॥ रत्यावस्थामप्यतिक्रम्य शृंगारावस्थायां क्रीडामपि नित्युरित्यर्थः॥ प्रेमाभिलाषो रागश्च स्नेह प्रेमरतिस्तथा शृंगारश्चेति संभोगः॥ सुप्तावस्था प्र
कीर्तिता श्रुतं रसाकरे॥ प्रेमादिह लक्ष्मेव तच्चित्ताप्याभिलाषुकः॥ रागस्तु संगबुद्धिः स्यात्स्नेहस्तत्प्रवणक्रिया॥ तद्वियोगासहं प्रेम रतिस्तत्सहवर्तनं

चित्तनिर्वृत्तिविधायि विविक्तं मन्मथो मधुमदः शशिभासः॥ संगमश्च दयितैः स्म नयन्ति प्रेम कामपि भुवं प्रमदानां॥ ७१॥
धार्ष्ट्यलंघितयथोचितभूमौ निर्दयं विलुलितालकमाल्ये॥ मानिनीरतिविधौ कुसुमेषुर्मत्तमत्त इव विभ्रममाप॥ ७२॥
सीधुपानविधुरेषु वधूनां निघ्नतामुपगतेषु वयस्सु॥ इहितं रतिरसाहितभावं वीतलक्ष्यमपि कामिषु रेजे॥ ७३॥

शृंगारस्तत्समं क्रीडा संभोगः सप्तधा क्रमात्॥ इति॥ ७१॥ क्रीडावस्थामाह॥ धार्ष्ट्येति॥ धार्ष्ट्येन लंघिता भूमिर्मर्यादा यस्मिंस्तथोक्ते॥ चुंबनताडनमणित
सीत्कारपुरुषायितादौ स्वयमुक्तं खलमिति भावः॥ निर्दयं यथा तथा विलुलितान्याकर्षणाकुलितान्यलकमाल्यानि यस्मिन्मानिनीरतिविधौ सुरते
कुसुमेषुर्मत्तो मत्तो मत्तप्रकार इव विभ्रमं विसर्जं क्षणमाप॥ मत्तः किं न करोतीति भावः॥ कारयन्तकर्तृत्वोपचारादियमुत्प्रेक्षा॥ ७२॥ सीधुपानेति॥
सीधुपानेन मद्यपानेन विधुरेषु विकलेषु॥ अत एव वशेषु॥ निघ्नतां प्रियपराधीनत्वमुपगतेषु सत्सु॥ अधीनो निघ्न आयत्त इत्यमरः॥ वधूनां वधुसंबंधि

निरतिरसे स्वसुरतरसास्वादे व्याहितभावं दत्तचित्तं कामिषु विषयेषु इहितं चुंबनताडनादिचेष्टितं ॥ चीतलस्पे निर्विषयं अस्थानकृतमपीत्यर्थः ॥ रेजे रागिरंगास्खलित
मयि शोभत ॥ इतियावत् ॥ ७३ ॥ अन्योन्येति ॥ अथ हरीसखा इंद्रस[illegible]चैवा गंधर्वाल्लेषामप्सरसां चान्योन्यरक्तमनसां परस्परानुरक्तचित्तानां चेतोभुवो निर्देशमाज्ञां वि
भ्रतीनां स्मरविधेयानां सुरतमारणात्खेदेनसर्वः ॥ षष्ठी चानादरे इति षष्ठी विरोधो विशेषणं शिल्पमेषां ते वैबोधकाः वैतालिकाः ॥ ताच्छील्यमिति टञ् ॥ ते बांध्वनिभिः मं
गलस्वैर्विभाविता विहितपश्चिमार्द्धचरमभागायस्यासात योत्कारस्त्रिः ॥ संहता अभितिश्चनुमेता ॥ सुखिनाम्भयानपि कालो लघीयानिविभवतीति भावः ॥ परि

अन्योन्यरक्तमनसामथ विभ्रतीनां चेतोभवो हरिसखाप्सरसां निदेशं ॥ वैबोधिकध्वनिविभावितपश्चिमार्द्धा सा संहतेव परि
हृत्रिमियाय रात्रिः ॥ ७४ ॥ निद्राविनोदितनितांतरतिक्लमानामायामिमंगलनिनादविबोधितानां ॥ रामासु भाविविरहाकु
लितासु यूनां तत्पूर्वतामिव समादधिरे रतानि ॥ ७५ ॥ हृत्रिं विहृत्तिमयाय प्रभातकल्पाभूदित्यर्थः ॥ ७४ ॥ निद्रेति ॥ निद्रया विनोदितोपनी
तो नितांतयारस्याः क्लमः सर्येत्तेषां ॥ आयामिभिरायामवद्भिः दीर्घैर्मंगलनिनादैर्वैबोधिकध्वनिभिः ॥ विबोधितानां यूनां रामासु भाविविरहेणाकुलता
सु सतीषु ॥ अतएव रतानि तत्सेव पूर्वाणि तत्पूर्वाणि तेषां भावस्तत्पूर्वतां रामाः दधिरे इव प्रापुरित्युत्प्रेक्षा ॥ आद्यसुरतवदादरात्प्रवर्तितानीत्यर्थः ॥ यदुक्तं रका
लदुर्लभं नंदंति हि मन्मथाः प्रपत्तं इत्यर्थः ॥ ७५ ॥ कांतेति ॥ सुरतखेदेन निमीलितानि पत्नीणि येन तं कांताजनं संवाहितुं सेवितुमिव खेदापनोदार्थं अं
गमर्दनं कर्तुमिवेत्यर्थः ॥ संवाहनं वाहनेपि भावादेरंगमर्दन इति विश्वः ॥ वाहय प्रयत्ने इति धातो राणपंतात् तुमुन् ॥ अन्यथा संवाहयितुमिति णिच् ग्रह

105

रागस्यात्मंदंमंदप्रकारं॥प्रकारगुणवचनस्येतिद्विर्भावः॥कर्मधारयवद्भावात्सुंलोपः॥समुपयान् संवाहन्रजनीपरिहृत्तिवायुः॥निशावसानमरुत्तहर्म्येषुमाल्या
निमदिरापरिभोगोविमर्दश्चतेषांगंधान्॥आविष्कारवहिः॥प्रसर्पयामासेत्यर्थः॥अत्रसंवाहित्तुमिवेत्युत्प्रेक्षा॥माद्यगुणमाल्पत्वाद्गुणनिमित्तक्रियाफ
लोत्प्रेक्षा॥७६॥ आमोदइति॥ आमोदेन मधगंधेनवासिता सुरभिताश्चलात्दष्टमुक्तत्वात्स्फुरंतोधरपल्लवायेषुतेषुकषायवस्तुवेन स्त्रीनिर्यासेरंजकादि
नि सुरतएवाभावपटारक्तेमधुरेवेत्केशवः॥ आमृष्टानि प्रमृष्टानि पत्राणितिलकाश्चयेषांतेषु विलासिनीनां वदनेषु मदस्यशेषोमदादेशः शोभांव
वंध मंडनोनांतरायायेमदशेषएवमंडनंवभूवेत्यर्थः॥स्त्रीणामदएवभूषणमितिभावः॥७७॥ गतवतीति॥ अंगरागेनखरेखासुनखपदेषुवलस्पतांद

आमोदवासितचलाधरपल्लवेषुनिद्राकषायितविपाटललोचनेषु॥आमृष्टपत्रतिलकेषुविलासिनीनांशोभांववंध
वदनेषुमदस्यशेषः॥७७॥गतवतिनखरेखालक्ष्यतामंगरागेसमदयितनयीताताम्रविंवाधराणां॥विरहविधुरमिष्टा
सत्सखीवांगनानांहृदयमवललंवेरात्रिसंभोगलक्ष्मी॥७८॥

दयतां गतवतिसति विमर्दविशेषेसत्तीत्यर्थः॥ किंचविंवतुल्याअधराविंवाधराः शाकपार्थिवत्वादित्वान्मध्यमपदलोपोपि समानाधिकरणसमास इतिवा
मनः॥समदैः दयितैः पीडिताः॥अतएवातिपीडनादाताम्राः समंतादक्ताः॥विंवाधराःयासांतासां अंगनानां संवंधविरहेणाढ्केन वियोगेन विधुरंवि
हूलं हृदयं रात्रिसंभोगलक्ष्मीः नखपदादिशोभेत्यर्थः॥इष्टाप्राज्ञासत्सखीव निपुणसहचरीवाललंवे धारयामास प्रियोपभोगविहूशोभा अवलोक
नलालसा॥कथंचिद्विरहमसहिष्णुरित्यर्थः॥आनीपोर्णापमा मालिनीवृत्तं॥७८॥ इतिश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायांकिरातार्जु

किरातस्य दशमः सर्गः पत्रसंख्या १५

१०

॥कि॥का॥टी॥
धं॥स॥१२

॥१॥

106

उश्रीगणेशायनमः॥ अथागंतुकसहजशोभासंपन्नतयासमग्रसाधनाः॥स्त्रियोमुनिमनःप्रलोभनार्थंप्रस्थान्निमाह॥ अथेति॥ अथप्रभातेपरिमलजांसंभोग संभूतांशोभामवाप्य॥संभोगःस्यात्परिमलइतिवैजयंती॥संभागात्स्त्रियःशोभंतइतिघटापथः॥एतेनागंतुकशोभासंपत्तिरुक्ता॥अतएवसुरतादिवर्णनस्यप्रस्तुतो पयोगित्वंचोक्तं॥अथसहजशोभासंपत्तिमाह॥अवयवैःदीपितामंडिता मंडनश्रीप्रसाधनशोभायाभिस्ताः॥रम्भहावाः मनोहरविलासः॥याःस्त्रियवसतिंशिविरंअ भिविहाय॥सुरपतिसूनोरर्जुनस्यविलोभनायजग्मुः॥अवयवदीपनतयाप्रसिद्धस्यमंडनस्यनद्दीप्यत्वासंबंधेपिसंबंधाभिधानादवयवसौंदर्यातिशयद्योत

अथपरिमलजामवाप्यलक्ष्मीमवयवदीपितमंडनश्रियस्ताः॥वसतिमभिविहायरम्यहावाःसुरपतिसूनुप्रलोभनायजग्मुः॥१॥

द्रुतपदमभियातुमिछतीनांगगनपरिक्रमलाघवेनतासां॥अवनिषुचरणैःपृथुस्तनीनामलघुनितंबतयाचिरंनिषेदे॥२॥

निहितसरसयावकैर्बभासेचरणतलैःकृतपद्धतिर्वधूनां॥अविरलविततेवशक्रगोपैररुणितनीलतृणोपलाधरित्री॥३॥

नार्थस्येत्वाद्दतिशयोक्तिरलंकारः॥अस्मिन्सर्गेपुष्पिताग्रावृत्तं॥अयुजिनयुगरेफतोयकारोयुजिचनजौजरगाश्चपुष्पिताग्राइतिलक्षणात्॥१॥ द्रुतेति॥ गगनपरिक्रमलाघवेन गगनगमनवेगेनद्रुतपदंयथातथा॥अभियातुंइछतीनां किंचपृथुस्तनीनां तासामप्सरसांचरणैरलघुनितंबतया अवनिषु चिरंनिषेदे तस्थे॥अभ्यासपाटवेन मनसा रमाणामपितासांस्तनजघनभाराच्चरणानोत्तस्थुरिति॥२॥ निहितेति॥ निहितान्यस्ताः॥सरसयावकाः॥सार्द्र लाक्षारागाःयेषुतैर्वधूनांचरणतलैः कृतपद्धतिः॥कृतरेखा॥अतएवारुणिता अरुणीकृताः नीलास्तृणोपला॥तृणानितद्वारीनिडलयाः॥वल्वजाएवा तृणविशेषाआश्रयासांता॥उलपावल्वजाप्रोक्ताइतिहलायुधः॥उलतपाः उशीरस्तृणानीतिक्षीरस्वामी॥ब्राह्मणपरिव्राजकवदुपलानांपृथक्निर्देशः॥धरित्रीति

दृशोगोपरिद्रुणपायैः क्षीरकैरविरलंनिरंतरंयथातथा विततास्या
ग्रैवेसुसेला वभास॥३॥

२६

ध्वनिरिति॥ अगविवरेषु नगरंध्रेषु गुहास्वित्यर्थः॥ प्रतिरवैः प्रतिध्वनिभिः॥ विततः संमूर्छितः॥ पृथुभिरसनागुणानां संजितैः॥ स्वनितैरनुयातोनुगतो मिलित इत्यर्थः॥ स्वनितेवस्त्रपर्णानां भूषणानां तु संजितमित्यमरः॥ नूपुराणां ध्वनिः॥ वनिर्नीति मुखराः शब्दायमानाः॥ समुत्सुका उत्कंठिताश्च हंसाः सारसाश्च येषां तानि चक्रे॥ अत्र हंसादि मुखरसमुत्सुकीकरणरूपेणावस्तुनानेयां मयूरादिध्वानौ साहश्याद्वंशानरक्तूजितत्वंतिमतीनेः भ्रांतिमदालंकारो व्यज्यते॥४॥ अवचयेति॥ अवचयः पुष्पादिच्छेदनं परीभोगः उपभोगः॥ नहंति हिंसाः घानुकाः व्याघ्रादयः॥ शरारुर्घातुको हिंस्र इत्यमरः॥ तैः सहचरितानि॥ सहचरितकर्त्तरि क्तः॥ मतिबुद्धीत्यादिना सूत्रे चकारात् सुप्तशायितादि

ध्वनिरगविवरेषु नूपुराणां पृथुरसनागुणसिंजितानुयातः॥ प्रतिरवविततो वनानि चक्रे मुखरसमुत्सुकहंससारसानि॥४॥
अवचयपरिभोगवंति हिंस्रैः सहचरितान्यमृगाणि काननानि॥ अभिदधुरभितो मुनिं वधूभ्यः समुदितसाध्वसविक्लवं च चेतः॥५॥
नृपतिमुनिपरिग्रहेण सा भूः सुरसचिवाप्सरसां जहार तेजः॥ उपहितपरमप्रभावधाम्नां न हि जयिनां तपसामलंघ्यमस्ति॥६॥

तद्वर्त्तमानार्थतया॥ अन्ये हिंस्रेतरे मृगाः हरिणादयो येषु तानि सहचरितान्यमृगाणि काननानि तथा समुदितेन साध्वसेन विक्लवं विवशं चेतश्च वधूभ्यः क्रियाग्रहणमपि कर्त्तव्यमिति संप्रदानत्वाच्चतुर्थी॥ अभितो मुनिमभिदधुः सूचयामासुरित्यर्थः॥ उपचयादिलिंगचतुष्टयेनासन्नो मुनिरनुमीयत इत्यर्थः॥५॥
नृपतिरिति॥ नृपतिरेव मुनिस्तस्य परिग्रहेणाविश्रुतेन हेतुना सुरसचिवानां गंधर्वाणामप्सरसां च तेजो जहार॥ तदाप्रवेशादेव निस्तेजस्का अभूवन्नित्यर्थः॥ कथं मानुषेण मानुषं तेजो निरस्तमिति वाच्या॥ हियस्मात्॥ उपहितेत्याहिते प्रभाव धाम्नि सामर्थ्यतेजसी यैस्तेषां जयीनां जयनशीलानां महतामिति पाठे महतानामुत्कटानामलंघ्यं असाध्यं नास्ति स च किंत मि

साचकितेति ॥ विस्मयाकुलाभिरलाभिः स्त्रीभिः शुचयः सिकताः यासु तासु पदरेखाभिव्यक्तियोग्यास्विन्यर्थः ॥ तितिषु उपहितानि न्यस्तानि केनुरथांगलांछना
निरेखा विरूपध्वजचक्राणि पवचिह्नानि ये मुतानि अत एवातिमानुषाणि ॥ जिह्मैः पदानि सचाकितामिव सभयामिव ददृशिरे ॥ दृष्टानि ॥ अद्भुतवस्तुदर्श
नाद्भयविस्मयो भवत इति भावः ॥ ७ ॥ अतिशायितेनेति ॥ अतिशायिता अतिक्रांता वनांतराणां श्रुतिर्याभिस्तासां ॥ कुतः फलानां कुसुमानां चापचये पि
लवने पि सैव विधाः आकाराः यासां ताः ॥ तद्विधानां तथैव समग्राणामित्यर्थः ॥ तरूणां वीरुधां च समृद्ध्या लिंगेन युवतिजनैर्मुनिप्रभावो ऋतुरिव

सचाकितमिवविस्मयाकुलाभिः शुचिसिकतास्वतिमानुषाणितामिः ॥ तितिषु ददृशिरे पदानि जिह्मैरुपहितकेतुरथांगलांछनानि ॥ ७ ॥ अतिशयितवनांतरद्युतीनां फलकुसुमावचयेपि तद्विधानां ॥ ऋतुरिव तरुवीरुधां समृद्ध्या युवतिजनैर्जगृहे मुनिप्रभावः ॥ ८ ॥ मृदितकिशलयः सुरांगनानां सलिलवल्कलभारभुग्नशाखः ॥ वहुमतिमधिकां ययावशोकः परिजनतापि गुणाय सद्गुणानां ॥ ९ ॥

जगृहे ॥ निश्चितः ॥ कारणांतरेयेति शेषः ॥ ८ ॥ मृदितेति ॥ सलिलमार्द्रं यद्वल्कलं तदेव भारः तेन भुग्नशाखः ॥ नम्रशाखः ॥ अत एव मृदितकिशलयः विलुलितपल्लवः ॥ क्वचिच्चेति प्रतिषेधान्न
मार्दवगुणः ॥ अशोको वृक्षविशेषः ॥ सुरांगनानां अप्सरसां संबंधिनीमधिकां बहुमतिं सत्कृतं सेवी धन्योऽस्मीति ॥ ननु सेवकेषु का
श्लाघ्यतेऽत्राह ॥ सद्गुणानां परिजनतापि गुणाय उत्कर्षाय भवतीति भावः ॥ एतेन तासां मुनेः ॥ अभावदर्शनादेव तत्पारवश्यं गम्यते ॥ ९ ॥ राम ॥

यमेति॥ यमः देशकालाद्यनपेक्षया शुद्धिहेतुरहिंसादिः॥ नियमस्तदपेक्षया शुद्धिहेतुस्तपः स्वाध्यायादिस्ताभ्यां कृशीकृतान्यपि स्थिराणि दृढानि अंगानि यस्य सः॥ विधृतायुधः॥ अत एव तपः॥ ताभ्यां युक्तः॥ सोऽर्जुनः शमः शांतिरभ्युदयकांडे दीप्तता उग्रता॥ अभिचारकांडे॥ ताभ्यां अनुपमाभ्यां गरीयान्॥ उग्रः अथर्वणा वशिष्ठेन कृता रचिता पदानां पंक्तिरानुपूर्वी यस्य स वेदः॥ चतुर्थवेद इत्यर्थः॥ अथर्वणस्त्वाप्युद्ग्रो वशिष्ठकृत इत्यागमः॥ सदृशस्ताभिः परिदृष्टो दृष्टः॥ १॥ अथ चतुर्भिस्तमेव विशिनष्टि॥ शशधरेति॥ शशधर चन्द्र इव लोचनाभिरामैः गगने विसारिभिः॥ अंशुभिः परीतः व्याप्तः॥ अंव

यमनियमकृशीकृतास्थिरांगः परिददृशे विधृतायुधः स ताभिः॥ अनुपमशमदीप्तितागरीयान्कृतपदपंक्तिरथर्व
णेव वेदः॥ १॥ शशधर इव लोचनाभिरामैर्गगनविसारिभिरंशुभिः परीतः॥ शिखरनिचयमेकसानुसद्मा सकल
मिवापि दधन्महीधरस्य॥ २॥ सुरसरिति परं तपोऽधिगच्छन्विधृतपिशंगबृहज्जटाकलापः॥ हविरिव विततः शिखास
मूहैः समभिलषन्नुपवेदि जातवेदाः॥ ३॥

रवदेकं सानु सद्म यस्य सः॥ एकदेशस्थोऽपीत्यर्थः॥ महीधरस्येंद्रकीलस्य सकलं शिखरनिचयं अपि दधत् दातृत्वान्निवेशयन्नेता॥ २॥ सुरेति॥ पुनः सुरसरिति गंगाकूले परं तपोऽधिगच्छन् अर्जयन्॥ फलाभिलाषैर्गतिघोषः॥ हविरभिलषन्निन्युपमानविशेषणसामर्थ्यात्॥ तथा विधृतः॥ पिशंगबृहन् जटाकलापो येन सः॥ अत एव उपवेदि वेद्यां विभक्त्यर्थेऽव्ययीभावः॥ शिखासमूहैः ज्वालाजालैर्विततः॥ हविराज्यादिकं समभिलषन्॥ जातवेदा हिरण्यं यस्मादिति जातवेदाः वह्निरिवास्थित॥ ३॥

सदृशमिति॥ पुनः आकृतेः वपुषः आकृतिः कथिता रूपेसामान्यवपुषोरपीति विश्वः॥ सदृशमतनुं महान्तं प्रयत्नं उद्योगं दधत॥ तथा तदनुगुणां प्रयत्नानुगुणां अपरैरन्यैः अलंघ्यां कर्त्तुमशक्यामित्यर्थः॥ क्रियां व्यापारं दधत॥ तथा क्रियानुरूपमलघु बहुतपो दधत॥ अत्र पूर्वं प्रस्तुतस्य विशेषणतया स्थापनात् प्रथमैकावल्यलंकारः॥ तथा विजयवतीं सर्वोत्कर्षवतीं विजयफलां वा तपः॥ समां तपोनुरूपां समृद्धिं ऐश्वर्यं दधत॥ अत्र पूर्वं प्रस्तुतस्य विशेषणतया स्थापनात् प्रथमैकावल्यलंकारः॥ यथापूर्वं परस्परविशेषणतया स्थापने एकावलीति सर्वस्वसूत्रात॥२३॥ चिरेति॥ पुनश्च चिरनि

सदृशमतनुमाकृतेः प्रयत्नं तदनुगुणमपरैः क्रियामलंघ्यां॥ दधदलघु तपः क्रियानुरूपं विजयवतीं च तपःसमां समृद्धिं॥२३॥ चिरनियमकृशोपि शैलसारः शमनिरतोपि दुरासदः प्रकृत्या॥ ससचिव इव निर्जनेपि तिष्ठन् मुनिरपि तुल्यरुचिस्त्रिलोकभर्त्तुः॥२४॥

यमेन दीर्घकालतपसा कृशः॥ शैलसारः शैलोपि शैलसारः॥ उपमानपूर्वपदो बहुव्रीहिः॥ शमनिरतोपि प्रकृत्या दुरासदः॥ दुर्द्धर्षः॥ निर्जने विजने देशे तिष्ठन्नपि ससचिव सपरिवार इव॥ किंच मुनिरप्यैश्वर्यरहितोपीत्यर्थः॥ त्रयाणां लोकानां भर्त्तुस्त्रिलोकभर्त्तुरिन्द्रस्य॥ तद्धितार्थेत्यादिना उत्तरपदसमासः॥ तुल्यरुचिः॥ समानतेजा अपि शक्रः॥ सर्वत्र विरोधद्योतनार्थः॥ स च मुनेरधिकमहिमत्वेन निरस्तः इति विरोधालंकारः॥ विरोधाभासत्वं विरोध इति सूत्रात॥२४॥ रामजी सहायजी ॥॥

कुलकं॥ तनुरिति॥ अवजिते तिरस्कृते लोकानां सारधाम्नी सत्वतेजसी ययातां॥ अत उपधेत्यादिना ङीप्॥ त्रयाणां भुवनानां समाहारस्त्रिभुवनं॥ तद्धितार्थेत्यादिना
समाहारार्थे तत्पुरुषः॥ पात्राद्यन्तत्वात्स्त्रीत्वप्रतिषेधः॥ तस्य गुप्तौ रक्षणे सहां समर्थां पचाद्यच्॥ तनुं मूर्तिं विलोकयंत्यः॥ अमरस्त्रियः॥ जयफले जयार्थे तपोधि
कारे तपोनुष्ठाने॥ अस्यार्जुनस्य॥ यत्नं विफलं अवययुः मेनिरे॥ त्रैलोक्याधिपत्यादिमहाफलसाधने समर्थस्य तुच्छफलाभिलाषो मत्तमातंगमांसभोगो वि
तस्य॥ कंठीरवस्य॥ जीर्णतृणचर्वणोत्कंठेन शोभां वहतीति भावः॥ अत्र विशिष्टतनुविलोकनस्य स्त्रीविशेषणा वैफल्यजननहेतुत्वोक्त्या पदार्थहेतुकं॥

तनुमवजितलोकसारधाम्नीं त्रिभुवनगुप्तिसहां विलोकयंत्यः॥ अवययुरमरस्त्रियोस्य यत्नं विजयफले विफलं तपो
धिकारे॥२५॥ मुनिदनुजतनयान्विलोभ्य सद्यः प्रतनुबलान्यधितिष्ठतस्तपांसि॥ अलघुनि बहु मेनिरे च ताः स्वं कुलिश
भृता विहितं पदे नियोगं॥२६

काव्यलिंगमलंकारः॥२५॥ मुनीति॥ प्रतनुबलानि उत्कृष्टसाराणि तपांसि अधितिष्ठतः॥ अनुतिष्ठतः॥
मुनीन् दनुतनयान् दानवांश्च सद्यः॥ तत्क्षणमेव विलोभ्याऽऽकृष्य चिरान्कुलिशभृता शक्रेण॥ अलघुनि पदे स्थाने विहितं दत्तं स्वं स्वकीयं
नियोगमधिकारं ताः स्त्रियः बहु यथा तथा मेनिरे॥ निकृष्टपदहर्त्रीणां उत्कृष्टपदलाभो महद्बहुमानमूलमिति भावः॥ विलोभ्य मेनिरे इत्यन्वयः॥
यद्वा विलोभ्य विलोभनं कारयित्वा शक्रेणेति॥ अयेति॥ कृत्वा विलोभनं कृत्रिमरंजनं॥ विधित्सो विधातुमिच्छावति॥ विपूर्वाद्धातोः सनंतादुः॥

109

न्यः॥युवतिजने हरिसूनोरर्जुनस्य दर्शनेन चित्तजन्मा कामः॥प्रसभं बलात् इव ततार॥दैवात्परं वंचयितुमागतस्य मोहो भवति यत्स्वयं मुनिं वंचन
प्रवृत्ताः स्त्रियः॥तेन वंचिता इत्याशयः॥ह्रियस्मान्मधुरा मनोहरा यौवनश्रीः॥मनोहरतिवला दिति शेषः॥२७॥सपदीति॥सपदि वधूनां निदेशात्
ध्वनिताः॥मनोहरवल्लकाः॥वीणाः मृदंगाये स्तैः हरिसखैः॥गंधर्वैः वियति वने च॥युगपदृतुगणस्य॥ऋतुषट्कस्य संनिधानमाविर्भावं यथायथं
यथास्वं॥असंस्कारेत्यर्थः॥यथास्वेति यथायथमिति निपातः॥वितेने॥वितस्तरे॥उद्दीपनसामग्रीसंपादितेत्यर्थः॥२८॥वर्षीपक्रमेणाक्रतून्वर्णय

अथ कृतकविलोभनं विधित्सौ युवतिजने हरिसूनुदर्शनेन॥प्रसभमवततार चित्तजन्मा हरति मनो मधुरा हि यौवन
श्रीः॥२७॥सपदि हरिसखैर्वधूनिदेशाद्ध्वनितमनोहरवल्लकीमृदंगैः॥युगपदृतुगणस्य संनिधानं वियति वने च
यथायथं वितेने॥२८॥सजलजलधरं नभो विरेजे विवृतिमियाय रुचिस्तडिल्लतानां॥व्यवहितरतिविग्रहैर्वितेने ज
लगुरुभिः स्तनितैर्दिगंतरेषु॥२९॥

ति॥सजलेति॥सजलाः॥जलधराः यस्मिन् तत्तन्नभः॥विरेजे॥तडितः लताश्च ता सां रुचिः॥प्रभा वि
वृतिं विजृंभणामियाय प्राप॥दिगंतरेषु॥वितेने॥विततेः अभावि भावे लिट्॥अकर्मकत्वं तु वैवक्षितं॥अत एव दिगंतरेष्वित्यधिकरणप्रयोगः॥
अन्यथा कर्मत्वमेव स्यात्॥२९॥परीति॥परि सुरपतिसूनुधाम्ना इत्यर्थः॥सद्यः मालतीनां जातिलतानां॥सुमना मालती जाती त्यमरः॥सुकु
लानि समुपदधत्॥जनयन्॥विरलं यथा तथा वकुविंदुः॥अपां निपातः वृष्टिः॥अवने संबंधनी॥सरजस्त्वी॥सरजस्कत्वं॥अवतु रादिस्

यथा व्यवहितरतिविग्रहै — दूरीकृतरतिप्रकाल्यत प्रणयकलहैः जलगुरुभिः जलभाराद्गुरुभी रैरित्यर्थः स्तनितैः गर्जितैः

वेरगसाकल्यार्थेऽव्ययीभावः॥अभूतसमासोत्तनियातः॥नष्टिः॥अवहुत्रीह्यर्थसुलस्पते॥अव्ययीभावदर्शनंतु प्रायिकत्वमिति केचित्॥अपजहार॥धूलिंश
मयामासेत्यर्थः॥२०॥ प्रतीति॥दिशिदिशिप्रतिदिशं यथार्थेऽव्ययीभावः॥शरत्प्रभृतित्वात्समासांतः॥अधिगच्छता संवाता ककुभान्यर्जुनेकुसुमा
नि॥इंद्रद्रुःककुभोर्जुन इत्यमरः॥नेयां विकाशेन सुगंधिना मनोज्ञ गंधिना गंधस्येतदेकांतग्रहणंप्रायिकं॥अनिलेन अभिमृष्टः॥अतएव
साचित्तजन्मा कामाक्रांतइत्यर्थः॥अतएवगतधृतिः॥विगतधैर्यः॥आकुलितः॥क्षोभितश्च रतिंप्रतीति शेषः॥एवंभूतःजीवलोकः॥नव

परिसुरपतिसूनूधामसघः समुपदधन्मुकुलानिमालतीनां॥विरलमपजहारवद्धविंदुःसरजसतामवनेरपां
निपातः॥२०॥प्रतिदिशमभिगच्छताभिमृष्टः ककुभविकाशसुगंधिनानिलेन॥नवइवविभवौसचित्तजन्मागत
धृतिराकुलितश्च जीवलोकः॥२१॥व्यथितमपिमनोहरंतीपरिणतजंबुफलोपभोगहृष्टा॥परभृतयुवतिःस्व

रवअवस्थांतरप्राप्त्याअपूर्वइवविभो इत्युत्प्रेक्षा॥२१॥ व्यथितेति॥व्यथितंदुःखितमपिमनभृशंहरंती॥किमुतसुखिनामितिभावः॥जंबाः॥
विकारफलंजंबूः॥वार्हतंच फलेजंबवाजंबूस्त्रीजंबुजांबवमित्यमरः॥जंबावेतियुक्॥तद्धितलुकीतिह्रस्वः॥जंबूवत्फलंचसामान्यविशेषयोःस
हनिर्देशः॥यद्वाजंबाफलमितिविग्रहः॥इकोह्रस्वोऽङ्योगालवस्येतिह्रस्वः॥नस्यपरिणतस्य उपभोगेनहृष्टा॥अतएवपरभृतयुतिः॥कोकिलांग
नानवनवंनवप्रकारं यथातथायोजितेन संपादितेन कंठरागेण कंठमाधुर्येणारम्य॥सौम्यइत्यर्थः॥स्वनंवितेने॥वर्षास्वपिमधुराः॥कोकिलाला

अभीति॥ कदंबवायौ कदंबसंबंधिनि मारुते मदमधुरे शिखंडिनां निनादे॥ च मन अभिभवति सति॥ जिष्णुः॥ जयशीलो अर्जुनः॥ जन इव पृथुकजन इव
धृतेः॥ धैर्यान्न चचाल यथापि न दुहीपनाय न शेकुरित्यर्थः॥ हि यस्मान्महतां समाधिभंगः॥ सुकरोन केनापि कर्तुं न शक्यत इत्यर्थः॥२३॥ धृतेति
विसानि वलयानि वनेषामावली धृता ययासा कुमुद्वनमेकमुखंडकूलमिव तद्दहंती॥ आत्तानि वाणानि नीली झिंटी कुसुमानि यया
सा कुमुद्वनमेकमुखंडकूलमिव तद्दहंती आत्तवाणा धृतझिंटी कुसुमा धृताशराच॥ गृहीयान्हात्रियाशरामितिस्मरणात्॥ वाणाङ्कानि

अभिभवति मनः कदंबवायौ मधुमधुरे च शिखंडिनां निनादे॥ जन इव न धृतेश्चचाल जिष्णुर्नहि महतां सुकरः समा
धिभंगः॥२३॥ धृतविसवलयावलिर्वहंती कुमुद्वनैकदुकूलमात्तवाणा॥ शरदमलतले सरोजपाणौ घनसम
येन वधूरिवाललंबे॥२४॥ समदशिखिरुतानि हंसनादैः कुमुद्वनानि कदंबपुष्पवृष्ट्या॥ श्रियमतिशयिनीं समेत्य

लाझिंटी चेति वैजयंती॥ शरद्वधूरिव जायेव घनेन समयेन वर्षर्तुना वरेणातिशोभः॥ अमल जग्मुर्गुणमहतां महते गुणाय योगः॥२५॥
तले निर्मलतले सरोजं पाणाविव तस्मिन्नाललंबे आगृहे कामिणालिङ्॥ वधूवसमायासवृन्॥ ऋतुसंधिरशोभतेत्यर्थः॥ अत्रात्तवाणेति॥
अत्रात्तवाणेति झिंटीशरयोर्वाणयोरभेदाध्यवसायाच्छेषमूलातिशयोक्तिरूपा गामित्यनयोः संकरः॥२४॥ अथ ऋतुसंधिं वर्णयति॥ समदेति॥
समदशिखिविरुतानि मत्तमयूरकूजितानि हंसनादैः समेत्य तथा कुमुद्वनानि कदंबपुष्पवृष्ट्यासमेत्यातिशायिनी अतिशयवती श्रियं जग्मुः

घन्तजीमूतमुद्दिरेत्यमरः॥

सरजसमिति॥ प्रियमधुः रसप्रकरं यः॥ अनित्यत्वान्न समासान्तः॥ पुल्लिंगो नरपरो बहुव्रीहिरिति केचित्॥ नपुंसकलिंगस्य प्रियमधुशब्दस्य नित्यत्वान्न समासा
न्तः॥ रजःप्रभृतिषु पाठात्॥ मकरंदस्य मधुत्वं पातिकस्यापि वाचकं॥ अर्धर्चादिगणपाठात्॥ पुंनपुंसके॥ पानं मधुरीति षट्पदाली॥ उपांतिके यानि कदंबकु
सुमानि तेषां रेणुभिः कीर्णं व्याप्तं॥ किंच॥ स्वतोपि सहजं सा सरजसं न त्वरजस्कमिति भावः॥ साकल्ये अव्ययीभावः॥ अचतुरेत्यादिना निपातनः॥ केतकी
नां प्रसवं अपहाय विनीलबंधनानि॥ मलिनवृंतानि॥ असनानि प्रियकपुष्पाणि मकरंदभरितानीति शेषः॥ सर्ज्जकासनबंधूकपुष्पप्रियकजी

सरजसमपहाय केतकीनां प्रसवमुपांतिकनीपरेणुकीर्णं॥ प्रियमधुरसनानि षट्पदाली मलिनयति स्म वि
नीलबंधनानि॥ २६॥ मुकुलितमतिसय्य बंधुजीवं धृतजलबिंदुषु शाद्वलस्थलीषु॥ अविरलवपुषः सुरेंद्र
गोपा विकचपलाशचयश्रियं समीयुः॥

वकाः इत्यमरः॥ मलिनयति स्म॥ यथा हंतान्यत्रापि मालिन्यं स्यात्तथा मधुलो
भाक्षाच्छादयामासेत्यर्थः॥ नहि मध्वासक्तो मधुलाभविभूतिस्था सजतीति भावः॥ २६॥ मुकुलितमिति॥ धृता जलबिंदवो यासु तासु
शाद्वलस्थलीषु॥ शष्पहरितप्रदेशेषु अविरलवपुषः॥ स्थूलमूर्त्तयः॥ सुरेन्द्रगोपाः॥ मुकुलितं मुकुलीकृतं॥ बंधुजीवं बंधुजीवकं सि
तकिंशुकराशिं॥ पलाशे किंशुकः पर्णः इत्यमरः॥ तस्य श्रियं तत्सदृशश्रियमित्यर्थः॥ अत एव निदर्शनालंकारः॥ समीयुः प्रापुः॥ २७॥ ॥

मुकुलमित्यर्थः बंधुको बंधुजीवकः इत्यमरः अतिशय्य
अतिक्रम्य विकचपलाशचयो विकसितपलाशराशिः २

॥किं·का·टी·॥
॥चं·स·१०॥
॥६॥
।।।

अथ हेमंतमाह॥ अविरलेति॥ अविरलानि फलानी वनानां प्रियंगुफलानां प्रसूनानि यस्मिन्सः॥ प्रियंगुः फलनीफलीत्यमरः॥ कुसुमितैः॥ कुंदैः॥ माघ्यकुसुमैः सुगंधिः गंधवाहो यस्मिन्सः॥ माघ्यं कुंदे स्त्रक्कात्विन्यमरः॥ शीशिरागामपि कुंदानां हेमंते प्रादुर्भावात् विरोधः॥ विरलतुषारकण इति प्रारंभात्किं तुषारकालः॥ हेमंतः चिराय॥ असमयजं अकालसंभवं गुणं उत्कर्षं लेभे॥२८॥ निचयिनीति॥ निचयिनि उपचयवति लवलीलतानां विकाशे॥ पुष्पविजृंभणे लोध्रसमीरणे च हर्षं जनयति सति॥ पांडुसूनुः॥ विकृतिं न उपययौ॥ कुतः हि यस्मात् जिगीषतां जेतु

अविरलफलिनीवनप्रसूनः कुसुमितकुंदसुगंधिगंधवाहः॥ गुणमसमयजं चिराय लेभे विरलतुषारकणस्तुषारकालः॥२८॥ निचयिनि लवलीलताविकाशे जनयति लोध्रसमीरणे च हर्षं॥ विकृतिमुपययौ न पांडुसूनुश्चलति नयान्न जिगीषतां हि चेतः॥२९॥ कतिपयसहकारपुष्परम्यस्तनुतुहिनोल्पविनिद्रसिंधुवारः॥ सुरभिमुखहिमागमांतशंसी समुपययौ शिशिरः स्मरैकबंधुः॥३०॥ मिच्छतां चेतः नयात् न चलति॥ नहि क्रोधाक्रांते चेतसि शृंगाररस्यावकाशः॥ नहि रोधित्वाद्भावस्येति भावः॥२९॥ कतिपयेति॥ कतिपयैः एव सहकारपुष्पैः॥ न तु नवकुसुमैः॥ रम्यान तु वसंतवत्समग्रैः॥ नापि हेमंतवत्तद्विरहितैरिति भावः॥ तनुतुहिनः॥ न तु हेमंतवद्बहुतुहिनः॥ नापि वसंतवद्विरलतुहिन इति भावः॥ अल्पानि कतिपया

निविनिद्राणिसिंधुवाराणि विकासीनि निर्गुंडीकुसुमानि यस्मिन्सः॥ अत्रापिसहकारवदभिप्रायोद्रष्टव्यः॥ सिंधुवारेंद्रसुरसो निर्गुंडीद्रामिकेत्यपीत्यमरः
इत्थंसुरभिमुखं वसंतप्रारंभं हिमागमांतं हेमंतावसानं शंसतिसूचयतीतिसत्तथोक्तः॥ स्मरस्यएकबंधुःसहकारी उभयत्रंधर्मसंपत्तिरितिभावः॥
शिशिरसमुपययौ॥२४॥ अथवसंतप्रारंभमाह॥ कुसुमेति॥ कुसुमानां कुंकुमप्रधानां नागाःद्रुताः॥ नेषांवनानिउपेतुंकामोयस्याःसालुंपेदृषस्यमः
इत्येतुंकाममनसोरपीतिमकारलोपः॥ वसंतलक्ष्मीः॥ किशलयिनी पल्लविनी चूतयष्टीचूतशाखामिवेतिभावः॥ अवलंब्य अवष्टभ्य॥ अन्यथा

कुसुमनगवनान्युपैतुकौकिशलयिनीमवलंब्यचूतयष्टिं॥ कणदलिकुलनूपुरानिरासेनलिनवनेषुपदं
वसंतलक्ष्मीः॥२५॥ विकसितकुसुमाधरंहसंतीकुरवकराजिवधूंविलोकयंतं॥ ददृशुरिवसुरांगनानिषसं
स्मरमनंगमशोकपल्लवेषु॥२६॥ अयोग्यमशक्यत्वादितिभावः॥ कणत् शिंजमानमलिकुलंनूपुरमिवयस्याः॥ सान्तथो

क्तासती अलिकुलवन्नूपुरमन्यत्र नलिनवनेषु पदंनिरासे॥ निदधे॥ नेषप्रथमंप्रादुरासीदित्यर्थः॥ उपसर्गादस्यत्यूह्योर्वेतिवच
नादात्मनेपदं॥ अत्रप्रकृतवसंतलक्ष्मीविशेषणसाम्यादप्रस्तुतनायिकाव्यवहारसमारोपात्समासोक्तिरलंकारः॥२५॥ विकासि
तेति॥ विकसितःविश्लिष्टःकुसुममेवाधरोयस्मिन्कर्मणि तद्यथा तथाहसंतींस्मयमानां कुरवकराजिरेववधूःतांविलोकयंतंका
मुकलक्षयतीतिभावः॥ अतएवअशोकपल्लवेषु निषसंपल्लवसंस्तरास्थितमित्यर्थः॥ रिंसयतिशेषः॥ स्मरंसनित्यविजयित्वादितिभावः॥

कि॰ का॰ टी॥
सर्ग॥ स॰ १०॥
॥८॥
११८

३ अयं शृंगारवीरयोरेकाधिकरणाभूतेन मनेनं सुरांगनासहद्भुरिवसा हाताद्दत्तालुरिवेत्युत्प्रेक्षा॥ अशोकाधवलोकना मदनसाहसात्कारादि व महात्मनः॥ तोभस्ता सामासीदित्यर्थः॥ अत्र रूपकोत्प्रेक्षयोः संसृष्टिः॥२४॥ श्वसनेति॥ षट्पदेन शालललना सर्ज्जतरुशाखा वधूरिव शालललनावधूः॥ प्राकारगृहयोः शालः॥ शालः सर्ज्जतरुः स्मृत इति श॥ श्वतः॥ श्वसनेन वायुना निश्वासेन च चलितः पल्लवाधरोष्ठश्च पल्लवाधरो यस्मिन्॥ औनोष्ठयोः समासे वा पररूपं वक्तव्यं॥ मधुना मकरंदेन च सुरभि पुष्पमुखश्च नवं यथा तथा विहितेर्ष्यं

श्वसनचलितपल्लवाधरोष्ठे नवविहितेर्ष्यमिवावधूनयंती॥ मधुसुरभिणि षट्पदेन पुष्पे मुख इव शा
लललतावधूश्चुचुंबे॥२५॥ मुहुरनुपतता विधूयमानं विरचितसंहति दक्षिणानिलेन॥ अलिकुल
मलकाकृतिं प्रपेदे नलिनमुखांतविसर्पि पंकजिन्याः॥२६॥ लुनकोपमिवातिक्रियाविशेषणं॥ तथा अवधूनयं
ती कंपयंती॥ धूञ्‌ ईजो नुगवक्तव्यः स्ववक्तव्या नुगागमः॥ चुचुंबे चुंबिता॥ अत्र श्वसनशब्दस्य मधुरशब्दार्थयोः श्वासभेदा
ध्यवसायश्लेषमूलातिशयोक्तिः॥ स चोपमांगमित्यनयोः संकरः॥३३॥ मुहुरिति॥ अनुपतता अनुधावता दक्षिणानिलेन
मलयमारुतेन मुहुर्विधूयमानं विरचिता संहति येन तत्संभृतमित्यर्थः॥ पंकजिन्याः नलिनं मुखमिव तस्यांतर्विसर्पि प्रां
तचारि अलिकुलं कर्त्तृ अलकाकृतिं अलकसादृश्यं प्रपेदे॥२६॥ रामजी रामजी॥

११२

प्रभवतीति॥ परः शत्रुः॥ नदानास्मिन्काले विजेतुं न प्रभवति न शक्नोति॥ यदा जितेंद्रियता इंद्रपराजयत्वं आत्मरक्षा भवति विद्यते॥ तथाहि॥ अ
वजितभुवनः त्रैलोक्यविजयी पुष्पमासः वसंतः॥ सिततुरगे अर्जुने विषये जयं न लेभे॥ अतो जितेन्द्रिया दुर्जया इत्यर्थः॥ विशेषेण सामान्यस
मर्थनरूपोऽर्थान्तरन्यासः॥३५॥ अथ ग्रीष्मं वर्णयति॥ कथमिति॥ विरचित मल्लिकाविशेषः॥ निदाघकालः॥ ग्रीष्मः॥ ऋतुभिर्वर्षादिभिः समं मु

प्रभवति न नदा परो विजेतुं भवति जितेन्द्रियता यदात्मरक्षा॥ अवजितभुवनस्तथाहि लेभे सिततुरगे विजयं न पुष्पमासः॥३५॥ कथमिव न वसंमतिर्भवित्री सममृतुभिर्मुनिनावधीरितस्य॥ इति विरचितम-
ल्लिकाविकाशः स्मयत इव स्म मधुं निदाघकालः॥३६॥

निनाऽवधीरितस्य तिरस्कृतस्य॥ नवसंमतिः॥ लोके योग्यते
नानुमतिः॥ कथमिव कथंचित भावित्री न भविष्यतीत्यर्थः॥ इतीत्थं मधुं वसंतं॥ चैत्रे दैन्ये च जीवे शोके मधुमत इति विश्वः॥ स्मयते स्म
वजहासाऽके मुइत्युत्प्रेक्षा॥ लट स्म इति भूतार्थे लट्॥ प्रहासस्य शुभ्रत्वे काविप्रसिद्धिः॥ मल्लिकाविकासे हासत्वाध्यवसायः॥ अत्र ऋ
तुभिः॥ समधीरस्येत्यत्र अभेदाध्यवसायमूलासहोक्तिरलंकारः॥ संबंधभेदभिन्नस्यावधीरणस्याभिन्नतयाध्यवसायात्॥ न
देवावधीरणासंमतिद्वारास्य यात्प्रेक्षामित्यनयोरंगांगिभावेन संकरः॥३६॥ राम रामजी॥

बलवदिति॥ बलवत्प्रबलमपि मिथो विरोधि परस्परस्पर्द्धि बलं सैन्यं॥ वरूथिनी बलं सैन्यमित्यमरः॥ विपत्तनिर्जयाय॥ शत्रुविजयाय न प्रभवति न शक्नो-
त्येव॥ अलमर्थयोगाच्चतुर्थी॥ कुतः यद्यस्मात्कारणात् भुवनानां परिभवी जेता॥ जिदृक्षीत्यादिना इनिप्रत्ययः॥ ऋतुगणः॥ तदानीं तमर्जुनं
हरणामपि नोन्मनीचकार॥ उन्मनसं उत्सुकं न चकार॥ अरुमनश्चक्षुरित्यादिना अभूततद्भावे च्विप्रत्ययः॥ सल्लोपश्च॥ विशेषणसामा-
न्यसमर्थनरूपोऽर्थान्तरन्यासः॥३७॥ एवं तपस्यस्योद्दीपनसामग्रीविफलेत्युक्तं संप्रति तद्विपरीता चेत्याह॥ श्रुतीति॥ सहायैः॥ तत्सांसहच

बलवदपि बलं मिथो विरोधि प्रभवति नैव विपत्तनिर्जयाय॥ भुवनपरिभवी न यत्तदानीं तमृतुगणः क्षण-
मुन्मनीचकार॥३७॥ श्रुतिसुखमुपवीणितं सहायैरविरललाञ्छनहारिणश्च कालाः॥ अविहितहरि-
सूनुविक्रियाणि त्रिदशवधूषु मनोभवं वितेनुः॥३८॥ रैर्गन्धर्वैः॥ कृतमिति शेषः॥ न लोकेत्यादिना षष्ठीप्रतिषेधः॥ क-
र्तरि या श्रुतिसुखं श्रोत्रमधुरं उपवीणितं॥ वीणया उपगानं सत्यापपाशेत्यादिना वीणाशब्दात् णिजन्ताद्भावे क्तः॥ अविरलैः॥ भूयोभिः
लाञ्छनैः॥ पूर्वोक्तैः॥ फलकुसुमादिभिः चिह्नैः॥ हारिणः मनोहराः॥ कालाः वसन्तादय ऋतवः॥ अविहिताः॥ अकृताः॥ हरिसूनोरर्जुनस्य॥ विक्रिया मनो-
विकृतिर्यैस्तानि तथाभूतानि सन्ति॥ नपुंसकमनपुंसकेनेत्यादिना नपुंसकैकशेषः॥ त्रिदशवधूषु मनोविभवं वितेनुः॥ विस्तारयामासुः॥ सोऽयं परस्प-

हारार्थमुद्यमितं स्वायुधं स्वात्मानमेव प्रहरतीति न्यायादिति भावः॥ अत्र मुनिविक्रियार्थं स्त्रीणां त्रिक्रियारूपानर्थोत्पत्तिकथनाद् द्वि
तीयो विषमालंकारः॥ तथा च सूत्रं॥ विरूपकार्यानर्थयोरुत्पत्तिर्विरूपसंघटना विषमालंकारः॥३७॥ तटस्थवशालंबनगुणोपि विपरीतो भू
दिति श्लोकद्वयेनाह॥ नेति॥ आसां लोचनानि हृतानि नयावयवेषु यथा तथा दलानि विकसंति॥ उत्पलानां निचये अभिरतिं न उपलेभिरे नत्रा
पुः॥ विषमच्छदगुच्छाः॥ सप्तपर्णास्तच्छकाः॥ यूथिकाः॥ मल्लिकाः॥ तासु चाभिरतिं न उपलेभिरे॥ सप्तपर्णो विशालत्वक् शारदो विषमच्छद इत्यम

नदलानि निचये तथोत्पलानां न च विषमच्छदगुच्छयूथिकासु॥ अभिरतिमुपलेभिरे यथासां हरितनया
वयवेषु लोचनानि॥ ३९॥ मुनिमभिमुखतां निनीषवो याः समुपययुः कमनीयता गुणेन॥ मदनमुपद
धे स एव तासां दुरधिगमा हि गतिः प्रयोजनानां॥ ४०॥

रः॥ नयारमणीयत्वान्नदवयवानामित्यर्थः॥ इति बहुव्रीहीति रुक्मा
३९॥ अथ मनःसंगं स्तवयति॥ मुनिमिति॥ याः स्त्रियः॥ कमनीयता सौंदर्यं सैव गुणस्तेन॥ मुनिं अर्जुनमभिमुखतां वशवर्तितां निनीषवः॥ ने
तुमिच्छवः समुपययुः॥ तासां स मुनिरेवं मदनं उपदधे॥ जनयामास॥ तथा हि॥ प्रयोजनानां उद्देश्यानां गतिः॥ परिणतिः॥ दुरधिगमा
हि दुर्ज्ञेया॥ खलु अतः क्वचिन्न भवति॥ क्वचिद्भवतीति भावः॥ ४०॥ अथासामनरागमनेव कार्यतः प्रपंचयति॥ प्रकृतमिति॥ वि
लासि॥ सविलासम्॥ नर्तकीनां संबंधशिल्पं निबुद्धमिति षष्ठ्यन्त्यत्ययः॥ नृतिरवतिरंजिभ्यश्चेति नियमः॥ चतुः कर्तृ प्रकृतं ज्ञारसमभि

नेयं अभिनेतव्यं॥ रसभावादिव्यंजकं नानुससार॥ तद्दूषणं तदा गुरोपनेवदृष्टिप्रयोगनियमादिति भावः॥ तथा प्राविकसदंगुलत्वयोजप
हस्तानुसारेण प्रचलदंगुलिकं तत्पाणिपल्लवं वा नानुससार॥ स च दोषः॥ यतो हस्तस्ततो दृष्टिरिति नियमादिति भावः॥ पल्लवो
स्त्री किशलयमित्यमरः॥ वा स्यात् विकल्पोपमयोरेवार्थे च समुच्चये इति विश्वः॥ किंतु प्रथमं प्रवेशे रावासितनुरगे एव उपहितं सत्त्व
चचाल॥ तत्रैव लग्नं तस्या रागातिरेकान्न किंचित्करणीयमनुसंधेयमिति भावः॥ ४१॥ अभिनयेति॥ अभिनयो रसभावादिव्यंजकः चे

प्रकृतमनुससार नाभिनेयं प्रविसदंगुलिपाणिपल्लवं वा॥ प्रथममुपहितं विलासि चक्षुः सिततुरगे न चचाल नर्त्त
कीनां॥ ४१॥ अभिनयमनसः सुरांगनाया निहितमलक्तकवर्तनाभिताम्रं॥ चरणमभिपपात षट्पदाली धृ
तनवलोहितपंकजाभिशंका॥ ४२॥ ष्टाविशेषः॥ व्यंजकाभिनयौ समावित्यमरः॥ तत्र मनो यस्याः तस्याः व्यासंगात्॥ भृंगा
पातमजानंत्या इत्यर्थः॥ सुरांगनायाः संबंधि अलक्तकवर्तनया लाक्षारंजनेन॥ अभिताम्रं निहितं न्यस्तं चरणं षट्पदावली कर्त्री
धृतान वलोहित पंकजाभिशंका प्रत्यग्रकोकनदभ्रमा यया सा अभिपपात॥ धावति स्म॥ अत्र षट्पदावल्याः॥ स्त्री चरणे पंकज
भ्रमाभिधानाद्भ्रांतिमदलंकारः॥ तेन चोपमा व्यज्यते इत्यलंकारेणालंकारध्वनिः॥ ४२॥ अविरलमिति॥ नमितशिरसो नि नर्त्तकी
पादपीडनान्नमिताग्राणि कदंबकेसराणि रंगसृजां दत्तानीति शेषः॥ अविरलं सांद्रं द्रुतः स्वांगोष्मणा विनीलः॥ अत एव परितः॥ प्र

सक्तः ॥ तैर्द्रुतपरिषिक्तं नर्त्तकीनां ॥ अलसेषु पदेषु ॥ पादन्यासेषु ॥ अलक्तकं ॥ लाक्षारागं सवपुषं मूर्त्तिमंतं तं चित्तरागं उत्कटं कायाद्बहिर्निःसृतं मुनिविषयिणमनुरागमिवेत्युत्प्रेक्षा ॥ ऊहुः ॥ वहंतिस्म ॥४३॥ अथाऽऽसां शृंगारचेष्टां कथयति ॥ नृपेति ॥ नृपसुतमर्जुनं ॥ अभितः परि जनस्य सखीजनस्य गात्रेण तिरोहिता ॥ लज्जया स्वाकारगोपनायान्तर्हिता अंगयष्टिर्यस्यास्तस्याः समन्मथायाः वध्वाः अभिलषितं मुनि

अविरलमलसेषु नर्त्तकीनां द्रुतपरिषिक्तमलक्तकं पदेषु ॥ सवपुषमिव चित्तरागमूहुर्नमितशिखानि कदंबकेशराणि ॥४३॥ नृपसुतमभितः समन्मथायाः परिजनगात्रतिरोहितांगयष्टेः ॥ स्फुटमभिलषितं बभूव वध्वाः कथयति संहृतिरेव कामितानि ॥४४॥ अभिमुनि सहसा हृते परस्या घनमरुता जघनांशुकैकदेशे ॥ चकितनमवसनोरु सत्रपायाः प्रतियुवतीरपि विस्मयं निनाय ॥४५॥

प्रति ॥ अनुरागस्फुटं बभूव ॥ न च संव्रियमाणस्याभावः किं विद्धेति वाच्यमित्याह ॥ यतः संहृतिः सम्यग्गोपनमेव कामितानि ॥ अनुरागान् ॥ कामयते भावे क्तः ॥ वस्तिप्रकटयतीत्यर्थः ॥ अयमनुरागस्य स्वभावोक्तः ॥ यथा चेष्टया संव्रीयते सैवास्य प्रकाशेत्तिभावः ॥४४॥ अभिमुनीति ॥ अभिमुनि मुनिसमक्षं ॥ घनेन मरुता जघनांशुकस्य एकदेशे सहसा हृते सति सत्रपायाः परस्याः संबंधि अवसनो निरावरणो ऊरुर्यस्मिन् तच्चकितं सभयं भ्रमः ॥ प्रतियुवतीः सपत्नीरपि विस्मयं निना

धृतेति ॥ अपरा स्त्री स्मराभिताप्यानेौः ॥ धृतानि विशान्येव वलयानि येन तस्मिन् पाणौ अधिधूषिते वदनादि चर्विते ॥ पांडू गंडलेखे गंडस्थले यस्य तन्मुखं विधायारोप्य ॥ अमधुमदे मधुमदरहिते ॥ तथालसे लोचने यस्मिन्कर्मणि यथा तथा तं नृपसुतं निदध्यौ पश्यतिस्म ॥ तैर्वर्णनं कुर्वाना तं दृष्टा का लोकेतं स्मरणमित्यर्थः ॥ ६६ ॥ अथ पंचभिः मुनिं प्रति दूती वाक्यमाह ॥ सखीति ॥ कुसुमेषुणा कामेनाभितप्ता पीडिता सा नयिका ॥ हे सखि दयितं मुनिं इहानयेति मां प्राहितवती किंचास्माविन्मृष्यकारिणीयमित्याह ॥ हृदयमिति हृदया ॥ अमनस्का नस्य तद्गतचित्तत्वा

धृतविशावलये विधाय पाणौ मुखमाधिधूषितपांडुगंडलेखं ॥ नृपसुतमपरास्मराभितापादमधुमदालसलोचनं विदध्यौ ॥ ६६ ॥ सखि दयितमिहायनेति सा मां प्राहिणवनी कुसुमेषुणाभितप्ता ॥ हृदयमहृदया न नाम पूर्वं भवदुपकंठमुपागतं विवेद ॥ ६७ ॥ चिरमपि कलितान्यपारयंत्या परिगदितुं परिशुष्यता मुखेन ॥ गतघृणगमितानि सत्सखीनां नयनयुगेः सममार्द्रतां मनांसि ॥ ६८ ॥

दितिभावः ॥ अत एव सा पूर्वं प्रागेव भगवदुपकंठं त्वत्समीपमुपागतं हृदयं येन मनः ॥ न विवेद नाम तत्तामन्त्रेरणं अर्थं ॥ तस्य त्वं तरं गत्वा हृहिरंगस्य दुर्वलत्वा दितिभावः ॥ एतेन मनः संग उक्तः ॥ चक्षुः प्रीतिस्तु प्रागेव सर्वासामुक्तेति न पृथगुच्यते ॥ इच्छा मनःसंगसंकल्पेज्जागरः कृशतारतिः ॥ ह्रीत्यागोन्मादमूर्छान्ता इत्यनंगदशा दशेति ॥ ६७ ॥ तत्रास्यावस्था रूपमप्यथायिसंप्रति कर्षैश्चिन्तैरपेत्येण सूचयति ॥ चिरमिति ॥ चिरमित्यादि चिरं कलितान्यपि ॥ संदेशार्थं बुध्यापो

जितान्यपि वचनानीतिशेषः॥ परिशुष्यता मुखेनेति जागरोक्तिः॥ पुरिगादिनुं अपारयंत्या अश्रु कुर्वंत्या तया॥ हेगतघृणा॥ अद्यापितांनानुकंपयइ
तिभावः॥ सन्सर्वांनां मनांसि नयनयुगैः॥ समं आर्द्रतां गमितानि॥ उपचयं गमितानीत्यर्थः॥ शोकवाष्पैरितिभावः॥ अथ सखीशोकोत्पत्त्या मू
र्च्छावस्था सूच्यते॥ अत्र शोकवाष्परूपकरणाभेदात्व्यतियोगिभेदादार्द्रत्वभेदस्य भेदाध्यवसायतन्मूलाचयं नयनयुगैः सममितिसहोक्ति
रलंकारः॥४८॥ अचकमेति॥ मृद्वीसुरभिश्च या स्तां मृदुसुरभि पुष्पशय्यां॥ विरहस्य विहाय सपल्लवां धरित्रीं॥ अचकमत ऐच्छत॥ तस्यास्त

अचकमतसपल्लवां धरित्रीं मृदुसुरभिं विरहस्य पुष्पशय्यां॥ अशमरतिमवाप्य तत्र चास्याः तव सुखशीतमुपै
तुमंकमिच्छा॥४९॥

नापिशीतलत्वादितिभावः॥ कमेर्णिङंतात् लुङि णिश्रिद्रुस्रुभ्यः कर्त्तरि चङ्॥ चङीति द्विर्भाव इति केचित्
तन्न॥ अचीकमतेतिप्रसंगात्॥ अतो णिङ्भावपक्षे॥ कमेश्च्लेश्चङ् वक्तव्य इति वक्तव्यात् चङीति रूपमेतत्॥ अस्याः नायिकायाः॥
तत्र च धरित्र्यामपि अशमरतिं दुःखं अवाप्य॥ सुखयतीति सुखः॥ शीतः शीतलश्च॥ यतः सुखशीतं तव अंकं उत्संगं उपैतुं इच्छा
वर्त्तत इति शेषः॥ अस्या औत्सुक्यं कथितं॥ अत्र अरतिजागरौ सुव्यक्तावेव॥ अस्याः नायिकायाः॥ कमेर्णा पुष्पशय्याद्यनेकाधार
संबंधकथनात्प्रथमः॥ पर्यायालंकारः॥ कमेर्णौकमतेकस्मिन्नाधारे वर्त्तते यदि॥ एकस्मिन्नथवानेकं पर्यायालंकृतिर्द्विधा इति लक्षणात्॥

तादिति॥ तत्तस्मात्कारणात्॥ तस्याः दुरवस्थत्वात्॥ हेऽनघ निष्पाप॥ तनुः कृशेति॥ कार्श्यावस्था कथं न वक्तुं यानस्मिन्॥ त्वदर्थे निमित्ते सतीति शेषः॥ त्वामुद्दिश्येत्यर्थः॥ परासुतां निःप्राणत्वं पुरा व्रजति व्रजिष्यति मरिष्यतीत्यर्थः॥ तथा च ते निमित्तहत्यया अनघत्वव्याघातः स्यादिति भावः॥ यावत्पुरानिपातयोर्लट्॥ इति भविष्यदर्थे लट्॥ इयं च दशमावस्थाप्रदर्शनं॥ न च तपोनिष्ठत्वाद्दूतवध्यमित्याह॥ पुनरिति॥ पुनरपि पक्षान्तरेपि॥ पुनरप्रथमे विशेषे च॥ इति विश्वः॥ तपः सुलभं अनुरागी अनुरूपः योग्यश्च युवतजनस्तु नाप्यते न लभ्यते खलु॥ पुन

तदनघ तनुरस्तु सा सकामा व्रजति पुरा हि परासुतां त्वदर्थे॥ पुनरपि सुलभं तपोनुरागी युवतिजनः खलु नाप्यतेनुरूपः॥५॥ जहिहि कठिनतां प्रयच्छ वाचं ननु करुणामृदुमानसं मुनीनां॥ उपनतमवधीरयंत्य

जहिहि इति॥ कठिनतां निःस्पृहत्वं जहीहि त्यजेत्यर्थः॥ जहातेश्च हा वितीकारः॥ वाचं यच्छ॥ संधत्स्वेत्यर्थः॥ मुनीनां मानसं करुणामृदु ननु दयार्द्रं खलु किंच अभव्याः॥ निर्भाग्याः॥ उपगतं प्राप्तं॥ विषयमिति शेषः॥ अवधीरयंत्यपमन्यंते॥ एवमुक्तप्रकारेण सोर्जुनः॥ कयाचित्स्त्रियेत्यसमीपमागत्य निपुणं चतुरं ऊचे उक्तः॥ अत्र पंचश्लोकां॥ विप्रलंभशृंगारस्यौत्सुक्यनाम्नो व्यभिचारभावस्य चापुनरुक्तिः॥ अनौचित्येन नानाधिकायाः॥ प्रवृत्तेरसाभासत्वमनुसंधेयं॥ तदुक्तं॥ एकत्वेनानुरागश्च

निर्यन्स्तेच्छ्रगतोपि वा योषितां वहुधा क्लिश्येद्रसाभासस्त्रिधा मतः इति ॥ तन्निर्बंधनादूर्जस्वलंकारः ॥ तथा च सूत्रं ॥ रसभेदस्तदाभासस्तत्प्रशमानां निबंधने
न रसवत्प्रेय ऊर्जस्वलमिति ॥ समाहितानि रसबंधे समाहितालंकारः इति सूत्रार्थः ॥ ५१ ॥ कुलकं ॥ सल्ललितेति ॥ सल्लोलितं सविलासं यथा तथा वलि
तेन विवर्त्तितेन त्रिकेन कटिभागेन अभिरामा ॥ शिरसिजाता शिरसिजा ॥ सप्तम्यां जनेर्डः ॥ अमूर्द्धमस्तकात्स्वांगादकामे इत्यलुक् ॥ उपपदमिति डि
ति समासः ॥ एतेन मनसिजो व्याख्यातः ॥ तेषां संयमने बंधने ॥ आकुलः व्यग्रः ॥ एकः पाणिर्यस्याः सा अपरा स्त्री ॥ सुरपतितनये अर्जुने ॥ जैत्रैव जै

सल्ललितवलितत्रिकाभिरामा शिरसिजसंयमनाकुलैकपाणिः ॥ सुरपतितनये परा निरासे मनसिजजैत्रशरं विलो
चनार्द्धं ॥ ५२ ॥ कुसुमितमवलंब्य चूतमुच्चैस्तनुरिभकुंभसमस्तनानतांगी ॥ तदभिमुखमनंगचापयष्टिर्विसृतगुणे
वसमुन्ननाम काचित् ॥ ५३ ॥

त्रः शरः तेन तथाभूतं विलोचनस्यार्द्धं एकदेशाकटाक्षमित्यर्थः ॥ निरासे विससर्ज ॥ ५२ ॥ कुसुमितमिति ॥
इभकुंभवत्पृथुभ्यां स्तनाभ्यां आनतमंगं यस्याः सा अंगमात्रके ङ्भ्यश्चेति ङीष् ॥ काचित्तनुः तन्वी वोतो गुणवचनादिति ङीष् ॥ कुसुमित
मुच्चैः ॥ उन्नतं चूतं अवलंब्य ॥ अत एव चूतलतायोगात् ॥ विसृतः गुणः ज्या यस्याः सा विसृतगुणा मौर्वी ज्या सिंजिनी गुण इत्यमरः ॥ अ
नंगचापज्यायष्टिरिवाकृष्टमुक्तेति भावः ॥ तदभिमुखं समुन्ननाम समुज्जृंभे अंगमंगं चकारेत्यर्थः ॥ ५३ ॥ श्रीरामजी सहायं करोतु ॥

सरभसमिति॥ अन्याविगलितनीविश्लथबंधनं अतएवविलोलं स्यामचलितं नीत्यारक्तं अन्यवक्तव्य इत्यन्वयः॥ अंतरीयं परिधानं अवलंब्य हस्तेन गृहीत्वा॥ सरभसं सत्वरं॥ अभिपतितुं मनोयस्याः सातथोक्ता॥ गंतुमुद्युक्तेत्यर्थः॥ तथापि ससाध्वसेव ननुवक्तुनः॥ ससाध्वसा किंतु धृतेन गलितेन रसनागुणेन॥ संयत्ता वंदा सती अवतस्थे स्थिता॥ वंद्रुसंदानितं स्यूतमुद्दितं संदितं सितामित्यमरः॥ कर्मणिक्तः॥ पतिस्यतिमास्यामितिकिती कारः॥५४॥ काचियुग्मेनाह॥ यदीति॥ नवमन सिशमःशांतिः यदि अस्तीतिशेषः॥ भो अंग प्राज्ञ वापं किं किमर्थमि

सरभसमवलंब्यनीवमन्याविगलितनीविविलोलमंतरीयं॥ अभिपतितुमनाः ससाध्वसेव अतरसनागुणसंदिता

वतस्थे॥५३॥ यदि मनसि शमः किमङ्गचापं शठविषयास्तव वल्लभानमुक्तिः॥ भवतु दिशति नान्यकामिनीभ्यस्तव

हृदये हृदयेश्वरावकाशं॥५४॥ इति विषमितचक्षुषाभिधायस्फुरदधरोष्ठमसूयया कयाचित्॥ अगणितगुरुमानल

त्यर्थः॥ किंतु शठ त्वं च कृतविषयाः॥ शब्दादयः॥ वल्लभाः प्रियाः ननुमुक्तिः॥ तदेतत्तद्दृढयितुमाह॥ जपासस्त्वयमुरसिश्रवणोत्पलेन

भवतु को दोष इति शेषः॥ यद्ययं रागी न हि किमिति भवती नं गणयतीति शंकां निवारयति॥ हृदयेश्वरा काचित्तव प्रेयसी तव हृदये मनसि॥ अन्यकामिनीभ्यस्त्वंतरेभ्यः॥ अवकाशं न दिशाति प्रयच्छति॥ त्वं अतराश्रायानोस्मानगणयसि ननु वैराग्यात्॥ तदर्थमेवायंतेसकलः प्रयासोपीत्य

र्थः॥५५॥ इतीति॥ इत्थं असूयया मत्सरेण स्फुरन्नधरोष्ठो यास्मिन्कर्मणि तद्यथा तथाभिधाय॥ विषमितचक्षुषा कुटिलीकृतदृष्टा अगणिताः

मि

सविनयमिति॥ अपरा॥ सविनयं॥ अनौद्धत्येन सा वितिर्यग्गमिस्तत्समीपं गत्वा स्मितेन मंदहासेन सुभगा एकस्य तत्र मतः॥ कपोलस्य लक्ष्मीर्यस्याः॥ सेति
बहुवचनपरोत्तरो बहुव्रीहिः॥ अन्यथा कप्प्रत्ययः स्युक्तः श्राकू॥ श्रवणानियमितेन निरुद्धप्रसारेण कर्णान्तं प्रापितेन तावदायतेनेत्यर्थः॥ असकलेन नेत्र
असंपूर्णेन कटाक्षेणेति यावत्॥ लोचनेन तं मुनिं सकलमिव समग्रप्रायं यथा तथा तिरश्चीनं पपतिस्म॥ कटाक्षेणैव गाढमद्राक्षीदित्यर्थः॥ एषु श्लो
केषु भावभासनिधनाद्युक्तस्वलालंकारः॥ औत्सुक्यमत्र भावः॥ आभाससत्वं चास्य विरक्तेमुना वहनौचित्यादित्युक्तं प्राक्॥५७॥ अथासां मुनिविलो

सविनयमपराभिसृत्य सा विस्मितेन सुभगैकलसत्कपोललक्ष्मीः॥ श्रवणानियमितेन तं तिरश्चीनमसकलेन लोचनेन॥५७॥ करुणमभिहितं त्रपा निरस्ता तदभिमुखं च विमुक्तमश्रु ताभिः॥ प्रकुपितमभिसारणेनुनेतुं प्रियमियती ह्यबलाजनस्य भूमिः॥५८॥ असकलनयनेक्षितानि लज्जा गतमलसं परिपाण्डुता विषादः॥

भनमुपसंहरति॥ करुणमिति॥ ताभिः स्त्रीभिः तदभिमुखं मुनिसमक्षं करुणं दीनं अभिहितं उक्तं॥ त्रपा निरस्ता त्यक्ता॥ किं बहुना अश्रु च विमु
क्तं॥ ततः परं ताः किं विदध्युः येयमस्तीत्यर्थः॥ कुतः हि यस्मादबलाजनस्याभिसरणे समागमविषये प्रकुपितं॥ अननुकूलं प्रियं अनुकूलयितुं इयती
भूमिः॥ इयत्येतावती सीमा साधनानां परमावधिरिति यावत्॥ अर्थान्तरन्यासोलंकारः॥५८॥ असकलेति॥ असकलनयनेक्षितानि नयनार्धवि
लोकितानि॥ लज्जा अलसं गतं मंदगमनं परिपाण्डुता पाण्डुत्वं विषादः॥ इष्टानवाप्तिनिमित्तः चेतोभंगः इत्येवंप्रकारं विविधं नानाचेष्टितं॥
नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यामिति नपुंसकैकत्वं ताः सुभ्रुवां इत्यायेतिभावप्रधानेन योज्यं॥ तथा हि॥ अनंगः वधूः मंडयितुं प्रभवंति॥ सर्वावस्था

स्थितिशेषः॥ अनन्तासामनंगभूषितानामखिलंभूषणमेवेतिभावः॥५९॥ इदानींतासांत्रिभिर्मुनिविलोभप्रयासवैफल्यमाह॥ अलसेति॥ वधूनांसंबंधि
प्रकृतौ अलसैःपदैःमनोरमं अतएवाजितानिकलहंसवधूनांगतीनियेनतत्प्रयातंगमनं तथाऊरुणोविपुलस्यजघनस्थलस्यातिभारादतिगौरवा
दुदितपरिश्रमेणजिह्मितेपुष्टिनेक्षणेयस्मिन्॥तत्स्थितंवास्थितिश्चसर्वत्रवाशब्दःसमुच्चये॥६०॥ भृशेति॥ तथाभृशेनगाढेनकुसुमशरस्यइषोः
पातेनयःमोहःमूर्छातस्माद्धेतोः अनवासितार्थैःअस्फुटोच्चारणादनवधारितार्थैर्यैःपदैः॥ लुभितशब्दैः॥ आकुलःसंकीर्णःअभिलापः॥ वाक्य

इतिविविधमियायतासुभूषांप्रभवतिमंडयितुंवधूरनंगः॥५९॥ अलसपदमनोरमंप्रकृत्याजितकलहंसवधू
गतिप्रयातं॥ स्थितमुरुजघनस्थलातिभारादुदितपरिश्रमजिह्मितेक्षणंवा॥६०॥ भृशकुसुमशरेषुपातमोहा
दनवसितार्थपदाकुलोभिलापः॥ अधिकविततलोचनंवधूनामयुगपदुन्नमितभ्रुवीक्षितंवा॥६१॥ रुचिकर
मपिनार्थवद्बभूवस्तिमितसमाधिशुचौपृथातनूजे॥ ज्वलयतिमहतांमनांस्यमर्षेनहिलभतेवसरंसुखाभि
लाषः॥६२॥

प्रयोगश्च॥ अधिकंविततेविस्तृतेलोचनेयस्मिन्॥ तदयुगपत्॥ पर्यायेणउन्नमितेभ्रुवौयस्मिन्॥ तथोक्तं॥ ह्रस्वोनपुंसकेप्रातिपदिकस्ये
तिह्रस्वः॥ वीक्षितंवीक्षितंच॥६१॥ रुचिकरमिति॥ पूर्वोक्तंरुचिकरं॥ स्पृहाजनकमपिरुचिः॥ कांत्यर्विभासनेस्त्रीणांकेस्पृहार्थयोरितिवैजयंती॥
स्तिमितेनस्थिरेण॥ समाधिनास्थैर्येणतपोयोगेन॥ शुचौशुद्धे निर्विकारत्वेनसीत्यर्थः॥ पृथातनूजे अर्जुनेविषये॥ अर्थवत्सप्रयोजनंनबभूव॥ तथाहि
महतांधीराणांमनांसि॥ अमर्षेक्रोधेज्वलयतिसति॥ सुखाभिलाषअवसरं अवकाशंनलभते॥ किंतुरौद्ररसशृंगारविरोधित्वादितिभावः॥ अत्रकु

॥कि॥का॥टी॥
॥वं॥स॥१०॥
॥२५॥
॥१

स्वयमिति॥ एवं हरिसुते अर्जुने स्वयं अखंडेनानुन्नेन तपसा शतमखमीशं रुद्रं संराध्य आराधयित्वा परोच्छित्या शत्रुवधेन लभ्यां साध्यां लक्ष्मीं॥ अभिलषति सति॥ सोद्वेगैः॥ कार्य्यसिद्ध्यभावात्सनिर्वेदैः॥ मनोभिः उपलक्षिताः॥ किंच प्रणायाविहत्या॥ प्रार्थनाभंगेन ध्वस्तरुच

स्वयं संराध्येशं शतमखमखंडेन तपसा परोच्छित्या लभ्यामभिलषति लक्ष्मीं हरिसुते॥ मनोभिः सोद्वेगैः प्रणाय

विहतिध्वस्तरुचयः सगंधर्वा धाम त्रिदशवनिताः स्वं प्रतिययुः॥ ६३॥

यः॥ सगंधर्वाधाम नष्टरुचयः॥ नष्टकांतयः॥ सगंधर्वाः॥ त्रिदशवनिताः॥ स्वं धाम स्वस्थानं॥ प्रतिययुः॥ शिखरणीवृत्तमेतत्॥ रसैः रुद्रैः छिन्ना यमनसभलागः शिखरिणीति लक्षणात्॥ वृत्तरत्नाकरे लक्षणं॥ इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयव्याख्यायां घंटापथसमाख्यायां दशमः सर्गः॥ १०॥ सं १९२७ आश्विनवदीत्रयोदश्यां समाप्तिमगमत् कन्यार्कगते ९

२२९

नासि॥ अ

ॐ श्रीगणेशाय नमः ॥ अथेति ॥ अथ अमरेशः शक्रः प्रयाणानंतरं ॥ पाको नाम कश्चिद्दानवः तं शास्ति पाकशासन इंद्रः ॥ तं घातयित्वा हृष्टः इत्यर्थः ॥ तथा अमर्षो मुखात् कृजया अमर्षो
द्वेषान्निसर्गाच्च स्वभावात् जितेंद्रियतया यया आगंतुकानां गंतुको भयहेतुभया ॥ प्रीतः हृष्टः मन ॥ स्यात् हृष्टः प्रतीतः इत्यमरः ॥ जिष्णोरर्जुनस्य जिष्णुः ॥ जिष्णुः शक्रे धनंजये इत्य
मरः ॥ आश्रममाजगाम ॥ अमर्षनिसर्गयोर्जितेंद्रियता हेतुकं काव्यलिंगं श्लोके स्फुटमवगम्यते ॥ इंद्रो मुनिरूपो वाजमेत्याह ॥१॥ मुनिरूप इति ॥ मुनेः रूपमिव रूपं यस्य सः
मुनिरूपः ॥ मुनिवेषधारीत्यर्थः ॥ स इंद्रः ॥ अनुरूपेण दर्शनप्रदाने योग्येनेत्यर्थः ॥ सूनुना पुत्रेण अर्जुनेन ददृशे हृष्टः ॥ यो यौवनादिकमतीतो वृद्धः ॥ द्वितीयाश्रितेत्यादिना द्वितीया

अथामर्षान्निसर्गाच्च जितेंद्रियतया तया ॥ आजगामाश्रमं जिष्णोः प्रतीतः पाकशासनः ॥१॥ मुनिरूपोनुरूपेण सूनुना द
दृशे पुरः ॥ द्राघीयसा वयोतीतः परिक्लांत इवाध्वना ॥२॥ जटानां कीर्णया केशैः संहत्या परितः सितैः ॥ पृक्तयेंदुकरैरह्नः प
र्यंत इव संध्यया ॥३॥

के

समासः ॥ द्राघीयसा दीर्घेण प्रियस्थिरेत्यादिना दीर्घशब्दस्य द्राघादेशः ॥ अध्वना मार्गगमनेनेत्यर्थः ॥ परि
क्लांतः किल इत्यलीके ॥ वृद्ध इव वृद्धाः इव श्रांत इव स्थितः ॥ इत्यर्थः ॥ अथ चतुर्भिरिंद्रं विशिनष्टि ॥ जटानामिति ॥ पंचभिः कुलकं ॥ परितः सितैः केशैः कीर्णया
व्याप्तया जटानां संहत्या उपलक्षितः ॥ अत एव इंदुकिरणैः पृक्तया संयुक्तया संध्यया उपलक्षितः ॥ अह्नः पर्यंतो दिनांत इव स्थितः तस्यापि परिणतिरूप
त्वात् वृद्धोपमानत्वं ॥ जटानां संहतेरिंदुकरत्वान्माध्यंसाम्य ॥३॥ आविशदेति ॥ पुनश्च विशदेन पलितपांडुरेण भ्रूयुगेन छन्नवलितापांगेव लिमन्त्रां तेलो

अङ्गै रूपलक्षितः

॥ कि॰ ॥ का॰ ॥ टी॰ ॥
॥ र्घ॰ ॥ स॰ ॥ १२ ॥
॥ २ ॥

नेयस्सम्नः॥ तथोक्तः॥ अपांगो नेत्रयोरंतौ इत्यमरः॥ पामादित्वाल्लोमादिसूत्रेण नप्रत्ययः॥ प्रालेयावततपा हिममंहत्या म्लानानि पलाशानि कां तद्लानि अङ्गानि यस्मिन्
सद्भ्रूरुखस्थितः॥४॥ **आसक्तेति**॥ पुनश्च परिक्लेशैः परिक्षीणोपि॥ आशक्तभरनीकाशैः॥ भाराक्रांतसदृशैः॥ सभारवहुरुस्थवद्भिरित्यर्थः॥ इकः काशः इति दी
र्घः॥ अंतरवायून्नत्रोदरिकः॥ आयूनस्यौदरिको विजिगीषाविवर्जिते इत्यमरः॥ आङ्पूर्वाद्ध्वमतेः कत्तरिक्तः॥ श्वोः शूडनुनासिके चेति जगारेशः॥ द्विवा
विजिगीषायामिति निष्ठानत्वं॥ सद्भूहीणपा अनुकूलकलत्रेणेवप्रायेण॥ प्राचुर्येण यष्ट्यावलंवेन दंडेन अवलंवितः॥ धारितो न तु स्ववशक्तोतिभावः॥५॥

विशदभ्रूयुगछन्नवलितापांगलोचनः॥ प्रालेयावततिम्लानपलाशाब्जरुखद्भ्रुः॥४॥ आसक्तभरनीकाशैरंगैः परि
क्षेशैरपि॥ आयूनः सद्भूहणपवशायायष्ट्यावलंवितः॥५॥ गूढोपिवपुषा राजन्धाम्ना लोकाभिभाविना॥ अंशुमानि
वतन्वभ्रमंडलछन्नमंडलः॥६॥ जरतीमपिविभ्राणस्तनुमप्राकृताकृतिः॥ चकाराक्रांतलक्ष्मीकः ससाध्वसमि

गूढइति॥ वपुषा गूढोपि प्रछन्नरूपोपीत्यर्थः॥ प्रकृत्यादिभ्य उपसंख्यानात्तृतीया॥ तन्वभ्रपटलछन्नविग्रहस्तोकाश्चहतांतरितमूर्तिः॥ अंशुमानिव
लोकाभिभाविना धाम्ना तेजसा राजन्दीप्यमानवितिधातुः॥ दीप्तः इति पूर्वेण संवंधः॥६॥ **जरंतीति**॥ जरंतीति जीर्णां॥ जीनो जीर्णो जरन्नपीतिअमरः॥
जीर्यतेः शतृनार्थे शत्रुप्रत्ययः॥ उगितश्चेति ङीप्॥ ननु मप्राकृताकृतिः॥ अशक्तो अन्यालोकसामान्या आकृतिर्मूर्तिर्यस्य सः इङः॥ आक्रांता अधिकृता ल
क्ष्मीराश्रमशोभा येन सः॥ आक्रांतलक्ष्मीकः॥ अप्यमसन्निधानादाकु॥ श्रेष्ठैः॥ अत्र नित्यं पुंसः प्रभृतिभ्यः॥ कविति नित्यकवाश्रयेण एकवचनोत्तर

राजन् ६६६ मिप्र

१२.

अभिन्नइति॥ पृथासूनुरर्जुनः॥ तं इंद्रं अभिन्नः॥ अतिस्नेहेन परितस्तरे॥ नद्वाचेरणाद्रोमणापर्यायदत्तं॥ स्तृणातेः कर्मणि लिट्॥ ऋतश्च संयोगादेर्गुणः॥ नन्वज्ञातसं
बंधविशेषस्य तस्येंद्रं कथं स्नेहोदय इत्यत आह॥ संबंधे अज्ञातेपि बंधुरयमित्यज्ञानेपि बलाद्धाधवसन्नावशादेव मनः प्रह्लादते नो ह्लिश्यतीत्यर्थः॥८॥ आतिथे
यीमिति॥ अथ हरिरिन्द्रः सुतादर्जुनादातिथेयामतिथिषु॥ साध्वीं॥ पथ्यातिथिवसतिस्वपतेर्ढञ्॥ अपचितिं पूजां आसाद्य॥ पूजा नमस्यापचितिरित्य
मरः॥ विष्टरे आसने॥ अरत्नारविनिस्तृणातेरप्रत्ययः॥ वृक्षासनयोर्विष्टर इति षत्वं॥ विश्रम्य नाम विश्रम्य किल श्रमापनयं साहयित्वेत्यर्थः॥ इति वक्ष्यमाण

अभिन्नलं पृथासूनुः स्नेहेन परितस्तरे॥ अविज्ञातेपि बंधौ हि बलात्प्रह्लादते मनः॥८॥ आतिथेयीमथासाद्य सुतादप
चितिं हरिः॥ विश्रम्य विष्टरे नाम व्याजहारेति भारतीं॥९॥ त्वया साधु समारंभि नवे वयसि यत्तपः॥ ह्रियते विषयैः
प्रायो वर्षीयानपि मादृशः॥१०॥

प्रकारां भारतीं व्याजहार॥ उक्तवान्॥ व्याहार उक्तिर्लपितमित्यमरः॥ अथ तावन्मुनिवदनं मु
मुहुं कृत्वाह॥९॥ अथैतावन्मुनिवदनं मुमुहुं कृत्वाह॥ त्वयेति॥ त्वया साधु समारंभि सम्यगुपक्रांतं रेभि॥ कर्मणि लुङ्॥ कुतः यस्मान्नवे वयसि
यौवने तपश्चर्यत इति शेषः॥ तथाहि॥ अहमिव दृश्यते॥ मादृशो वर्षीयानतिवृद्धोपि॥ प्रियस्थिरेत्यादिना॥ वृद्धशब्दस्य वर्षादेशः॥ प्रायो वि
षयैर्ह्रियते आकृष्यते किमुत॥ मादृशो यवीयानिति भावः॥ अथैवमानारंभस्वाकारलाभोपि ------ नस्यादित्याशयेनाह॥१०॥
श्रेयसीमिति॥ नवाकृतिर्मूर्तिः॥ रम्येति शेषः॥ श्रेयसी श्रेष्ठा॥ गुणसंपदं तपःसमारंभरूपा प्राप्ता आत्तानानिःफलेति भावः॥ न च स्वाकारगुणः

121

कियंतो न सतीति वाच्यमित्याह॥ लोके रम्यता कारत्ता सुलभः॥ गुणार्ज्जनं गुणापादनं तु दुर्लभं त्वापि तु उभयं संपद्यत इति हेमः॥ परमा मोद इति भावः॥ यवु
क्तं त्वया साधु समारंभीति तत्र स्वसाधुत्वं॥ संसारनिःसारता ख्यानत्तया युग्मेमां पपादयति॥१॥ शारदिति॥२॥ अंतक इति॥१॥ युग्मं॥ शारदिति॥ यौव
नश्रियस्ता वच्छरदंबुधरच्छाया इव गत्वर्य्यः॥ चंचलाः॥ गत्वरा इति क्वरवंतो निपातः॥ हिंद्रायणाये त्यादिना डीप्॥ विषयः शब्दादयस्तु आपानरम्यास्त
त्कालरमणीयाः॥ तदात्वेपात आपात इति वैजयंती॥ पर्य्यंतेवसाने परितापयंति दुःखं कुर्वंतीति तथोक्ताः॥१२॥ अंतक इति॥ किंच॥ सततान्याधि

श्रेयसीं नवमं श्राघ्नागुणसंपद्माकृतिः॥ सुलभा रम्यता लोके दुर्लभं हि गुणार्ज्जनं॥१॥ शारदंबुधरच्छायागत्वर्य्यो यौ
वनश्रियः॥ आपातरम्या विषयाः पर्य्यंतपरितापिनः॥१२॥ अंतकः पर्य्यवस्थाता जन्मिनः संततापदः॥ इति त्याज्ये
भवे भव्यो मुक्तावुत्तिष्ठते जनः॥१३॥ चिंत्रवानसि कल्याणि पत्वां मतिरुपस्थिता॥ विरुद्धः केवलं वेषः संदेहयति

न्ना आपदः॥ क्लेशाय यस्ततस्य जन्मिनः॥ प्राणिनः॥ प्राणीतु चेतनो जन्मी जंतुर्जन्यशरीरिण इत्यमरः॥ श्री ह्यादिन्वादिनिः॥ अंतको मृत्युः॥ पर्य्यंतस्था
ता पर्य्यवरोधा प्रथमं तावज्जान्मिनो जन्म दुःखमेव दुस्तरं ततो जातस्य जीवनमपि सततं दुःखसंभिन्नतया विषयुक्तान्न त्राय्यं तदपि मृत्युग्रस्त
मिति सायं॥ काकमां संभवनोद्विष्टं स्वल्पं तत्तदपि दुर्लभमिति त्याज्य इति भावः॥ इति हेतोस्त्याज्ये भवे संसारे भवतीति भव्यो योग्यो जनः॥ भवाद्दस्या
इति शेषः॥ भवं सुखेषु भेयाय मेयवद्योग्य भा विनोरिति विभ्वः॥ भव्य गेयेत्यादिना कर्त्तरि निपातः॥ मुक्तो मोक्षे उत्तिष्ठतेनोद्युक्तो भव उदान्

१२१

चित्रवानिति॥ चित्रवान् प्रशस्तचित्तोसि॥ प्रशंसायामतुप्॥ यद्यतः॥ त्वां कर्णौ साध्वी॥ वल्लादिभ्यश्चेति ङीप्॥ मतिस्तपस्यितोपात्ता॥ केवलं निश्चयेक्कृत्स्नेप्यसहायेपि तु त्रिषु रि त्यमरः॥ किंतु केवलमेकं यथा तथा विरुद्धौ वेषो मे मनः॥ संदेहयति॥ संदेहं जनयति॥ यदा वेषः॥ केवलं वेषएवेत्यर्थः॥ केवलः कृत्स्नएकाश्च केवलाश्च ------------- ध्या प्यन्तः॥२४॥ वेषविरोधमाह॥ युयुत्सुनेति॥ युयुत्सुनेव योद्धुमिच्छुनेव॥ युजेः सनन्ताद्रुः प्रत्ययः॥ किमिदं कवचं वर्म॥ आमुक्तमर्पितं को विरोध इत्यत्राह॥ हि यस्मात्तपस्विनः॥ केव ले एकैकवचाद्यसहिते इति यावत्॥ नेचने वै अजिन वल्कलेच॥ मिरा नित केवलमिति त्रिलिंगेत्वेककृत्स्नयो रित्यमरः॥ वसने आच्छादयति॥ यत्तपस्विनस्ते कवचधारणं विरु॥२५॥

चित्रवानसि कल्याणी यत्त्वां मतिरुपस्थिता॥ विरुद्धः केवलं वेषः संदेहयति मे मनः॥२४॥ युयुत्सुनेव कवचं किमामुक्तमिदं त्वया॥ तपस्विनो हि वसते केवलाजिनवल्कले॥२५॥ प्रपित्सोः किं च ते मुक्तिं निःस्पृहस्य कलेवरे॥ महेषुधी धनुर्भीमं भूतानामनभिद्रुहः॥२६॥ भयंकरः प्राणभृतां मृत्योर्भुज इवापरः॥ असिस्तव तपःस्थस्य न समर्थयते शमम्॥२७॥

प्रपित्सोरिति॥ किंच मुक्तिं प्रपित्सोः प्रपत्तुं प्राप्तुमिच्छोः॥ सनि मीमेत्यादिना इसादेशः॥ अत्र लोपोऽभ्यासस्येत्यभ्यासलोपः॥ अतो मुमुक्षुत्वादेव कलेव रे शरीरे निस्पृहस्य अतो नात्मरक्षार्थं धनुर्द्धारणमित्यर्थः॥ नापि परहिंसार्थमित्याह भूतानां जन्तूनां॥ स्यात्प्राणी जंतौ च भूतानीति वैजयंती॥ क्रुधद्रुहेत्युपस ष्टयोः कर्मेति कर्मसंज्ञायां कर्तृकर्मणोः कृतीति षष्ठी॥ अनभिद्रुहः॥ अहिंसकस्य॥ सत्त्वदुष्टिषेत्यादिना क्विप्॥ तेन न वमहेषुधी महानिषंगो भीमं धनुश्च न सं मर्थयते॥ शाममित्युत्तरेणान्वयः॥ समर्थयते इति वचनपरिणामः कार्यः॥२६॥ भयंकर इति॥ तथा मृत्योः परागभुज इव प्राणभृतां श्रीमृत्योर्भुज इवापरः॥ अ

क

प्राणिनां भयं करोतीति भयंकरः॥ मेघर्त्तिभयेषु कृञ इति खच्प्रत्ययः॥ अरुर्द्विषदित्यादिना मुमागमः॥ असिः खड्गः॥ तपास्विति हन्तीति तपस्यः॥ तपश्चरन्नित्यर्थः सुपिस्थ इति कः प्रत्ययः॥ तस्य न वशमं शान्तिं न समर्थयते॥ न संभावयति किं शान्तस्य शास्त्रेण भाव इति भावः॥१३॥ नन्वशान्तस्य किं तपसेत्याशंक्य जयार्थमित्याह॥ जयमिति॥ अत्र भवान्पूज्य इत्यर्थः॥ उत्तरेभ्योपि दृश्यन्त इति प्रथमार्थे त्रा दृशीयमरातिषु जयमभिलाषुको जयमिच्छुः॥ लषपतेत्यादिना उकप्रत्ययः॥ न लोके त्यादिना षष्ठी प्रतिषेधः॥ नूनमिति निश्चयः॥ नूनं तर्केऽर्थनिश्चय इत्यमरः॥ क्रोधस्य लक्ष्म लिंगमायुधं क्व क्षमावन्तः॥ शान्तास्तपोधनाः क्व क्रोधशान्त्योर्विरोधात् तत्कालयोः शस्त्रतपसोरप्येकत्रासंगतेः॥ शान्तिरात्तेन तपो जयार्थं न तु मोक्षार्थमिति निश्चय इत्यर्थः॥१४॥ तपसो जयार्थत्वे दोषमाह॥ य इति॥ यः पुरु

जयमत्र भवान्नूनमरातिष्वभिलाषुकः॥ क्रोधलक्ष्म क्षमावन्तः क्वायुधं क्व तपोधनाः॥१४॥ यः करोति वधोदर्कानिःश्रेयसकरीः क्रियाः॥ ग्लानिदोषच्छिदः स्वच्छाः स मूढः पंकयत्यपः॥१५॥

षः॥ निश्चितं श्रेयो निःश्रेयसः॥ श्रेयो निःश्रेयसामृतमित्यमरः॥ निःश्रेयसं कुर्वन्तीति निःश्रेयसकरी॥ निःश्रेयसहेतुरित्यर्थः॥ कृञो हेतुताच्छील्यानुलोम्येष्विति हेत्वर्थे टप्रत्ययः॥ टिड्ढाणञिति ङीप्॥ क्रियास्तपोध्यानादिकर्माणि वधोदर्काः॥ हिंसाफलकाः करोति॥ उदर्कः फलमुत्तरमित्यमरः॥ अत एव मूढः॥ स पुमान् ग्लानिरेव दोषः तं छिन्दन्तीति ग्लानिदोषच्छिदः॥ पिपासाहारिणीः क्विप्॥ स्वच्छाः अपः पंकयति पंकवतीः करोति॥ णाविष्ठवद्भावे विन्मतोर्लुगिति मतुपो लुक्॥ महाफलसाधनस्य तपसः॥ तुच्छफले विनियोगः॥ स्वच्छाम्भःपंकसंकरवन्मोक्तावत्तिर्गर्हितमित्यर्थः॥ अत्र यत्तपसो वधोदर्कीकरणं तन्निर्मलस्य पयसः॥ पंकसंकरीकरणमिति वाक्यार्थे वाक्या

मूलमिति॥ हिंसादेरिति॥ तद्गुणसंविज्ञानो बहुव्रीहिः॥ आदिशब्दादनृतस्तेयादीनां संग्रहः॥ दोषस्यावगुणस्य मूलं कारणभूतौ स्त्रीकामाभ्यां किं न कुर्वन्ति पातक-
मितिभावः॥ अर्थकामौ मा स्म पुषः नोपचिनुष्व॥ स्मोत्तरे लङ् चेति लुङ्॥ पुषादिद्युतादिना च्लेरङादेशः॥ हि यस्मात्तावर्थकामौ तत्त्वावबोधस्य तत्त्वज्ञानस्य मोक्ष-
साधनस्येति शेषः॥ दुरुच्छेदौ दुर्वारावुपप्लवौ हिंसादिप्रवर्त्तकत्वादंतकौ अतः पुरुषार्थपरिपंथिनाविति न पुरुषार्थावित्यर्थः॥ मुक्तिप्रतिबंधकत्वादपुरुषार्थौ अर्थका-
मावित्युक्तं तत्रापि दुःखैकनिदानत्वादप्यपुरुषार्थत्वमिति पंचभिः प्रपंचयति॥२०॥ अभीति॥ भूतानामभिद्रोहेण हिंसया गत्वरीरस्थिराः॥ श्रियः संपदो॥ जनः

मूलं दोषस्य हिंसादेरर्थकामौ स्म मा पुषः॥ तौ हि तत्त्वावबोधस्य दुरुच्छेदावुपप्लवौ॥२०॥ अभिद्रोहेण भूतानामर्जयन्ग-
त्वरीः श्रियः॥ उदन्वानिव सिंधूनामापदामेति पात्रतां॥२१॥ या गम्याः सत्सहायानां यासु खेदो भयं यतः॥ तासां किं यन्न दुःखा-

उदकमस्तीत्युदन्वानुदधिः॥ उदन्वानुदधिः सिंधुरित्यमरः॥ उदन्वानुदधौ चेति निपातनात्साधुः॥ सिंधूनां ॥ य विपदामिव संपदाम्॥२२॥
नगानामिवापदां पात्रतां मूलत्वमेति॥ आपत्पात्रतामेव व्यनक्ति॥२१॥ येति॥ याः संपदः सत्सहायानां विद्यमानसाधनानामेव पुंसां गम्याः
साध्याः॥ विपदोपि सत्सहायानामेव गम्याः॥ साध्या इत्यर्थः॥ कृत्यानां कर्त्तरि वेति षष्ठी॥ यासु सतीषु खेदस्त्यः॥ लरणादिक्लेशः पिपत्सु सत्स्विति शेषः
यतो याभ्यः संपद्भ्यो भयमनेकार्थमूलत्वादरिति भावः॥ विपद्भ्यस्तु स्वरूपतो भयमेवेति भावः॥ किं बहुना विपदामिव तासां संपदां किमस्तीति शेषः॥ यद्दुः-
खाय न भवतीति तत्सर्वं दुःखावहमेवेत्यर्थः॥ यदाहुः॥ अर्थानामर्जने दुःखमर्जितानां च रक्षणे नाशे दुःखं व्यये दुःखं धिगर्थो दुःखभाजनमिति॥ अतो हेतोहेय

१२३

दुरासदानिति॥ किंच॥ दुरासदान् दुःप्रापान्॥ विश्वासाज्जन्म यस्यास्तस्या विश्वासजन्मनः॥ जन्मोत्तरपदत्वाद्व्यधिकरणो बहुव्रीहिः॥ धृतेः संतोषस्योपामरीन्॥ अ
हिषभवान् इति कुत्तिकलाश्रीवत्स्पर्द्धन॥ भोगान्फणानिव॥ भोगः सुखे स्त्र्यादिभृतावहेश्च॥ शरीरफणयोरपीति उभयत्र विश्वः॥ अध्यास्याधिष्ठाय आपन्नदुर्लभा
आपि विषमुष्टिमिव नेष्यंतमेव भोगिनं पुमांसं बलादवस्कंदतीत्यर्थः॥२३॥ इति श्रियो हेयात्वमुक्ता हानेनेति॥ श्रियः संपदो जातु कदाचिदपि अंतर
ज्ञानीचानीचविशेषाभिज्ञा न भवंति॥ अत एवासां श्रियां प्रियैर्न भूयते न कुत्राप्यनुरज्यंतीत्यर्थः॥ ननु श्रीदोषो न पुरुषदोष इति चेत्तत्राह॥ न

दुरासदानरीनुग्रान्धृतेर्विश्वासजन्मनः॥ भोगान्भोगानिवाहेयानध्यास्यापन्नदुर्लभा॥२३॥ नांतरज्ञाः श्रियो जा
तु प्रियैरासां न भूयते॥ आसक्तास्तास्वमी मूढा वामशीला हि जंतवः॥२४॥ कोपवादः स्तुतिपदे यदशीलेषु चंचलाः॥
साधुवृत्तानपि क्षुद्रा विलिंपंत्येव संपदः॥२५॥

ठा आसीजमालास्वननुरक्तास्वपि श्रीष्वासक्ताः॥ श्रीष्विव॥ श्रीष्वप्यननुरक्तास्वनन
रागः पुंसामेवायं दोषः इत्यर्थः॥ किमर्थं तर्हि तास्वेव सर्वेषामासक्तिरित्यर्थांतरं न्यस्यति॥ वामेति॥ जंतवो वामशीला वक्रस्वभावा हि स्वभावस्य
दुर्वारत्वादित्यर्थः॥ यदुक्तं नांतरज्ञाः॥२४॥ श्रिय इति तत्स्वभावं प्रपंचेनैवाह॥ कइति॥ संपदः अशीलेषु दुःशीलेषु विषयेषु न तद्दिरुद्ध मुच्यते चंचलाः इति
यत्त॥ स्तुतिपरे स्तुतिविषये तत्रयोऽपवादः॥ का निंदा॥ किंतु क्षुद्राः संपदः॥ साधुवृत्तानपि विलिंपंत्येव लांछयंतीत्यर्थः॥ यस्मादर्थो न पुरुषार्थ इति संदर्भा
र्थः॥ ननु नार्थमहमर्थये॥ किंतु विरुद्धधर्ममनुपालयन्वैरनिर्यातनमिच्छामीत्याशंक्य तदपि परपीडात्मकत्वादयुक्तमित्यभिप्रायेणाह॥ श्लोकचतुष्टयेनाह॥२५॥

१२३

कृतवानिति॥ तत्रात्मदृष्टांतेनैव परपीडातो निवर्त्तितव्यमित्याशयेनाह॥ अप्रियैरनिष्टवस्तुभिः संयोग इव प्रियैरिष्टवस्तुभिः॥ सह वियोगो विरहोऽन्यदेहेषु स्वस्यैव देहांतरे
षु अतीतानागतेष्विति शेषः॥ मनो विधुरं दुःखिन्नं कृतवान् कर्त्ता करिष्यति च॥ लट् वर्त्तमाने चानुभूयत इति शेषः॥ इष्टनाशो दुःखहेतुरिति सर्वव्यापित्वे कालिकसि
द्धिमिति श्लोकार्थः॥२६॥ सप्रतीष्टसमागमस्य दुःखहेतुत्वमाह॥ शून्यमिति॥ प्रियसमागमे॥ इष्टजनसंयोगे सति शून्यं जनराहित्यं प्राप्तिमसनं दुःखमुत्सवे तुल्यं भव
तीति शेषः॥ विप्रलंभो वचनाप्रतारणमिति यावत्॥ सोऽपि लाभाय किं बहुना प्रियसंगतस्य सर्वावस्थास्वपि सुखमेवेत्यर्थः॥ पुनर्भवांतरेण प्रियतत्त्ववियोगस्य दुःख

कृतवानन्यदेहेषु कर्त्ता च विधुरं मनः॥ अप्रियैरिव संयोगो विप्रयोगः प्रियैः सह॥२६॥ शून्यमाकीर्णतामेति तुल्यं व्य
सनमुत्सवैः॥ विप्रलंभोऽपि लाभाय सति प्रियसमागमे॥२७॥ तदारम्याण्यरम्याणि प्रियाः शल्यं तदासवः॥ तदैकाकी
सबंधुः सन्निष्टेन रहितो यदा॥२८॥ युक्तः प्रमाद्यसि हितादपेतः परितप्यसे॥ यदि नेष्टमात्मनः पीडा मा सृजि भवता जने॥२९॥

हेतुमाह॥२७॥ तदेति॥ तदा रम्याण्यपि अरम्याण्यमनोहराणि भवंति किं बहुना॥ प्रियाः असवः प्राणाः अपि सल्यं शल्यवदसह्या भवंतीत्यर्थः॥ किंच॥ तदा सबंधुः
सन्नपि एकाकी॥ असहाय एव॥ एकाकिनिचासहाय इत्याकिनिच्प्रत्ययः यदा इष्टेन रहितः॥२८॥ युक्त इति॥ किंच॥ युक्तो हितेनेति शेषः॥ हितेनेष्टेन युक्तः॥ सन्
माद्यसि प्रकर्षेण माद्यसि हृष्यसि॥ हितादपेतः परितप्यसे॥ पीडितोऽसि॥ तत्पदं वारिकान्तकर्त्तरि लट्॥ सत्यमेवं ततः किमत आह॥ यदीति॥ पीडा आत्मनः स्वस्य
नेष्टा यदि तर्हि भवता जने परस्मिन्नपि मा संजि न सत्पत्तां॥ सृजेः कर्मणि लुङ्॥ आत्मदृष्टांतेन परपीडनान्निवर्त्तितव्यमित्यर्थः॥ पीडायाः परमात्मनोः समत्वात्॥२९॥

अपदेहस्से अर्थश्रद्धयाच परपीडा न कार्येत्याह ॥ विजहीहि इति ॥ हे तपोधन ॥ रणोत्साहं रणोद्योगं ॥ लोकोत्तरेषु कार्येषु स्थेयान् ॥ प्रयत्नस्ततः उत्साहः ॥ तं विजहीहि त्य
ज ॥ अत्र चहाविती कारः ॥ साधु समीचीनं निःश्रेयसकरत्वादिति भावः ॥ नयोमानी नशः ॥ ननाशय ॥ नशपतेर्ण्यन्ता न्माङ्योगाद् शिषि लुङ् ॥ अडागमप्रतिषेधश्च ॥ किं
तु जन्मन उच्छेदं कर्तुं मोक्षं साधयितुमित्यर्थः ॥ शांत राधि विजिगीषा निवृत्तो भवेदित्यर्थः ॥ हुरुल्भ्यो हेर्धिः ॥ द्वयसोरेत्रावभ्यासलोपश्चेत्येकारः ॥ अथ सर्वथा विजयकं
डूरस्तिन निवर्त्तते ॥ जन्मन इति ॥ अस्य जन्मिन उत्पत्तिधर्मकस्य शरीरिणः श्रीह्र्यादित्वादिनिः ॥ स्थितिं लक्ष्मीमिव चंचलाचलां जन्मधीर्मत्वादेव ॥ चलाचलामनित्या
मित्यर्थः ॥ चलतेः पचाद्यच् ॥ चलिचरिपतिपदन्तादीनामभ्यासस्येति द्वित्वे भावाभ्यासस्यागागमश्च ॥ विद्वान् वद्वान् ज्ञातवानित्यर्थः ॥ विदेः शतुर्वसुरिति वैकल्पिको वसुरादे

विजहीहि रणोत्साहं मातपः साधु मानशः ॥ उच्छेदं जन्मनः कर्तुमेधि शांतस्तपोधन ॥ २० ॥ जन्मिनोस्य स्थितिं विद्वान् लक्ष्मीमि
व चलाचलां ॥ भवान्मास्म वधीन्न्याय्यं न्यायाधारा हि साधवः ॥ २१ ॥ जीयंतां दुर्जया देहे रिपवश्चक्षुरादयः ॥ जितेषु ननु लो
कोयं तेषु कृत्स्नस्त्वया जितः ॥ २२ ॥

शः ॥ भवान् न्यायादनपेतं न्याय्यं साधु कर्म ॥ धर्मपथ्यर्थन्यायादनपेत इति यत्प्रत्ययः ॥ मास्म वधीन् मा नाशयेदित्यर्थः ॥
स्मोत्तरे लङ् चेति लुङ् ॥ लुङि चेति हनो वधादेशः ॥ शेषे प्रथम इति प्रथमपुरुषः ॥ हि यस्मात् साधवो न्यायाधारा न्यायावलंबा ॥ बहुव्रीहिस्तत्पुरुषो वा ॥ न्यायत्यागे सा
धुत्वमेव न स्यादिति भावः ॥ न्यायाच्च राशितपाठे न्यायमार्गचरंतीति तत्पोक्तः ॥ कर्मण्यण् ॥ नहि किं कर्त्तव्यमित्याह ॥ २१ ॥ न हंतव्याः शत्रवः विजयेन विधीयतामित्याह ॥
जीयंतामिति ॥ हे दुर्जय ॥ अजर्य्याश्चक्षुरादयो देहे रिपवो जीयंतां यस्मात्तेषु अंतः ॥ शत्रुषु जितेषु ॥ त्वया अयं कृत्स्नो लोको जितः ॥ ननु किं सुतान्यशत्रवस्त्तस्तंतर्गता इत्य
र्थः ॥ जितेंद्रियस्योद्वेगार्थनिःस्पृहस्य निजवैरानुदयात् द्विजयस्यपदेशः ॥ अजितेंद्रियस्या निष्टमाचष्टे ॥ २२ ॥ राम जी राम जी

तस्ला = ३

परवानिति॥ अर्थसंसिद्धौ अभ्यवहारादिस्वार्थसाधने परवान् पराधीनः॥ परतंत्रः॥ पराधीन परवान्नाथवानपीत्यमरः॥ नीचैर्वृत्तिः॥ कर्षणवहनादि निकृष्टकर्म॥ अपरत्र
योनिर्लज्जः॥ अविधेयेंद्रियः॥ अजितेंद्रियः॥ पुमान् गौर्बलीवर्द इव पुंसां विधेयता यथोक्तकारिता प्रेष्यतामेति॥ विधेयो विनयग्राही वचनेस्थित आश्रवरित्यमरः॥
उपमालंकारोयं॥ प्रकृताप्रकृतयोरर्थसाधर्म्याश्लेषाननशब्दमात्रसाधर्म्यादिति॥ न केवलं हिंसादिदोषमूलत्वाद्विषयीणां हेयत्वं किंत्वपरमार्थिकत्वा
दपीत्याह॥ २३॥ स्वरिति॥ अधुना त्वया अधुनातनी इदानीतनी॥ सायंचिरमित्यादिना टु प्रत्ययः॥ सुखसंवित्तिः॥ सुखानुभूतिः॥ श्वः परेहनि त्वया स्मरणी

परवानर्थसंसिद्धौ नीचैर्वृत्तिरपत्रपः॥ अविधेयेंद्रियः पुंसां गौरिवैति विधेयतां॥ २३॥ स्वस्त्वयासुखसंपत्तिः स्मरणीया
धुनातनी॥ इति स्वप्नोपमान्मत्वा कामान्मागास्तदंगतां॥ २४॥ अद्धेया विप्रलब्धारः प्रिया विप्रियकारिणः॥ सुदुस्त्यजा
स्त्यजंतोपि कामाः कष्टा हि शत्रवः॥ २५॥ या॥ न चानुभवनीया इति हेतोः॥ काम्यंत इति कामाः विषयास्तान्॥ स्वप्नोपमान्॥ स्वप्नतुल्या
न्मत्वा॥ अत॥ त्रिकालिकत्यनदंगतां नश्येषत्वं॥ कामपरतंत्रतां मागाः॥ न गच्छ॥ इणो लुङ्यातिगादेशः॥ इतोपि हेयाः कामाः इत्याह॥ २४॥ अद्धे
या इति॥ श्रद्धातुमर्हाः अश्रद्धेयाः विश्वासनीयाः॥ तथा विप्रलब्धारः प्रतारकाः॥ विसंवादनकारणत्वात्॥ तथा प्रीणंति इति प्रियाः॥ प्रीतिजनकाः॥ इ
गुपधेत्यादिना क प्रत्ययः॥ तथा विप्रियकारिणो दुःखजननशीलाः॥ किंच त्यजंतोपि पुरुषं विहाय गच्छंतोपि सुदुस्त्यजाः स्वयं तेन त्यक्तुमशक्याः॥
कामाः विषयाः कष्टाः कुत्सिताः शत्रवो प्रसिद्धशत्रुः॥ वैधर्म्यादिति भावः॥ अत्र अश्रद्धेयत्वादीनां विप्रलंभकत्वादीनां चैकत्र विरोधोपि विषयस्वा

विविक्त इति॥ विविक्ते विजने जह्नुकन्यया॥ भूयो भूयिष्ठं॥ पुनर्पुनर्वा॥ भूयः पुनः ख्यातं भूतार्थेत्वेतु नाव्ययमिति विश्वः॥ प्राविते सिक्ते पाविन इति पाठे पवित्री कृतेऽत्यर्थः॥ पुरा पुरातो निकटे प्रबंधातीत वस्तुष्विति विश्वः॥ उदायुधरुद्यतायुधो माभूः शस्त्रं विमुंचेत्यर्थः॥ ३९॥ व्याहृत्येति॥ मरुतांपत्योदेवेंद्रे इति वा वं व्याहृत्योक्त्वा अवस्थिते सति तूष्णीं स्थिते सति॥ अथ कपिध्वजो अर्जुनः॥ प्रश्रयगंभीरं विनयमधुरं॥ विनयप्रश्रयौ समाविति विश्वः॥ वच वचनमुवाचेत्यपेक्षामात्रे चतुर्भिरिंद्रवाक्यमुपश्लोकयन्नाह॥ ३७॥ प्रसादेत्यादि॥ ३८॥ न्यायेति॥ ३९॥ अलंब्ध्वेत्यादि॥ ४०॥ इदमिति॥ ४१॥ अंतकलापकं॥ प्रसादेति॥ प्रसा

विविक्तेऽस्मिन्नगे भूयः प्लाविते जह्नुकन्यया॥ प्रत्यासीदति मुक्तिस्त्वां पुरा माभूरुदायुधः॥ व्याहृत्य मरुतां पत्याविति वाचमवस्थिते॥ वचः प्रश्रयगंभीरमथोवाच कपिध्वजः॥ ३७॥ प्रसादरम्यमोजस्वि गरीयो लाघवान्वितं॥ साकांक्षमनुपस्कारं विष्वग्गति निराकुलं॥ ३८॥ न्यायनिर्णीतसारत्वान्निरपेक्षमिवागमे॥ अप्रकंपत

दोऽत्र प्रसिद्धार्थपदत्वं तेन रम्यं॥ प्रसिद्धार्थपदत्वं यत्स प्रसादो निगद्यत इति लक्षणात्॥ ओजस्वि **यान्येषामाम्नायवचनोपम**

समासभूयिष्ठं॥ ओजः समासभूयस्त्वमिति याग्दानात्॥ गरीयः॥ अर्थपरिगतं न तु शब्दाडंबरमात्रमित्यर्थः॥ लाघवान्वितं विस्तरदोषरहितं॥ विष्वग्गति कृत्स्नार्थप्रतिपादकं न तु सावशेषार्थं अत एव निराकुलमसंकीर्णार्थं॥ ३८॥ न्यायेति॥ पुनः न्यायेन युक्त्या निर्णीतसारत्वान्निश्चितार्थत्वाद्धेतोरागमे शास्त्रविषये निरपेक्षं स्वतंत्रमिव युक्तिदर्पादेवं प्रतीयते॥ वस्तुतस्तु शास्त्रसिद्धार्थमेवेति द्वश्य वाक्यार्थः

अलंघ्यत्वादिति॥ अन्यैर्जनैरलंघ्यत्वादनुलंघनीयत्वात्॥ क्षुभितोदन्वद्गर्जितं॥ उद्वेलांभोधिगंभीरं॥ औदार्य्यादुक्तिविशेषत्वात् श्लाघ्यविशेषणाद्वा॥ तदुक्तं दं
डिना॥ उत्कर्षवान्गुणः॥ कश्चिदुक्ते॥ यस्मिन्प्रतीयते॥ तदुदाराह्वयं तेन सनाथाकाव्यपद्धतिरिति॥ श्लाघ्यैर्विशेषणैर्युक्तमुदारं कैश्चिदिष्यत इति॥ अथवा
माधुर्य्यत्वादिति केचित्॥ अत्यत्रत्यागित्वादित्यर्थः॥ अर्थसंपत्त्या प्रयोजनसंपत्त्या॥ अन्यत्राशिमाहिंसिद्धा मुनेश्चित्तमिव शांतं सौम्यं॥ ४०॥ इदमिति॥ ईदृग्
गुणोपेतं॥ यथोक्तगुणयुक्तं॥ लब्धावसरसाधने कालापर्यये येन तत्॥ प्रियं प्रीतिकरं इदं वाक्यं को वा व्याकुर्य्याद्व्याहरेत्॥ यो वक्ता नेदृगाशयः॥ ईदृग्विवक्षा

अलंघ्यत्वाज्जनैरन्यैः क्षुभितोदन्वदूर्जितं॥ औदार्य्यादर्थसंपत्तेः शांतं चित्तमृषेरिव॥ ४०॥ इदमीदृग्गुणोपेतं ल
ब्धावसरसाधनं॥ व्याकुर्य्यात्कः प्रियं वाक्यं यो वक्ता नेदृगाशयः॥ ४१॥ न ज्ञातं तात यत्नस्य पौर्वापर्य्यममुष्य ते
शासितुं येन मां धर्मं मुनिभिस्तुल्यमिच्छसि॥ ४२॥

शान्न भवति॥ अवुद्धेन सार्थस्य वक्तुमशक्यत्वादिति भावः॥ एवमिंद्रवाक्यमु
पश्लाघ्य ना हमस्योपदेशस्याधिकारीति परिहरति॥ ४१॥ कल्पापकं॥ नेति॥ हे धात॥ अमुष्य यत्नस्य वयोरूपसमदीयोद्योगस्य पूर्वापरे एव पौर्वाप
र्य्यं कारणफले वा नुवर्णादित्वात्स्वार्थे ष्यञ्॥ अत्ययः॥ नेत्त्वनज्ञातं त्वया न ज्ञातमित्यर्थः॥ गतिबुद्ध्यादिनावर्त्तमाने क्तः॥ तद्योगादेव षष्ठी
कुतः येन कारणेन मां मुनिभिस्तुल्यं धर्मं मोक्षधर्मं शासितुमुपदेष्टुमिच्छसि॥ शास्तिरयं द्रुहादित्वाद्द्विकर्मकः॥ अथ पौर्वापर्य्यमज्ञात्वा
प्युपदेशदोषमाह॥ ४२॥ अविज्ञातेति॥ अविज्ञातः प्रबंधः पूर्वापरसंगतिर्येन तस्य वाचस्पतेरपि ईहस्यैनरपि॥ कस्कादित्वात्सलुक्॥ अथवा

षष्ट्या॥ प्रतिपुत्रपृष्टपारपाद्यपयस्योवेष्विति सकारः॥ एतस्मादेव ज्ञापकाद्लुगिति केचित्॥ वचः उपदेशः॥ नयद्रुहो नीतिविरुद्धकामैरागः॥ पुरुषस्य इहितमु
धोगइव अफलतां व्रजत्येव॥ ननु सदुपदेशस्य कुतो वैफल्यमित्याशंक्य सोप्यवस्थानियुक्तस्त्वहृषरक्षेत्रे प्रशाली बीजवदफल एवेत्याशयेनाह॥४३॥ श्रेय
सइति॥ हेधात श्रेयसोपि हितार्थयोगात्प्रशस्ततरस्याप्यस्य तेन वच वचसो हितोपदेशरूपस्य रात्रे विपर्ययो दिवसः स्फुटतारस्य व्यक्ततारस्य नभस इव भाजनं
नं पात्रं नास्मि॥ अनधिकारत्वादिति भावः॥ अत्राह्णो नभोमात्रसंबंधसंभवेपि तारासंबंधासंभवात्तारादिशीना(?)॥ नभःसंबंधविरोधायुक्तताराकितस्य नभ-
सोन पात्रमिति॥ कुतस्तवोपदेशानधिकारित्वं॥ किंच तेन तपसः पौर्वापर्य्यमित्यपेक्षायां तत्सर्वं स्वजात्यादिकथनपूर्वकं कथयति॥४४॥ क्षत्रियइति॥

अविज्ञातप्रबंधस्य वचो वाचस्पतेरपि॥ व्रजत्यफलतामेव नयद्रुह इवोहितं॥४३॥ श्रेयसोप्यस्य ते तात वचसो नास्मि भा-
जनं॥ नभसः स्फुटतारस्य रात्रेरिव विपर्ययः॥४४॥ क्षत्रियस्तनयः पांडोरहं पार्थो धनंजयः॥ स्थितः प्रास्तस्य दायादै-
र्भ्रातुर्ज्येष्ठस्य शासने॥४५॥

अहं क्षत्रियः क्षत्रियकुले जातः॥ तत्रापि महाकुले प्रसूतः॥ वीरसंतानश्चेत्याह॥ पांडोस्तनय इति तत्रापि कौंतेयो
स्मि न माद्रेय इत्याह॥ पार्थ इति पृथा कुंती तत्सुतः पार्थः॥ तस्याप्यपत्यमित्यपरे॥ अर्जुनोहं महावीरश्चेत्याह॥ धनंजय इति उत्तरकुरुषु विजित्य धना-
हरणाद्धनंजय इत्यर्थः॥ स्वाचि मुमागम इत्युक्तं॥ प्राक्॥ अथैवं चेत्किमर्थं तर्हि तपस्यति इत्याह॥ मोह्नार्थं वा किं न तपसि स्थित इति दायं पैतृकं
धनमाधत्त इति दायादा ज्ञातयः दायादौ सुतबांधवावित्यमरः॥ विभक्तव्यं पितृद्रव्यं दायमाहुर्मनीषिण इति विश्वः॥ स्वामीश्वरादिति सप्तमे सोपसर्ग-
गाद्दपि दायादेति कर्मण्यांतो निपातनात्साधुः॥ तैः प्रास्तस्य राज्यान्निरस्तस्य वैरनिर्यातनार्थिन इत्यर्थः॥ ज्येष्ठस्य भ्रातुर्युधिष्ठिरस्य॥ हृद्धस्य शास्त्र

रिरन्वयः॥ हृद्वस्य चन्यादेशः॥ शासने निदेशे स्थितः॥ तरास्तयानवस्यामीत्यर्थः॥ अन्यथा मानहानिः॥ सोभात्रभंगस्तस्य स्वजातिव्यतिक्रम इत्यादिदोषश्च
स्फुरतीतिभावः॥ अत एव हिंसैकरसिकस्य रागद्वेषकषायितचेतसः कुतो मे मोक्षाधिकार इति तात्पर्यं सार्थविशेषणत्वात्परिकरालंकारः॥ यदुक्तं वि
हृद्धं केवलं वेपश्यतित त्रोत्तरमाह॥४५॥ कृष्णेति॥ द्वीपमयनं जन्मभूमिर्यस्य स द्वैपायनः॥ स एव द्वैपायनो व्यासः॥ अस्त्रादित्वात्स्वार्थेऽण्॥ एवं कृष्णवर्णत्वा
त्कृष्णद्वैपायनश्च तस्यादेशादुपदेशादीदृशं विरुद्धवेषमित्यर्थः॥ व्रतं तपो नियमं बिभर्मि धारयामि न तु स्वेच्छयेति भावः॥ अथोपास्यां देवतामाह भृशमि
ति स्वाराध्यस्य सुखमाराध्यस्य सोप्रादिसमासः॥ स्वाराध्यस्येति पाठे उपसर्गात्खल् अन्ययः॥ मरुत्वत इन्द्रस्य भृशं सम्यगाराधने यत्नः॥ तस्य तत्प्रियदेवत

कृष्णद्वैपायनादेशाद्बिभर्मि व्रतमीदृशं॥ भृशमाराधने यत्नः स्वाराध्यस्य मरुत्वतः॥४६॥ दुरक्षान्दीव्यता राज्ञा राज्य
मात्मा वयं वधूः॥ नीतानि परतां नूनमीदृशी भवितव्यता॥४७

त्यास्तीति भावः॥ ननु भवादृशभ्रातृसहायस्य महावीरस्य युधिष्ठिरस्य कथं भारीभवप्राप्तिरित्यत्राह॥४८॥ दुरक्षानिति॥ दुरक्षान्कपटपाशकैरित्यर्थः॥ दिवः
कर्म चेति करणे कर्मसंज्ञा॥ दीव्यता क्रीडता आहूतो न निवर्त्तेतेति॥ द्यूतादपि रणादपीति शास्त्रात्॥ न तु व्यसनितयेति शेषः॥ राज्ञा युधिष्ठिरेण राज्यं
राष्ट्रं आत्मा स्वयं वयं॥ चत्वारोनुजा वधूर्जाया द्रौपदी च परतां परग्लहत्वं॥ परोक्षेषु ग्लहो ह्यक्षात्तु देवनाः पाशकाश्च ते इत्यमरः॥ नीतानि सर्वं द्यू
ते हारितानीत्यर्थः॥ नीतानीति नपुंसकैकशेषः॥ नयतेर्द्विकर्मकत्वात्प्रधाने कर्मणि क्तः॥ ननु सर्वस्य प्राज्ञः॥ कथमियमविमृश्यकारितात
त्राह॥ भवितव्यता अनर्थानामवश्यंभाविनूनं नात्र संशय इत्यर्थः॥ बुद्धिरपि भवति

ननु तथापि नवैव वनेषु आसंगो नतेषांत्वयीत्यत्राह ॥ तेनेति ॥ अनुजाः यस्य तेनानुजयुक्तेनेत्यर्थः ॥ तुल्ययोगः समासार्थः ॥ तेन युधिष्ठिरेण द्रौपद्या च मया विना मद्विरहादित्यर्थः ॥ आयामिनो दीर्घाः ॥ यामाः ॥ प्रहरा यासां तासु दुःखितस्य तथाभावादिति भावः ॥ यामिनीष्वभितप्यते ॥ भावे लट् ॥ तस्योत्पन्नस्य तेषु महत्त्वेषामपि मय्यासंगान्नमे वैराग्यावकाश इत्यर्थः ॥ अथ वैरनिर्यातनस्यावश्यंभावद्योतनाय चतुर्भिः पराप्रकृतिं दर्शयति ॥४८॥ हृतेत्यादि ॥ अरातयः ॥ सभायां ॥ प्रसभं बलात्कारेण हृतोत्तरीयान् ॥ अत एव गतह्रियः ॥ संप्राप्तलज्जान नोऽस्मान् मर्मभिदा मर्मभेदिना वचसा निरतक्षन् ॥ अशातयन् ॥ वस्त्रापहारवाक्पारुष्याभ्यां तथाव्यथयामासुरित्यर्थः ॥ तन्त्वहरणशब्दसामर्थ्याद्वचसो वा वैयापस्यं गम्यत इति वस्तुनालंकारध्वनिः ॥ अथान्ति दुःसहं निका

तेनानुजसहायेन द्रौपद्या च मया विना ॥ भृशमायामियामासु यामिनीष्वभितप्यते ॥४८॥ हृतोत्तरीयां प्रसभं सभा
यामागतह्रियः ॥ मर्मच्छिदा नो वचसा निरतक्षन्नरातयः ॥४९॥ उपाधत्त सपत्नेषु कृष्णाया गुरुसन्निधौ ॥ भाववमा
नयने सत्याः सत्यंकारमिवान्तकः ॥५०॥

उपाधत्तेति ॥ अंतको मृत्युः ॥ गुरुसन्निधौ भीष्मद्रोणादिसमक्षे सत्याः ॥ पतिव्रतायाः कृष्णायाः द्रौपद्याः ॥ आनयने केशांबराकर्षणे ॥ भाववच्छिन्नं ॥ सत्यंकारमिव ॥ सपत्नेषु पांडुनिहितवान् ॥ तेषां विनाशकाले विपरीतबुद्धिमुत्पादितवानित्यर्थः ॥ क्रियतेऽनेनेति कारः ॥ करणे घञ्प्रत्ययः ॥ सत्यस्य कारः ॥ सत्यंकारः ॥ तस्यापनं क्रियादौ सत्यदीर्घायप्राग्दीयमानो मूल्यैकदेशः ॥ क्लीवे सत्यापनं सत्यंकारः सत्याकृतिः स्त्रियामित्यमरः ॥ कारे सत्यागदस्येति मुमागमः ॥ केनेयमाकृष्टा सभ्यैर्वा किं कृतं तत्राह ॥५०॥ हाम

मि

तामिति॥ दुःशासनेन पुरःसरा सभायां अन्याकृष्यमाणामित्यर्थः॥ अनुपसर्जनादिति नङीप्॥ तां कृष्णां सभायां साधवः सभ्याः॥ सभायां य इति यन्प्र
त्ययः॥ अभिसायार्के दिनांते सूर्याभिमुखं स्थितस्येति शेषः॥ सायं नाश दिनांतयोरिति विश्वः॥ तस्रोनाभिप्रति अभिमुख्ये इत्यव्ययीभावः॥ महातरोः संबंधिनीं
आवृत्तां परिवृत्तां छायामिव तत्तरामैक्षंत॥ ननु चिरं जुगुप्सितत्वात्॥ नापि किं चिद्याच्रियंत इति माधवस्य स्वभंगादिति भावः॥ किंतु अर्कवदेव साक्षित्वमा
त्रम वास्थिताइत्यर्थः॥ अत्राकृष्यमाणायाः कृष्णाया॥ आकृष्टारं प्रति पराङ्मुखत्वादावृत्तछायोपमं न यापितां न मुंचतीति दुःशासनस्य तत्साम्यं॥५१॥

तामैक्षंत तत्तरां सभ्याः दुःशासनपुरःसरां॥ अभिसायार्कमावृत्तां छायामिव महातरोः॥५१॥ अयथार्थक्रियारंभैः पतिभिः
किं निरीक्षितैः॥ अरुंध्येतामितीवास्या नयने वाष्पवारिणा॥५२॥ सोढवान्नो दशामंत्यां ज्यायानेव गुणप्रियः॥ सुल
भो हि द्विषां भंगो दुर्लभा सत्स्ववाच्यता॥५३॥

अथास्याः तादात्मिकमयथार्थं वर्णयति॥ अयथार्थेति॥ अयथार्था मिथ्या
भूताः॥ क्रियारंभाः॥ परिग्रहप्रवृत्तिः॥ निमित्तकर्मयोगा येषां तैस्तामरक्षद्भिरित्यर्थः॥ एतत्संबंधि पांति रक्षंतीति पतयो भर्तारः॥ पतोर्डुतिरि
त्यौणादिकोडति प्रत्ययः॥ नो निरीक्षितैः॥ किं न किंचित्फलमस्तीत्यर्थः॥ इतीव इत्थं विचार्येत्युत्प्रेक्षा॥ वाष्पवारिणा अस्याः॥ कृष्णायाः लोचने
अरुंध्येतां॥ आवृत्ते रुधेः कर्मणि लङ्॥ अः शरणग्रहणेदित्यर्थः॥५२॥ ननु भवद्भिः किमर्थं असमर्थैरिवोपेक्षितं तत्राह॥ सोढवानिति॥ गुणाः प्रि
या यस्य स गुणप्रियः॥ यत्तत्संबंधिपांतिरक्षं प्रियगुणो वा प्रियस्येति परनिपातः॥ ज्यायान् अग्रजो युधिष्ठिर एव शांसोढवान्॥ ननु वयं॥ किंतु तद्धि हुक्का
इति भावः॥ ननु शत्रूपेक्षा महानर्थकारिणीत्याशंक्याह॥ विद्विषां भंगः सुलभः॥ कालांतरेपीति शेषः॥ सत्सु सज्जनेषु अवाच्यता अनिंद्यता दुर्लभा न तु त्ये

कि॰ का॰ टी॰
वे॰ स॰ २
६

128

ननुशत्रुवधेराज्ञो कोनामापवादः॥ प्रत्युतकीर्तिरेवेत्याशंक्य सत्यमेवं समयोल्लंघनकलंकितकीर्त्तेर्मनस्विनो निंदास्यादित्याशयेनाह॥ स्थित्येति॥ तोयराशी
नां तोयानि मनस्विनां मनांसि स्थित्यनतिक्रांतेर्मर्यादोल्लंघनाकुलानि॥ भीरूणि॥ अंतराव्याकुलितानि संक्षोभितान्यपि॥ स्वच्छानि अकलुषाणि नत्वरं ते द्
त्यर्थः॥ मनस्वी च्चयं युधिष्ठिर इतिभावः॥ अत्रतोयानां सामान्यतो मनस्विनां चाप्रकृतानामेव गुणलौल्यादौपम्यागतावायां॥ तुल्ययोगितालंकारः
गुणाश्चात्रभीरुत्वं स्वच्छताय च॥५४॥ नन्वपनातश्रो॥ स्वजनवैरे किंकारणमित्याशंक्यास्मास्वसत्सौहार्दमेवेत्याह॥ धार्त्तराष्ट्रैरिति॥ धार्त्तराष्ट्रैः धृत
राष्ट्रपुत्रैः॥ सहप्रीतिः॥ सौहार्दमेवास्मासु विषये वैरमसूत॥ प्रसूतवती॥ सूयतेर्दैवादिकात्कर्त्तरि लिङ्॥ ननु सौहार्दं वैरजनकं चेति विप्रतिषिद्धं॥ न

स्थित्यनतिक्रांतभीरूणि स्वच्छान्याकुलितान्यपि॥ तोयानि तोयराशीनां मनांसि च मनस्विनः॥५४॥ धार्त्तराष्ट्रैः सह
प्रीतिर्वैरमस्मास्वसूयत॥ असन्मैत्री हि दोषाय तटच्छायेव सेविता॥५५॥ अपवादादभीतस्य समस्य गुणदोषयोः॥ अ
सद्वृत्तेरहोवृत्तं दुर्भाव्यं विधेरिव॥५६॥

त्राह॥ असदिति॥ हि यस्मादसन्मैत्री दुर्जनसंगतिः॥ कूलस्य आसन्नपातस्य नदीत
टस्य छायेव सेविता आसन्नी दोषायानर्थायभवति॥ नखलु दुर्जनवान्मित्रद्रोहपातकं पश्यंतीति भावः॥ उपमालंकारः॥ नायम र्थान्तरन्या
सः॥५५॥ सर्वथा दोषावेव तेषां वृत्तमविज्ञाय कथं मैत्री कृतेत्याशंक्य किं कुर्मो दुर्जनवृत्तं दुर्विज्ञेयमित्याह॥ अपवादादिति॥ अपवादाज्जनापवादाद्भीत
स॥ गुणदोषयोः समस्य तुल्यवृत्तेः निग्रहानुग्रहयोर्न गुणदोषावपेक्ष्य इत्यर्थः॥ विधेरप्येतद्विशेषणद्वयं॥ असद्वृत्तेर्दुराचारस्य
स्य अनुगृह्णमानस्येत्यर्थः॥ गुणदोषयोः समस्य तुल्यवद्दू निग्रहानुग्रहयोर्न गुणदोषावपेक्ष्य
दुर्जनस्य वृत्तं विधेर्दैवस्य वृत्तमिव दुर्विभाव्यं विभावयितुमशक्यं किंतु कार्यैकसमधिगम्यमित्यर्थः॥

नन्वेवंमानी कथं परिभूतो जीवतीत्याह ॥ ध्वंसतेति ॥ परैः शत्रुभिः परिभूतस्य मे मम हृदयं सद्यः ध्वंसते भ्रंसेदित्यर्थः ॥ अमर्षकर्त्ता प्रतीकाररूपं भुजालंबनं लं
वयेत् न गृह्णीयात् ॥ यदि हृदयेनेति शेषः ॥ सत्यं जीवामि ॥ प्रतिविधित्सया ननु निर्लज्जेति भावः ॥ ५७ ॥ ननु त्वयैव कोयमभिमानस्तत्राह ॥ अवधूयेति ॥ अव
धूय परिभूय हरिणैर्मृगैस्तुल्यरूपतां तुल्यजीवनत्वं ॥ वन्याहारतामित्यर्थः ॥ नीताः प्रापिताः वयं पंचापीति शेषः ॥ अन्योन्यस्यापि जिह्रीम जल्लामहे ॥ स
हवासिनां सहचारिणां मध्ये किं पुनः ॥ प्रागेव जिह्रीम इति वक्तव्यमित्यर्थः ॥ क्रियायोसंबंधशौरेण षष्ठी ॥ अत्र वयं पंचापि तुल्याभिमाना एवेदं मदेक

ध्वंसते हृदयं सद्यः परिभूतस्य मे परैः ॥ यद्यमर्षः प्रतीकारं भुजालंबनं लंबयेत् ॥ ५७ ॥ अवधूयारिभिर्नीता हरिणै

स्तुल्यरूपतां ॥ अन्योन्यस्यापि जिह्रीमः किं पुनः सहवासिनां ॥ ५८ ॥ शक्तिवैफल्यनम्रस्य निःसारत्वाल्लघीयसः ॥

जन्मिनो मानहीनस्य तृणस्य च समा गतिः ॥

साध्यं कर्मेति मुनिशासनान्मया अनुष्ठीयत इति भावः ॥ ५८ ॥ तर्हि दुःखैकनिदान
मंतः शत्रुमानमेवत्यज्यतामित्याशंक्य तत्त्यागे दोषमाह ॥ शक्तीति ॥ शक्तिवैफल्येनोत्साहादिशक्तिवैधुर्येण ॥ अवष्टंभसामर्थ्यविरहेण
नम्रस्य विधेयभूतस्य निःसारत्वाद्दुर्बलत्वात् ॥ स्थिरांशरहितत्वात् ॥ सारो बलेस्थिरांशे चेत्यमरः ॥ लघीयसो गौरवहीनस्य निरस्यत्यर्थः ॥ मान
हीनस्य जन्मिनो जंतोः श्रीहर्षादिभिः तृणस्य च गतिरवस्था समेति ॥ मानहीनस्य तृणादपि निकृष्टत्वान्नत्याज्योमान इति भावः ॥ श्लेषालं
कारोयं ॥ तदनुप्रणीतेयमुपमेत्यनर्थदीपिकेति व्यज्यते ॥ ५९ ॥ मानत्यागे दोषमुक्त्वा तत्सद्भावे षड्गुणमाह ॥ अलंघ्यमित्यादि ॥ महीभृतां सं

वंधियद्यत्शृंगादिकमुच्चैरुन्नतं तत्तदलंघ्यं उद्वीक्ष्य तर्कयत्वेति यावत् ॥ महतां तुंगता मानौन्नत्यं ज्यायसीं प्रियतां आतिप्रियत्वं केन हेतुना मागात् ॥ अ-
न केनापि प्रियत्वमेव गच्छतीत्यर्थः ॥ आशिषि माङि लुङ् पवादः ॥ देवादनिष्टोपि श्रहामुत्पादयन्नेवौषधवदित्यर्थः ॥ आशंसाद्योतनार्थमाशीःप्र-
योगः ॥ उद्वीक्ष्येति ॥ असमानकर्तृत्वान्निर्देशः ॥ कश्चित्तत्रयोर्दर्शनान्तोऽध्वः ॥ केचिदुद्वीक्ष्यमिति पठंति ॥ नत्रयदुच्चैः ॥ नदलंघ्यं ॥ उद्वीक्ष्य च ॥ अतो
महतामित्यादिर्जोजयंति ॥ ६ ॥ तावदिति ॥ किंच तावदेवासौ लक्ष्मी आश्रीयते ॥ तावदस्य पुंसो यशः स्थिरं ॥ तावदेवासौ पुरुषः पुरुषत्वेन गण्यते ॥
इत्यर्थः ॥ यावन्मानान्न हीयते ॥ न भ्रश्यति ॥ मानहीनस्य न किंचिच्छुभमस्तीत्यर्थः ॥ स इति ॥ स पुमान् ॥ अर्थवज्जन्मा सार्थकजन्मा यस्य पुंसः ॥ ना-

अलंघ्यं तत्तदुद्वीक्ष्य यद्यदुच्चैर्महीभृतां ॥ प्रियतां ज्यायसीं मागान्महतां केन तुंगता ॥ ६ ॥ तावदाश्रियते लक्ष्म्या ताव-
दस्य स्थिरं यशः ॥ पुरुषस्तावदेवासौ यावन्मानान्न हीयते ॥ ६१ ॥ स पुमानर्थवज्जन्मा यस्य नाम्नि पुरःस्थिते ॥ नान्या-
मंगुलिमभ्येति संख्यायामुद्यतांगुलिः ॥ ६२ ॥ दुरासदवनज्यायान्गम्यस्तुंगोपि भूधरः ॥ न जहाति महौजस्कं मानप्रां-

म्नि पुरोग्रे स्थिते सति संख्यायां पुरुषगणनायां प्रसाधे उद्यता पुरुषमधिक्रम्य उन्नमिता अंगुलि ॥ अन्यां द्वितीयायां अंगुलिमुद्यतामिति शेषः ॥ न
भ्येति ॥ अद्वितीयत्वादस्येत्यर्थः ॥ एतन्मानहीनस्य न संभवतीति भावः ॥ ६२ ॥ दुरासदेति ॥ दुरासदैर्वनैर्ज्यायान् ॥ दृढः ॥ तथापि तुंगो भूधरो गम्यः ॥
गंतुमशक्यः ॥ प्रसिद्धं चैतदिति भावः ॥ महौजस्कं प्रतापसंपन्नं मानप्रांशुं उन्नतं पुरुषमिति शेषः ॥ अलंघ्यता न जहाति ॥ न कदाचिन्मानी
लंघयितुं शक्य इत्यर्थः ॥ गिरेरपि गरीयान्मनाधिक इति भावः ॥ अत्रोपमाद्भूधरादुपमेयस्य मनस्विनो धर्मान्तरसाम्य अलंघ्यत्वे निकथनाद्व्यतिरेको

गुरूनिति॥ तेनराः॥ वंश्यान्॥ अन्वेभवान्॥ गुरून्कुर्वंति॥ गुरुत्वं प्रापयंति॥ रघुदिलीपादिवत्॥ तैर्नरैर्वस्तु निधारयतीति॥ वसुंधरासंज्ञायां भृगुव्रतीत्यादिना खच्‌प्रत्यये॥ खचिह्रस्व इति ह्रस्वः॥ अन्वर्थानुगतार्था तेषां वसुभूतानां धारणादिति भावः॥ येषांश्मु आगीय यशांसि इंदुमंडलं ह्रेपयंति॥ लज्जयंति कलंकत्वादिति भावः॥ इह शुभ्रां हि यशो मानमहत् एवं संभवतीति तात्पर्यार्थः॥ ह्रीधातोर्णिपता लुट्॥ अर्त्तिह्रीत्यादिना पुमागमः॥ अत्र ह्रेपणस्य साहृश्यपर्यवसानादुपमालंकारः॥६४॥ उदाहरणमिति॥ येरमर्षः॥ शुष्के असनिरिव॥ अरिषु पात्यते॥ आहिप्यते॥ तेमनस्विनां प्रथमे ऽग्रेसरास्ते आशीःषु विजयस्वेत्याशीर्वादेषु उदाहरणं निदर्शनं भवतीति शेषः॥ रामादिवदुपमानं भवतीत्यर्थः॥ अतो नित्यो नत्याज्यो मान इति संदर्भार्थः॥६५॥ अभिद्रोहेण भूता

गुरून्कुर्वंति ते वंश्यानन्वर्था तैर्वसुंधरा॥ येषां यशांसि शुभ्राणि ह्रेपयंतींदुमंडलं॥६४॥ उदाहरणमाशीःषु प्रथमे ते मनस्विनां॥ शुष्काशनिरिवामर्षो यैरराति षु पात्यते॥६५॥ न सुखं प्रार्थये नार्थमुदन्वद्वीचिचंचलं॥ नानित्यताशनेस्त्रस्यद्विविक्तं ब्रह्मणः पदं॥६६॥ अमार्ष्टुमयशःपंकमिच्छेयं छद्मनागतं॥ वैधव्यतापितारातिवनितालोचनांबुभिः॥

२

मित्यादीनायदुक्तं तत्रोत्तरमाह॥ नेत्यादि॥ उदन्वद्वीचिचंचलं॥ अस्थिरं सुखं कामं न प्रार्थयेनेच्छामि तथा चंचलं अर्थं न च प्रार्थये॥ किंच॥ अनित्यता विनाशिता सैवाशनिस्तस्यास्त्रस्यन विभ्यत्॥ वाभ्राशेत्यादिना शपन्प्रत्ययः॥ विविक्तं निर्बाधं ब्रह्मणः वेधसः आत्मनः पदं स्थानमिति॥ पदं स्थानं ऐकाल्यलक्षणां मुक्तिं न प्रार्थये॥ एतेन यदुक्तं उच्छेदं जन्मनः कर्त्तुं इत्यादि तत्समाहितं॥६६॥ अमार्ष्टुमिति॥ किंच छद्मना कपटेन कृतं शत्रुभिरिति शेषः॥ अयश एव पंक इति रूपकालंकारः॥ वैधव्येन तापितानां दुःखीकृतानां अरातिवनितानां लोचनांबुभिः॥ अमार्ष्टुं क्षालयितुं इच्छेयं अभिलषेयं

॥कि॰॥का॰॥टी॰॥
॥द्वं॰॥ स॰॥११॥
॥१३॥

एवंयःकरोतिवभोद्द्को इत्याद्युक्तः दोषः॥स्यादित्याशंकामंगीकृत्यग्लानिर्नदोषेतिन्यायमाश्रित्ययुग्मेनोत्तरमाह॥ युग्मं॥ अपहस्येति॥ ७८॥ वंशेति॥ ७९
अपहस्येति॥ अथवासद्भिः पंडितैरपहस्य॥ अपहसिष्यत्यर्थः॥ वर्त्तमानसामीप्येवर्त्तमानवद्वेतिलट्॥ हसनेरार्पनात्कर्मणि ल्यप्न स्यादिति पाठः॥ मेधि
यः प्रमादः॥ अनवधानत्वंवास्तु॥ भवानपिअस्थाने अयोग्यविषये विहितो आयासोहितोपदेशप्रयासो येन तथोक्तः॥ विफलप्रयत्नस्सन्नित्यर्थः॥ कामं
जिह्रेतुलज्जतु॥ ७८॥ वंशेति॥ अहंतुविद्विषांसमुच्छेदेन वंशलक्ष्मीं अनुद्धृत्य निर्वाणंमोक्षमपिजयश्रियः॥ अंतरायंमन्ये॥ ननुपुरुषार्थमित्यर्थः॥ किमुत
न्योत्सवादिकमितिभावः॥ ७९॥ नन्वयंदुराग्रहइत्यत्राह॥ आजन्मेति॥ पुरुषोयावदरीभिर्विलुप्तंहृतंयशः॥ इषुभिर्बाणैर्नादत्ते नारिवधेन प्रत्याहरतीत्यर्थः॥ ना

श्लो॰ अपहस्याथवासद्भिः प्रमादोवास्तुमेधियः॥ अस्थानविहितायासः कामंजिह्रेतुवाभवान्॥ ७८॥ वंशलक्ष्मीमनुद्धृ
त्यसमुच्छेदेनविद्विषां॥ निर्वाणमपिमन्येहमंतरायंजयश्रियः॥ ७९॥ आजन्मापुरुषस्तावद्गतासुस्तृणमेववा॥ या
वन्नेषुभिरादत्ते विलुप्तमरिभिर्यशः॥ ८०॥ अनिर्जयेनद्विषतां यस्यामर्षः प्रशाम्यति॥ पुरुषोक्तिः कथंतस्मिन्

वदजन्मा॥ अजातप्रायइत्यर्थः॥ नन्वजातोपिजननानंतरं उपयुज्यत एवेत्यरुच्यापक्षांतरमाह॥ गतासुः॥ मृतः मृततुल्यइत्यर्थः॥ अतोनाहं
आग्रहंकरोमि किंतुवीरधर्ममनुपालयामीतिभावः॥ ८०॥ सर्वथावैरिनिर्यातनमेवकर्त्तव्यमित्युक्तं॥ तदकरणे पुरुषगुणानां हानिदोष
माह॥ अनिर्जयेनेति॥ यस्यअमर्षो द्विषतां अनिर्जयेन निर्जयं विनैव प्रशाम्यति॥ उपलक्षणेतृतीया॥ तस्मिन्पुरुषइत्युक्तिः॥ पुरुषशब्दः॥
कथंनकथंचिदित्यर्थः॥ प्रवर्त्तनइतिशेषः॥ तन्निमित्तस्यपुरुषाकारस्याभावादितिभावः॥ हेतपोधन त्वंहित्वमेवब्रूहि॥ नचनेकिंचिदविदित

ननु पुरुषत्वजात्यैव पुरुषोऽस्ति अत एव को किं पुरुषाकारेणेत्यत आह॥ कृतमित्यादिना द्वयेन॥ जातिमात्रावलं विना जातिमात्राभिधायिना पुरुषपदेन कृतं अलं॥ न तेन किंचित्साध्यत इत्यर्थः॥ अत्र गम्यमानसाधनक्रियाकरणत्वात्॥ तृतीयेत्युक्तं प्राकृतमिति निषेधार्थमव्ययं चादिषु पठ्यते॥ सत्यं जातमात्रेऽपि पुरुषशब्दः प्रवर्तते॥ परं तु नासौ पुंसामाशास्यः॥ अश्वादिसाधारणादिति॥ तात्पर्यार्थः॥ नर्हि॥ कीदृक् श्लाघ्य इत्याशंक्याह॥ य इत्यादिना साहूत्रयेण यः पुमान्॥ अंगीकृतगुणैः॥ गुणपक्षपातिभिः॥ श्लाघ्यः स्तुत्यः सन्॥ सविस्मयं उदाहृतः॥ पुंसाईदृशेन भवितव्यमिति निदर्शितः॥७२॥ किंच

कृतं पुरुषशब्देन जातिमात्रावलंविना॥ योंगीकृतगुणैः श्लाघ्यः सविस्मयमुदाहृतः॥७२॥ ग्रसमानमिवौजांसि सदसा गौरवेरितं॥ नाम यस्याभिनंदंति द्विषोऽपि स पुमान् पुमान्॥७३॥

सदसा सभाया गौरवेरितं॥ तं कथाप्रसंगगौरवपूर्वमुच्चारितं सत्॥ ओजांसि अस्य शत्रूणामिति शेषः॥ तेजांसि ग्रसमानं गिलदिव स्थितं यस्य पुंसो नाम द्विषोऽप्यभिनंदंति॥ अनुमोदंते॥ किमुत सुहृद इति भावः॥ स पुमान्॥ नरः॥ पुमान् पुरुषत्वेन गण्यत इत्यर्थः॥ प्रथमः पुंसशब्दो जातिवचनः॥ द्वितीयो गुणवचनः॥ स एव च श्लाघ्य इत्यर्थः॥ अत्र पुमान् पुमानिति तात्पर्यमात्रभेदभिन्नशब्दार्थयोः पुनरुक्त्या लक्षणे लाटानुप्रासोऽलंकारः॥ तथा च सूत्रं॥ तात्पर्यभेदमुक्तो लाटानुप्रास इति॥७३॥ ननु सत्युभीमादिषु तैरेव कार्यभारः इत्यत्राह॥ यथेति॥ नृपतिर्युधिष्ठिरः॥ यथाप्रतिज्ञं युधिद्विषतां॥ प्रतिचिकीर्षया॥ ममैवाधीनं तत्प्रतिचिकीर्षितं द्विषतः प्रतिकर्तुमिच्छया प्रतिज्ञानुसारेण॥ जिघांसयेत्यर्थः॥ तृष्यन् पिपासुः॥ जलांजलि

॥कि॰॥का॰॥टी॰॥
॥वं॰॥ स॰॥१३॥
॥१३१॥

मिवमामेवाध्येति॥ कार्यसिद्धेर्मदायत्तत्वान्मामेव स्मरति॥ अत एव ममयमभिनिवेश इत्यर्थः॥ अधिगमर्थपदेषां कर्मणि षष्ठी॥७४॥ ननु युधिष्ठिरः यथात्त
प्यकरो न तु त्वया च स्वार्थमात्रमनुसंधीयत इत्याह॥ स वंशस्यावदातस्य शशांकस्येव लांछनं॥ कृछ्रेषु व्यर्थया यत्र भूयते भर्तुराज्ञया॥ ७५॥ सङ्गति॥ सन
स्व रोऽवदातस्य स्वछस्य शशांकस्येव लांछनं भवति॥ यत्र यस्मिन्पुरुषे कृछ्रेषु व्यसनेषु सत्सु भर्तुः स्वामिनः आज्ञया व्यर्थया भूयते॥ भावे लट्॥ आपादि स्वा
र्थापेक्षकः कुलघातकः॥ तत्कथं स्वार्थनिष्ठकार्यमयुक्तमित्यर्थः॥ ७५॥ यदुक्तं विजहीहि रणोत्साहं इत्यादि तत्रोत्तरमाह॥ कथं वेति॥ धर्मविरोधि
नी॥ अर्वाक् गार्हस्थ्यात्प्राक् एव॥ मुनिना वानप्रस्थस्य माघ चतुर्थाश्रमो वा त्रैवर्णिक्रमेण तस्य विधानात्॥ त्रयाणां वर्णानां वेदमध्याप्य चत्वार आश्रमा

यथाप्रतिज्ञं द्विषतां युधिः प्रतिचिकीर्षया॥ मामेवाध्येति नृपतिस्तृष्यन्निव जलांजलिं॥ ७४॥ स वंशस्यावदातस्य श
शांकस्येव लांछनं॥ कृछ्रेषु व्यर्थया यत्र भूयते भर्त्तुराज्ञया॥ ७५॥ कथं वा दीयतामर्वाङ् मुनित्वं धर्मरोधिनी॥ आ
श्रमानुक्रमः पूर्वैः स्मर्य्यते न व्यतिक्रमः॥ ७६॥

इति सूत्रकारवचनाच्च॥ त्रात्रियस्यापि कैश्चिदिष्टत्वान्नैथेव नत्सम्यागिवेदि
तमस्माभिः॥ रघुवंशे संजीविन्यां स किलाश्रममन्त्यमाश्रित इत्यत्र कथं वा दीयतां संप्रत्येलोहः॥ तथाहि॥ पूर्वैर्मन्वादिभिः॥ आश्रमानुक्रमः स्मर्य
ते न व्यतिक्रमः॥ ब्रह्मचारी गृही स्यात्॥ गृहीभूत्वा वनी भवेत्॥ वनी भूत्वा प्रव्रजेदिति श्रुत्यनुसारादित्यर्थः॥ एतदपि चत्वार आश्रमा इत्येतत्पक्षमाश्रित्यो
क्तं॥ यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत्॥ गृहाद्वा वनाद्वेति व्युत्क्रमपक्षस्यापि श्रवणात्॥ सामान्येन विशेषणसमर्थनरूपोऽर्थान्तरन्यासः॥ ७६॥
ननु भवान्गृहस्थ एव तत्कथमर्वाङ् मुनित्वाविरोध इत्याशंक्य स त्वं गृहस्थोऽसि तथापि कृतनिखिलगृहस्थकर्त्तव्यस्य वानप्रस्थाधिकारात्

131

गृहस्यमात्रस्यन चाहं मयापिकृतकृत्यइत्युत्तरमाह॥ आसन्नेति॥ आसन्नकालगता अवश्यकर्त्तव्येत्यर्थः॥ रूढा प्रसिद्धा महतीत्यर्थः॥ इयं पूर्वोक्ता धूः वैरिनिर्यातनभारः॥ दूरगा दूरवर्तिनी जननी च तथा आचारं वात्सल्याधिकइत्यर्थः॥ तथापि ज्यायान् ज्येष्ठो नृपो युधिष्ठिरश्च मे मम स्वातंत्र्यं त्वाच्छंदत्वात्तिर्यं तिरस्करोति॥ आश्रमांतरं प्रतिबध्नातीत्यर्थः॥ तिरस्करोतीति प्रत्येकमभिसंबध्यते॥ अन्यथा बहुवचनप्रसंगात्॥७७॥ उक्तमर्थमुपसंहरति॥ स्वधर्मइति॥ मानशालिनः॥ स्वधर्मं क्षात्रं कर्म अनुरुंधंते॥ अनुवर्त्तंते॥ अतिक्रमं स्वधर्मातिक्रमं नानुरुध्यंते॥ ततः किमत आह॥ अरातिभि

आसन्नाधूरियंरूढाजननीदूरगाचमे॥ तिरस्करोतिस्वातंत्र्यंज्यायांश्चाचारवान्नृप॥७७॥ स्वधर्ममनु रुंधंतेनातिक्रममरातिभिः॥ पलायंतेकृतध्वंसानाहवान्मानशालिनः॥७८॥ विछिन्नाभ्रविलापंवा विलीयेनगमूर्द्धनि॥ आराध्यवासहस्रांशुमयशःशल्यमुद्धरे॥७९॥

रिति॥ अरातिभिः कृतध्वंसाः कृतापकाराः संतः॥ आहवान्न पलायंते॥ अयमेव धर्मानुरोधः इत्यर्थः॥ उपसर्गस्यायतेवतिरेफस्य लत्वं॥ अत्र मनुः॥ न निवर्त्तेत संग्रामात् क्षात्रधर्ममनुस्मरन्॥ इति॥ अत्रोत्तरवाक्यार्थं प्रतिवाक्यार्थस्य हेतुत्वात्काव्यलिंगमलंकारः॥७८॥ किंच बहुना मम मनिश्चयः श्रूयतामित्याह॥ विछिन्नेति॥ विछिन्नं वातहतं यदभ्रं तद्वद्विलीयेति॥ विछिन्नाभ्रविलापं उपमानकर्मणिवेति उपमानकर्म्युपपदेणमुल्॥ नगमूर्द्धनि॥ आसिन्नगिरिशृंगे॥ विलीये विशीर्ये॥ वाकल्पादिषु यथाविध्यनुप्रयोगः॥ यद्वा सहस्रांशुमाराध्य॥ अयशश्च एव

शल्यं तदुद्धरे उद्धरिष्यामि॥ नतु गन्तुं नराशंकेयेत्यर्थः॥ वाशब्दो विकल्पे॥७९॥ इतीति॥ मघवा इंद्रः॥ इत्युक्तवंतं पुत्रमर्जुनं॥ आविष्कृतादिव्यमूर्तिर्निजरूपं येन स तथोक्तः सन्॥ दोर्भ्यां परिरभ्य॥ विभूत्यै श्रेयसे॥ उपहन्यते ऽनेनेति उपघातं॥ करणे घञ्प्रत्ययः॥ अघानां दुःखानां उघातं भवः संसारस्योद्भवः कारणमिति भवोद्भवः॥ शिवमस्याराधनं उपासनं॥ आदिदेश॥ शिवमुपदिश्य तपश्चरेत्यज्ञापयामासेत्यर्थः॥८०॥ प्रीतेति॥ पिनाकिनि शिवे प्रीते सति लोकपालैः सह॥ मया लोकत्रयेपि विहितसप्रतिवार्यवीर्यस्स तथोक्तः सन्॥ परेषां शत्रूणां लक्ष्मीं भृशं समुत्सुक

इत्युक्तवंतं परिरभ्य दोर्भ्यां तनूजमाविष्कृतदिव्यमूर्त्तिः॥ अघोपघातं मघवा विभूत्यै भवाराधनमादिदेश॥८०॥ प्रीते पिनाकिनि मया सह लोकपालैर्लोकत्रयेपि विहिताप्रतिहार्यवीर्यः॥ लक्ष्मीं समुत्सुकयितासि भृशं परेषामुच्चार्य्य वाचमिति तेन तिरोबभूवे॥८१॥

यितासि॥ समुत्सुकां तय्यनुरक्तां कर्त्तासि॥ पुनराहरिष्यसीत्यर्थः॥ वीरभोग्याः संपद इति भावः॥ समुत्सुकशब्दात्तत्करोतीति णिचं तात्कर्त्तरि लुट्॥ इति वाचमुच्चार्य्य तेनेंद्रेण तिरोबभूवे ऽन्तर्दधे॥ भावे लिट्॥ वसंततिलका वृत्तम्॥ उक्ता वसंततिलका तभजा जगौ ग इति लक्षणात्॥८१॥ इति श्री पदवाक्यप्रमाणपारावारीण धुरीण श्रीमहोपाध्याय कोलाचल मल्लिनाथ सूरिविरचितायां किरातार्जुनीयव्याख्यायां घंटापथसमाख्यायां एकादशः सर्गः॥११॥ संवत् १९२७ आश्विनशुक्लाष्टम्यां समाप्तिमगमत् लिपितं गिरधारी रामस्वार्थं परार्थं च॥ राम॥